ona Oriental Series No. 49

1

श्रीमम्मटाचार्यविरचितः

॥ काव्यप्रकाशः ॥

दशमोल्लासः

(प्रदीप, उद्योत, प्रभा, संकेत, चंद्रिकादिटीकोद्धृत-
टिप्पण्यादिभिः सनाथीकृतः सुसंस्कृतश्च)

THE

KĀVYAPRAKĀŚA

OF

MAMMAṬA

Ullāsa X

'he Late Prof. Chandorkar's edition thoroughly revised and critically edited with additional extracts from Sanskrit Commentaries—*Pradīpa*, *Udyota*, *Prabhā*, *Saṅketa*, *Chandrikā* etc.,—explanatory notes and Translation into English)

BY

Vidyā-sudhākara HAR DUTT SHARMA, M.A., Ph. D.
SOMETIME PROFESSOR OF SANSKRIT,
S. D. COLLEGE, CAWNPORE

POONA
ORIENTAL BOOK AGENCY
1935

WORKS BY THE SAME AUTHOR

			Rs. As.
1.	Padmapurāṇa and Kālidāsa.	...	2—0
2.	Jayamaṅgalā.	...	2—0
3.	Saduktikarṇāmṛta.	...	10—0
4.	Sāṅkhyakārikā—Gauḍapādabhāṣya.	...	2—0
5.	Sāṅkhyakārikā—Tattva-Kaumudī.	...	3—0
6.	Bhāminīvilāsa	...	2—0
7.	Kāvyaprakāśa, X	...	3—0

[For Abbreviation, see page 212]

Printed by: S. R. Sardesai, B.A., LL.B., at the Samarth Vidyalaya 'Samarth Bharat Press', 947 Sadashiv Peth, Poona
Published by: Dr. N. G. Sardesai, for the Oriental Book Agency, Poona

Dedicated

to

The Sacred and Affectionate Memory

OF

Frau Prof. Dr M. WINTERNITZ

who was more than a mother to me.

PREFACE

The excellent edition of the tenth Chapter of Kāvyaprakāśa prepared by the late Prof. D. T. Chandorkar, Professor of Sanskrit, Fergusson College, Poona, has long been out of print. The work of revising and re-editing it fell upon my shoulders and I owe an explanation for introducing the changes. The former edition contained the texts of only two commentaries, *viz.*, Pradīpa and Udyota. When the old edition was first published these two commentaries were still in Ms. form. Hence it was necessary to print them. But now, as most of the important commentaries are published, I thought it fit to introduce a change. I have followed the line adopted by the late P. Vamanacharya Jhalkikar and made a selection from various commentaries, adding my explanations where necessary. One thing which I considered of great importance is that the sense of the verses cited as illustrations should be clear to the student before he can understand and appreciate the figures in them. Hence, except for very easy verses, every verse has been explained in the Ṭīkā. I differ from Jhalkikar's method in that I have ascribed every quotation to its source and put it in inverted commas. All what is not in inverted commas is mine. Again, I have tried to be brief and to the point. In the Notes also some important matter has been added. In the Appendix containing the list of Alaṅkāras recognised by other rhetoricians but ignored by Mammaṭa, complete verses and not pratīkas have been quoted.

The arrangement of headings, corner-citations, etc., is an idea of Dr. N. G. Sardesai. He has rendered me great help in other ways also and I take this opportunity of expressing my sincere thanks to him.

I would be failing in my duty if I do not thank Professor R. D. Ranade, Head of the Department of Philosophy, Allahabad University, who very kindly lent to me his own copy of Chandorkar's edition where he has some marginal notes written while he was studying the book. These notes have been very useful to me at places.

Ahmedabad
October 1st, 1935

Har Dutt Sharma.

An Extract from Prof. Chandorkar's

PREFACE TO THE FIRST EDITION

The Appendix, however, contains a list alphabetically arranged, of all such *Alaṅkāras* as have been admitted by other well-known rhetoricians but are not recognised by Mammaṭa. For a full knowledge of these *Alaṅkāras*, their definitions with examples as given by their respective authors have been supplied. Explanatory notes in Sanskrit on such definitions and examples as require elucidation, kindly prepared for me by **Mr. Vāsudev Shāstri**, have been added. Lastly follows a brief criticism on each *Alaṅkāra* showing why that *Alaṅkāra* can be included under some one of Mammaṭā's *Alaṅkāras* or must be rejected as no *Alaṅkāra* at all. Nearly the whole of this work of criticism has been done by Nāgojībhaṭṭa. In a few places, however, where he is silent, especially in the case of the *Alaṅkāras* mentioned by the older rhetoricians, I have ventured to offer my own individual views. How far those views are right, I leave to the experts in this Science to determine.

In the Introduction, I have made an attempt to classify many of the *Alaṅkāras* treated in this Ullāsa on the basis of a psychological principle. I am conscious of the imperfect nature of my classification. My object in attempting it, however, is simply to point out the way, and my hope is that others will follow and make the classification thorough and exhaustive.

D. T. C.

INTRODUCTION

Alaṅkāras have been defined[1] by Mammaṭa in the eighth Ullāsa, as 'those which by beautifying a word and its sense generally serve to heighten a flavour, just as a necklace etc. by adorning the various limbs of the body serve to show a person to advanrage.' In this book, he says[2] that the *Alaṅkāra* is 'strikingness' itself. Again he says[3] here that an extraordinary mode of statement constitutes the very life of an *Alaṅkāra*. From all this, it will appear that an *Alaṅkāra* corresponds to an English Figure of Speech which has been defined as 'A deviation from the plain and ordinary mode of speaking with a view to greater effect.'

Alaṅkāras have been divided by Mammaṭa into three classes:—*Alaṅkāras* of word, *Alaṅkāras* of senses and *Alaṅkāras* of both. अनुप्रास, यमक etc. are *Alaṅkāras* of word, उपमा, रूपक etc. are *Alaṅkāras* of sense, and पुनरुक्तवदाभास etc. are *Alaṅkāras* of both.

The English Figures of Speech have been classified on the basis of the three operations of the Intellect or Understanding that they have reference to. 'Now our intellectual powers,' says Bain, 'are reducible to three simple modes of working. The first is spoken of under the names, Discrimination, or Feeling of Difference, Contrast, Relativity. It means that the mind is affected by change, as in passing from rest to motion, from cold to heat, from light to dark;

---

1. उपकुर्वन्ति तं सन्तं येऽङ्गद्वारेण जातुचित् ।
   हारादिवदलंकारास्तेऽनुप्रासोपमादयः ॥ K. P.
2. वैचित्र्यं चालंकारः । *Vide* text p. 6.
3. सर्वत्र एवंविधाविषयेऽतिशयोक्तिरेव प्राणत्वेनावतिष्ठते । *Vide* text p. 109.

and that the greater and the more sudden the change, the stronger is the effect. The figure, denominated Antithesis or Contrast, derives its force from this fact. The second power is called Similarity of the Feeling of Agreement. This signifies that when like objects come under our notice, we are impressed by the circumstance, as when we see the resemblance of a child to its parent. The Figures named Simile, Metaphor, Allegory, are modes of increasing the force of style in this way. The third power or the intellect is Retentiveness or Acquisition. The ability to retain successive impressions without confusion, and to bring them up afterwards, distinguishes mind; it is a power familiarly known by the name Memory. Now the chief way that retentiveness or memory works is this:—Impressions occurring together, become associated together, as sunrise with day-light; and when we are made to think of one, we are reminded of the accompaniments. We cannot think of the sun's rising, without remembering day-light and the other circumstances that go along with it. Hence, the mental association of things contiguously placed, is a prominent fact of mind, and one of its many consequences is that we often name a thing by some one of its adjuncts; as 'the throne' for the sovereign, 'gold' for wealth. Such is the nature of the Metonymy.'

Many of the *Alaṅkāras* treated in this Ullāsa may also be classified under these three intellectual operations as follows :—

A. Figures founded on Similarity

उपमा	उत्प्रेक्षा	निदर्शना
अनन्वय	रूपक	व्यतिरेक
उपमेयोपमा	अतिशयोक्ति I & III	सहोक्ति
प्रतीप	तुल्ययोगिता	समासोक्ति
भ्रान्तिमान्	दीपक I.	सामान्य

ससंदेह	प्रतिवस्तूपमा	मीलित
अपह्नुति	दृष्टांत	अप्रस्तुतप्रशंसा V
		सम

B. Figures founded on Contrast

विरोध	अन्योन्य	अतिशयोक्ति II & IV
विभावना	विशेष	विनोक्ति
विशेषोक्ति	व्याघात	परिसंख्या
असंगति	अधिक	उत्तर II.
विषम	अतद्गुण	

C. Figures founded on Contiguity.

सूक्ष्म, स्मरण, उत्तर I, अप्रस्तुतप्रशंसा I. II. III. & IV.

Miscellaneous.

कारणमाला, एकावली, मालादीपक, सार. These according to P. are शृंखलान्यायमूल *Alaṅkāras*,

काव्यलिंग, अर्थान्तरन्यास, अनुमान. These according to P. are तर्कन्यायमूल *Alaṅkāras*,

यथासंख्य	व्याजस्तुति	भाविक
पर्याय	पर्यायोक्त	प्रत्यनीक
परिवृत्ति	समुच्चय	उदात्त
दीपक II	समाधि	तद्गुण
परिकर	स्वभावोक्ति	संसृष्टि
आक्षेप	श्लेष	संकर

विषयानुक्रमणी

उदाहरणानुक्रमणी

।। श्रीहरिः शरणं मम ।।

अथ काव्यप्रकाशः

दशम उल्लासः

अर्थालङ्कारानाह—

साधर्म्यमुपमा भेदे,

उपमानोपमेययोरेव न तु कार्यकारणादिकयोः साधर्म्यं भवतीति तयोरेव समानेन धर्मेण सम्बन्ध उपमा। भेदग्रहणमनन्वयव्यवच्छेदाय।

नवम उल्लासे शब्दालङ्कारान् व्याख्याय ग्रन्थकृदधुनार्थालङ्कारानाह। तत्र हि प्रदीपमतेनार्थालङ्काराणामेकषष्टिः, सङ्केतमतेन तु द्वाषष्टिः। तेषु "उपमेयोपमा–अनन्वय–प्रतीप–स्मरण–रूपक–ससन्देह–भ्रान्तिमत्–अपन्हव–उत्प्रेक्षा–अतिशयोक्ति–तुल्ययोगिता–दीपक–प्रतिवस्तूपमा–दृष्टान्त–निदर्शना–व्यतिरेक–सहोक्ति–समासोक्त्याद्यनेकेषां" अलङ्काराणां "मूलभूतत्वेन सौकुमार्यातिशयाच्च प्रधानमुपमां लक्षयति" ग्रंथकृदिति प्रदीपोद्योतौ। साधर्म्यं च सधर्मणोर्भावः। "ननु साधर्म्यस्य प्रतियोग्यनुयोगिनिरूप्यतया तदनभिधाने न्यूनत्वं लक्षणवाक्यस्येति चेन्न। आक्षेपादुपमानोपमेयरूपयोस्तयोर्लाभात्। न च प्रतियोग्यनुयोगिमात्राक्षेपेऽतिप्रसङ्गः। उपमानोपमेये विनाऽन्यस्य कार्यकारणादिमात्रस्य साधर्म्याभावात्" [प्र०]। "तच्च प्रतीतयोरुपमानोपमेययोरेव न कार्यकारणादिकयोः। असम्भवात्। सत्त्वज्ञेयत्वप्रमेयत्वादिसाधर्म्यभावेऽपि तयोर्नोपमा। हृद्यत्वाभावात्" [सं०]। "एवं चोपमानोपमेययोः समानेन धर्मेण सम्बन्ध उपमेति लक्षणम्। अत्र चोपमानोपमेययोराक्षेपः साधर्म्यप्रतिपत्तिमात्रफलकः, न तु व्यावर्तकः" [प्र०]।

"उप समीपे मीयते क्षिप्यते स्वसादृश्यप्रापणादुपमेयं येन तदुपमानम्। तथा तेन यत्तु समीपे क्षिप्यते गुणद्वारेण तदुपमेयम्। हृद्यतया कविना यदुत्कृष्यते तदुपमानमन्यदुपमेयम् न तु प्रसिद्धमप्रकृतं वोपमानमन्यदुपमेयम्" [सं०]।

" नन्वेवं ' भेदे ' इत्यनुपादेयम् । तस्याप्याक्षेपादेव लाभसम्भवात् । न ह्यभेदे सादृश्यात्मकं साधर्म्यमिति चेन्न । साधर्म्यपदस्यारोपितानारोपितसाधारणसमानधर्मसम्बन्धमात्रपरत्वेन आरोपितसाधर्म्यनिबन्धनस्य अनन्वयालङ्कारस्य व्यवच्छेद्यत्वात् " [प्र०] ।

" उपमानोपमेययोर्भेदः शब्दार्थद्वारको यथोपमायामस्ति तथा समानधर्मद्वारेणाप्यभेदोऽप्यस्ति । यदाहुर्यत्र किंचित्सामान्यं कश्चिच्च विशेषः, स विषयः सदृशताया इति । तदर्थमुपमाभेदे इत्यत्र सूत्रेऽकारप्रश्लेषो ज्ञेयः । ततश्च भेदाभेदप्राधान्य उपमेति लब्धम् " [सं०] ।

" अलङ्कारत्वे सति-इत्यपि पूरणीयम् । साधर्म्यमात्रस्योपमात्वाभावात् " [प्र०] ।

" एवं काव्यप्रकाशोक्तमपि ' साधर्म्यमुपमा भेदे ' इति लक्षणं नातीव रमणीयम् । व्यतिरेके निषेधप्रतियोगिनि सादृश्येऽतिव्यापनात् । न च पर्यवसितत्वेन साधर्म्यं विशेषणीयमिति वाच्यम् । अनन्वयस्थसादृश्यस्यापर्यवसितत्वेनैव वारणे भेदविशेषणवैयर्थ्यापत्तेः " [र० गं० १६२-१६३] ॥

पूर्णा, लुप्ता च,

उपमानोपमेयसाधारणधर्मोपमाप्रतिपादकानामुपादाने पूर्णा । एकस्य द्वयोस्त्रयाणां वा लोपे लुप्ता ।

" उपमा तावत् द्विविधा; पूर्णा = साङ्गा (सकलाङ्गबोधकशब्दोपादानसहिता), लुप्ता = निरङ्गा (यत्किञ्चिदङ्गबोधकशब्दोपादानरहिता) चेत्यर्थः । " [झ०] ॥ " यत्र उपमान + उपमेय + साधारणधर्माणां उपमाप्रतिपादकशब्दस्य चोपादानं सा पूर्णा । एतच्चतुष्कमध्ये एकस्य द्वयोस्त्रयाणां वाऽनुपादानं यत्र सा लुप्ता । " [प्र०] ॥

साग्रिमा ।

श्रौत्यार्थी च भवेद्वाक्ये समासे तद्धिते तथा ॥ १ ॥

अग्रिमा पूर्णा । यथेववादिशब्दा यत्परास्तस्यैवोपमानताप्रतीतिरिति यद्यप्युपमानविशेषणान्येते, तथाऽपि शब्दशक्तिमहिम्ना श्रुत्यैव षष्ठीवत् संबन्धं प्रतिपादयन्तीति तत्सद्भावे श्रौती उपमा । तथैव, "तत्र तस्येव"-

(पा० सू० ५।१।११६/१७७९) इत्यनेनेवार्थे विहितस्य वतेरुपादाने । 'तेन तुल्यं मुखम्'—इत्यादावुपमेये एव, 'तत्तुल्यमस्य'-इत्यादौ चोपमाने एव, 'इदं च तच्च तुल्यम्' इत्युभयत्रापि तुल्यादिशब्दानां विश्रान्तिरिति साम्यपर्यालोचनया तुल्यताप्रतीतिरिति साधर्म्यस्यार्थत्वात्तुल्यादिपदोपादाने आर्थी; तद्वत्, "तेन तुल्यं क्रिया चेद्वतिः" (पा० सू० ५।१।११५/१७७८) इत्यनेन विहितस्य वतेः स्थितौ ।

"तयोः पूर्णा विभजते—साग्रिमेति ।

अग्रिमा प्रथमोद्दिष्टा । पूर्णेत्यर्थः । वाक्यं विग्रहः । तेनोपमानादिपदानि चत्वार्यपि यत्रासमस्तानि भिन्नविभक्तिकानि सा वाक्यगा । यत्र तु तेषु कयोरपि समासः सा समासगा । तद्धितेनोपमाप्रतिपादकेन तु सममुपमानवाचिन्याः प्रकृतेर्न समासो नापि विग्रह इति तृतीय उपमाभेदः । त्रिविधाप्येषा श्रौत्यार्थीभेदात्प्रत्येकं द्विधेति षड्विधा पूर्णेत्यर्थः । श्रौतत्वं चोपमानोपमेययोः साधारणधर्मसंबन्धरूपायास्तस्याः शाब्दबोधविषयत्वम् । अर्थापत्तिगम्यत्वं चार्थत्वम् । तत्र यथेववादिशब्दानां 'तत्र तस्येव' इत्यनेनेवार्थे विहितस्य वतेश्चोपादाने श्रौती । तुल्यादीनां शब्दानां 'तेन तुल्यम्—' इत्यादिना तुल्यार्थे विहितस्य वतेश्च प्रयोगे आर्थी । नन्वयं विभागोऽनुपपन्नः। उभयत्र सादृश्यप्रत्ययाविशेषात् । न च वाच्यं यथादिशब्दैः साधारणधर्मसंबन्ध उभयत्र शक्त्यैव बोध्यते न पुनस्तुल्यादिशब्दैः, अयमेव विशेष इति। यतो यथादिशब्दा यदनन्तरमुपात्तास्तस्यैवोपमानताप्रतीतिरित्युपमानविशेषणानि ते । अत उपमाने तत्संबन्धं बोधयन्तु न पुनरुपमेये । अन्यविशेषणस्यान्यत्र संबन्धबोधकत्वादर्शनादिति चेत्, न । शब्दशक्तिस्वाभाव्यादन्यविशेषणत्वेऽप्यन्यत्र संबन्धबोधकत्वात् । न चादृष्टचरत्वम् । षष्ठ्यां तथा दर्शनात् । षष्ठी हि यदनन्तरमुपात्ता तस्यवोपसर्जनत्वप्रतीतिरित्युपसर्जनविशेषणत्वेऽपि प्रधानेऽपि संबन्धं बोधयति । तस्मात्प्रतीत्यनुपपत्त्या प्रतीतानुपपत्त्या च संबन्धबोधे विशेषाच्छ्रौतार्थविभाग इति मन्तव्यम् । तथा हि 'पद्ममिव मुखम्' इत्यादावुपात्तस्याक्षिप्तस्य वा रमणीयत्वादेः संबन्धमविषयीकृत्यापर्यवसानम् । यथादिशब्दानां धर्मविशेषसंबन्ध एव

शक्तत्वात्। तुल्यादिशब्दास्तु नैवम्। 'पद्मेन तुल्यं मुखम्' इत्यादावुपमेये, 'पद्मं तुल्यं मुखस्य' इत्यादावुपमाने, 'मुखं पद्मं च तुल्यम्' इत्यादावुभयत्रापि सामान्यतस्तुल्यत्वं बोधयित्वा विश्रान्तेषु तेषु धर्मविशेषं विना कथं तुल्यतेति प्रतीतानुपपत्त्या धर्मविशेषसंबन्धप्रतीतेरिति।

केचित्तु—'उपमानोपमेयभावरूपसंबन्धस्य श्रौतार्थत्वाभ्यां विशेषः' इति व्याचक्रुस्तदयुक्तम्। 'साधर्म्यस्यार्थत्वात्तुल्यादिपदोपादाने आर्थी' इति प्रकाशविरोधात्। यस्यैव ह्यार्थतया उपमाया आर्थत्वं तस्यैव श्रौततया श्रौतत्वौचित्यात्। किं च साधर्म्यमेवोपमेति तस्यैव श्रौतत्वार्थत्वाभ्यामुपमाभेदो युक्तः। अत एव 'यथादिना सादृश्यरूपः संबन्ध एव साक्षादभिधीयते षष्ठीवत्, तुल्यादिभिस्तु धर्म्यपि' इति व्याख्यानमनुपादेयम्।

"इवेन नित्यसमासो विभक्त्यलोपः पूर्वपदप्रकृतिस्वरत्वं च" इति नित्यसमासे इवशब्दयोगे समासगा।

क्रमेणोदाहरणम्।

स्वप्नेऽपि समरेषु त्वां विजयश्रीर्न मुञ्चति।
प्रभावप्रभवं कान्तं स्वाधीनपतिका यथा॥ १॥
चकितहरिणलोललोचनायाः क्रुधि तरुणारुणतारहारिकान्ति।
सरसिजमिदमाननं च तस्याः सममिति चेतसि संमदं विधत्ते॥२॥

ननु तथाप्यनुपपन्नो विभागः। पूर्णायां द्योतकोपमानयोरेव हि समासः संभावितः। न च यथादिभिः सममसौ दृश्यते येन समासे श्रौती स्यादिति चेत्, न। 'इवेन नित्यसमासो विभक्त्यलोपः पूर्वपदप्रकृतिस्वरत्वं च' इत्यनेनेवशब्देन समं समासविभक्त्यलोपयोः संभवात्। विभक्त्यलोपदर्शनाच्च तत्रासमासव्यवहारो मूढानाम्। तत्र वाक्ये श्रौती यथा—स्वप्नेऽपीति।"[प्र०]

"हे राजन्, स्वाधीनपतिका आज्ञाकारी पतिर्यस्यास्तादृशी नायिका यथा प्रभावप्रभवं प्रभावस्य प्रकृष्टानुरागस्य प्रभवमुत्पत्तिहेतुं कान्तं कमनीयं नायकं न मुञ्चति तथा विजयश्रीः जयलक्ष्मीः प्रभावप्रभवं प्रभावस्य प्रभुत्वस्य प्रभवमुत्पत्तिहेतुं त्वां समरेषु संग्रामेषु (नत्वेकस्मिन् समरे) स्वप्नेऽपि स्वप्ना-

वस्थायामपि न मुञ्चतीत्यर्थः " [भ०] "वैरिभिः स्वप्नेऽपि तव विजयानुभवादित्यर्थः " [उ०] ।

" अत्र विजयश्रीरुपमेया । स्वाधीनपतिका उपमानम् । न मुञ्चतीति साधारणो धर्मः । यथेत्युपमाप्रतिपादकं विवक्षितम् । एवमग्रेऽप्यूह्यम् । न चैतेषां कयोरपि समास इति वाक्यगा श्रौती । वाक्यगा आर्थी यथा—चकितेति " [प्र०]

" चकितस्त्रस्तः । एवंभूतायास्तस्याः प्रक्रान्तनायिकायाः क्रुधि क्रोधे सति तरुणारुणवत्तारा उद्भटा हारिणी मनोहरणशीला कान्तिर्यस्य एवंभूतमिदमाननं सरसिजं च सममिति संमदं हर्षं नायकचेतसि विधत्ते। इति सखीं प्रति सखीसौभाग्यं कयापि निवेद्यते" [चं०]। "इयं समशब्दप्रयोगादार्थी" [प्र०]।

अत्यायतैर्नियमकारिभिरुद्धतानां
दिव्यैः प्रभाभिरनपायमयैरुपायैः।
शौरिर्भुजैरिव चतुर्भिरदः सदा यो
लक्ष्मीविलासभवनैर्भुवनं बभार ॥ ३ ॥
अवितथमनोरथपथप्रथनेषु प्रगुणगरिमगीतश्रीः ।
सुरतरुसदृशः स भवानभिलषणीयः क्षितीश्वर न कस्य ॥ ४॥
गाम्भीर्यगरिमा तस्य सत्यं गङ्गाभुजङ्गवत् ।
दुरालोकः स समरे निदाघाम्बररत्नवत् ॥ ५ ॥

समासे श्रौती यथा—अत्यायतैरिति ।

" यो राजा चतुर्भिरुपायैः सामादिभिरदः एतद्भुवनं बभार पालयामासेत्यन्वयः । शौरिः श्रीकृष्णः । भुजैरित्यत्रापि चतुर्भिरिति योज्यम् । कीदृशैः अत्यायतैर्दूरदृष्ट्या प्रयोजितैः आजानुलम्बिभिश्च । दिव्यैः श्रेष्ठैर्दिवि भवश्च प्रभाभिरुपलक्षितैः । अनपायमयैरपायशून्यैः । लक्ष्मीविलासस्थानत्वमुपायानां तत्प्रयोजकत्वाद्बोध्यम् " [चं०]

" इवेन समासपक्षे समासे श्रौती पूर्णोपमेयम् । ये त्विवेन समासं नेच्छन्ति तन्मते वाक्योपमेयम् " [सं०] ।

समासे आर्थी यथा—अवितथेति

" हे क्षितीश्वर अवितथाः सफलाः ये मनोरथपथाः मनोरथमार्गाः तेषां प्रथनेषु विस्तारणेषु । इयं विषयसप्तमी । प्रगुणगरिमगीतश्रीः प्रकृष्टगुणानां गरिम्णा अतिगुरुत्वेन हेतुना गीता स्तुता श्रीर्यस्य तथाभूतः। अत एव सुरतरुसदृशः कल्पवृक्षतुल्यः स प्रसिद्धो भवान् कस्य पुरुषस्य न अभिलषणीयः न स्पृहणीयः अपि तु सर्वस्याप्यभिलषणीय इत्यर्थः " [प्र०] ।

अत्र सुरतरुसदृश इत्युपमानद्योतकयोः समासः । तद्धिते श्रौत्यार्थी च यथा –गाम्भीर्येति ।

तस्य राज्ञः गङ्गाभुजङ्गवत् । गङ्गायाः भुजङ्ग उपपतिः समुद्रः । शन्तनोरेव पतित्वात् । समुद्रस्येवेत्यर्थः । गाम्भीर्यं दुर्ज्ञेयान्तःकरणत्वम्, अतलस्पर्शित्वं च । तस्य गरिमा गुरुत्वम् । स राजा समरे युद्धे निदाघे ग्रीष्मकाले यदम्बररत्नं सूर्यस्तेन तुल्यम् , तद्वत् । दुरालोकः दुःखेनालोकयितुं शक्यः ।

" अत्र गङ्गाभुजंगवदिति श्रौती । ' तत्र तस्येव ' इत्यनेन इवार्थे वतेर्विधानात् । निदाघाम्बररत्नवदित्यार्थी । ' तेन तुल्यम्–' इत्यर्थे वतेः प्रयोगात् " [प्र०] ।

स्वाधीनपतिका कान्तं भजमाना यथा लोकोत्तरचमत्कारभूः तथा जयश्रीस्त्वदासेवनेनेत्यादिना प्रतीयमानेन विना यद्यपि नोक्तेर्वैचित्र्यम्, वैचित्र्यं चालंकारः, तथाऽपि न ध्वनिगुणीभूतव्यङ्ग्यव्यवहारः, न खलु व्यङ्ग्यसंस्पर्शपरामर्शादत्र चारुताप्रतीतिः अपि तु वाच्यवैचित्र्यप्रतिभासादेव । रसादिस्तु व्यङ्ग्योऽर्थोऽलंकारान्तरं च सर्वत्राव्यभिचारीत्यगणयित्वैव तदलंकारा उदाहृताः । तद्रहितत्वेन तु उदाह्रियमाणा विरसतामावहन्तीति पूर्वापरविरुद्धाभिधानमिति न चोदनीयम् ।

" स्वाधीनेति । अयं भावः—प्रतीयमानं चेद् व्यक्तं तदा ध्वनिव्यवहारः । अथास्फुटं तदा गुणीभूतव्यङ्ग्यव्यवहारः । तत्कथमत्र वाच्यचित्रकाव्यव्यवहारः " [सं०]

" ननु चित्रभेदा अलंकारनिर्णये निर्णेष्यन्ते इति पूर्वमवादीः, इदानीं ' स्वप्नेऽपि ' इत्युदाहरसि, न तच्चित्रं भवितुमर्हति । अत्र हि स्वाधीनभर्तृका कान्तं भजमाना यथा चमत्कारभूस्तथा जयश्रीस्त्वदासेवनेनेत्यादि वस्तुरूपं

व्यङ्ग्यं विना नोक्तेर्वैचित्र्यम्। वैचित्र्यं चालंकारत्वनिष्पत्तय इति व्यङ्ग्यमवश्यापेक्षणीयम्। अतस्तस्य प्राधान्ये ध्वनित्वम्। अप्राधान्ये गुणीभूतव्यङ्ग्यत्वम्। तस्मात्पूर्वापरविरुद्धाभिधानमिति चेत्, मैवं वादीः। न खलु व्यङ्ग्यपरामर्शादेवात्र चारुताप्रतीतिः, अपि तु वाच्योपमामात्रपरामर्शादेव। चारुत्वहेतुश्चालंकारः। अवर्जनीयसंनिधेश्च व्यङ्ग्यस्यास्फुटतरतया न ध्वनिगुणीभूतव्यङ्ग्यव्यवहारप्रवर्तकतेति न कश्चिद्दोषः। नन्वेवमप्युदाहृते रसादिरूपव्यङ्ग्यसद्भावाच्चित्रतानुपपत्तिः। किं चानुप्रासाद्यलंकारान्तरसद्भावात्संकरालंकारोदाहरणान्येतानि युक्तानि, न तु शुद्धाया उपमाया इति चेत्, न। रसादिरूपव्यङ्ग्योऽलंकारान्तरं चैतेष्वव्यभिचारीति तत्रौदासीन्यमालम्ब्योपमालंकारोऽयमीदृश इत्यभिप्रायेणालंकारमात्रमुदाहृतं न तु चित्रकाव्यम्। अथ 'चन्द्रधवलः पटः' इत्यादिको रसालंकाराभ्यामसंभिन्न एव विषयः किमिति नोदाह्रियत इति चेत्, तद्रहितत्वेनोदाहरणे वैरस्यप्रसङ्गात्। तादृशवाक्यस्याकाव्यत्वेन तस्या अप्यनुपमात्वात्" [प्र०]।

उक्तं चाभिनवगुप्तपादाचार्येणापि—उपमया यद्यपि वाच्योऽर्थोऽलंक्रियते तथापि तस्य तदेवालङ्करणं यद्व्यङ्ग्यार्थाभिव्यञ्जनसामर्थ्याधानमिति। वस्तुतो ध्वन्यात्मैवालङ्कार्यः। कटककेयूरादिभिरपि हि शरीरसमवायिभिश्चेतन आत्मैव तत्तच्चित्तवृत्तिविशेषौचित्यसूचनात्मतयालंक्रियते। तथा ह्यचेतनं शवशरीरं कुण्डलाद्युपेतमपि न भाति। अलङ्कार्यस्याभावात्। (लो.पृ.७४-७५)

तद्वद्धर्मस्य लोपे स्यान्न श्रौती तद्धिते पुनः।

धर्मः साधारणः। तद्धिते कल्पबादौ त्वार्थ्येव। तेन पञ्च।

उदाहरणम्—

धन्यस्यानन्यसामान्यसौजन्योत्कर्षशालिनः।
करणीयं वचश्चेतः सत्यं तस्यामृतं यथा ॥ ६ ॥
आकृष्टकरवालोऽसौ संपराये परिभ्रमन्।
प्रत्यर्थिसेनया दृष्टः कृतान्तेन समः प्रभुः ॥ ७ ॥
करवाल इवाचारस्तस्य वागमृतोपमा।
विषकल्पं मनो वेत्सि यदि जीवसि तत्सखे ॥ ८ ॥

" अथ लुप्ता विभजनीया । सा च सप्तधा । तत्रैकस्य लोपे त्रिधा । उपमानस्य साधारणधर्मस्य द्योतकस्य च लोपात् । उपमेयमात्रस्य लोपादर्शनात् । द्विलोपेऽपि त्रिधा । धर्मवाद्योर्धर्मोपमानयोर्वाद्युपमेययोश्च लोपात् । अन्यस्य द्विकस्य लोपासंभवात् । त्रिलोपे त्वियमेका । उपमेयं विनान्येषामेकैकमात्रसत्वे उपमाया असंभवादिति दर्शयन्नेव यथासंभवं तासां सप्तविधानामपि विभागमाह—तद्वदिति ।

"धर्मस्य साधारणस्य । तद्वत्समासे वाक्ये तद्धिते च श्रौती आर्थी चेत्यर्थः । तत्र विशेषमाह–' न श्रौती तद्धित–' इति । इवार्थ एव हि तद्धिते सा श्रौती भवेत् । इवार्थश्च वतिरेव । स च ' तत्र तस्येव ' इत्यर्थकतया नित्यं धर्मसाकाङ्क्ष इति धर्मानुपादाने श्रौती तद्धिते न भवत्येव । आर्थी तु यद्यपि वतिरूपे तद्धिते न संभवति ' तेन तुल्यम्—' इत्यर्थे उक्तन्यायेन नित्यं तुल्यक्रियाकाङ्क्षत्वेन धर्मलोपे तदसंभवात् । तथापि कल्पप्-देश्य-देशीयर्-बहुच्-रूपे संभवत्येवेति पञ्चधा धर्मलोपोपमेत्यर्थः । तत्र वाक्ये श्रौती यथा—धन्यस्येति " [प्र०] ।

" हे चेतः अमृतं यथा (परिणामसुरसं सन्तोषजनकं वा) तस्य साधोः वचः वाक्यं सत्यं निश्चयेन करणीयं कर्तुं योग्यमित्यर्थः । कीदृशस्य तस्य । अनन्यसामान्यं अनन्यसाधारणं यत् सौजन्यं तस्योत्कर्षेण आधिक्येन शालते शोभते इति तच्छाली तस्य । अत एव धन्यस्य सर्वोत्कृष्टस्येत्यर्थः " [झ०] ।

" अत्रामृतवचसोः परिणामसुरसत्वादिसाधर्म्यं, तच्च नोपात्तम् । आक्षेपात्तु लब्धस्य संबन्धो यथाशब्देन तद्बोधं विनाऽपर्याप्तेन श्रुत्यैव बोध्यत इति धर्मलोपे श्रौतीयम् । एवमग्रेऽप्यूह्यम् वाक्ये आर्थी यथा—आकृष्टेति " [प्र०] ।

आकृष्टकरवालः आकृष्टखड्गः असौ प्रभुः संपराये युद्धे परिभ्रमन् प्रत्यर्थिसेनया शत्रुसेनया, कृतान्तेन समः यमेन तुल्यः दृष्टः । " अत्र क्रूरत्वादिकं यमसाधर्म्यं न त्वाकृष्टेत्यादि । तस्य दण्डायुधत्वेनैव प्रसिद्धेरिति " [चं०] ।

अन्यत्रयं यथा—करवाल इवेति ।

" आचार आचरणम् । विषकल्पं विषादीषन्न्यूनम् । तत्सदृशमित्यर्थः । ईषदसमाप्तौ कल्पप् प्रत्ययः । यदि जीवसि तत्तदा वेत्सि । तत्समीपावस्थाने तवजीवनमेव दुर्लभमिति भावः " [चं०] ।

" अत्र करवाल इवेति समासे श्रौती। अमृतोपमेति समासे आर्थी। विषकल्पमिति तद्धितगा आर्थी " [प्र०]।

उपमानानुपादाने वाक्यगाथ समासगा ॥ २ ॥

सअलकरणपरवीसामसिरिविअरणं ण सरसकव्वस्स।
दीसइ अहव णिसम्मइ सरिसं अंसंसमेत्तेण ॥९॥
[सकलकरणपरविश्रामश्रीवितरणं न सरसकाव्यस्य।
दृश्यतेऽथवा निशम्यते सदृशमंशांशमात्रेण।]

कव्वस्सेत्यत्र कव्वसममिति, सरिसमित्यत्र च णूणमिति पाठे एषैव समासगा॥

वादेर्लोपे समासे सा कर्माधारक्यचि क्यङि।
कर्मकर्त्रोर्णमुलि,

वाशब्दः उपमाद्योतक इति वादेरुपमाप्रतिपादकस्य लोपे षट्,—समासेन, कर्मणोऽधिकरणाच्चोत्पन्नेन क्यचा, कर्तुः क्यङा. कर्मकर्त्रोरुपपदयोर्णमुला च भवेत्।

" अत्र तद्धितगा न संभवति। उपमाप्रतिपादकस्य तद्धितस्य वतिकल्पबादेरुपमानादेव विधानेन उपमानानुपादानेऽसंभवात्। न वा श्रौती। इवादीनामुपमानमात्रान्विततया तदनुपादाने तेषामप्यनुपादानात्। अतो वाक्यसमासयोरेव। तयोरप्यार्थ्येवेति द्विप्रकारा लुप्तोपमानोपमा। तत्र वाक्यगा यथा—सअलेति।

"अत्र विशेषत उपमानं नोपात्तम्। चिन्त्यमेतत्। इदमेव ' कव्वस्स ' इत्यत्र ' कव्वसमम्, ' ' सरिसं ' इत्यत्र ' णूणं ' इति पाठे समासगोदाहरणम् " [प्र०]।

" स अलेति। अपिरत्र गम्यः। करणं चक्षुरादि। परविश्रामो विषयांतरवैमुख्यम्। तज्जन्यशोभादात्रीत्यर्थः। (आर्या मुखविपुला।) अत्र विशेषत इति। अत्रास्मद्दर्शनश्रवणाविषयत्वेन दुर्लभतयोत्कृष्टगुणं अस्मद्गोचरं किंचिदुपमानं भविष्यतीति सादृश्यपर्यवसानादुपमानलुप्तोपमैवेयम्। एतेनासमालंकारोयमुपमातिरिक्त इति रत्नाकराद्युक्त-

मपास्तम् । अत एवोपमानानुपादान इत्युक्तम् न त्वसत्व इति । वस्त्वंतरस्य विशिष्यानुपादानमात्रेणोपमानलोपव्यवहारः । एतेनाऽनन्वयोऽत्रेत्यप्यपास्तम् । अनन्वये उपमानासत्वस्यैव विवक्षितत्वात् । चित्यमेतदिति । तद्बीजं तु काव्यमेवात्रोपमानम् । चंद्रस्य सदृशं मुखमित्यादौ चंद्रस्यैवोपमानतावगमात् । एवं चोपमेयलोप इति वक्तुमुचितमिति । उद्धारस्तु काव्यस्य सममित्यस्य काव्यनिष्ठसादृश्यप्रतियोगीत्यर्थः । काव्यस्य वर्णनीयतयोत्कर्षायोपमेयस्य विवक्षितत्वादित्याहुः " [उ०]

" द्योतकलोपे वाक्यगा तावन्न संभवति । ' मुखं चन्द्रो रमणीयम् ' एतावन्मात्रेणोपमाप्रत्ययाभावात् । नापि तद्धितगा । वतेः कल्पबादीनां च द्योतकतया तत्प्रयोगे द्योतकलोपस्यैवासंभवात् । न वा श्रौतीत्यन्यथा विभजते वादेरिति ।

" वाशब्द उपमाद्योतक इति वादेरुपमाद्योतकस्येत्यर्थः । तस्य लोपे समासे क्यचि क्यङि णमुलि चोपमा । तत्र क्यचि द्विधा । कर्मणोऽधिकरणाच्च विधानेन तस्य द्वैविध्यात् । क्यङि त्वेकैव । कर्तुरेव तद्विधानात् । णमुल्यपि द्विधा । कर्मकर्त्रोस्तद्विधानात् । तत्र समासे द्विधा । द्वयोस्त्रयाणामपि वा उपमानादिपदानां समासात् । तयोराद्या यथा—तत इति । " [प्र०] ।

उदाहरणम्—

ततः कुमुदनाथेन कामिनीगण्डपाण्डुना ।
नेत्रानन्देन चन्द्रेण माहेन्द्री दिगलंकृता ॥ १० ॥

तथा—

असितभुजगभीषणासिपत्रो रुहरुहिकाहितचित्रतूर्णचारः ।
पुलकिततनुरुत्कपोलकान्तिः प्रतिभटविक्रमदर्शनेऽयमासीत् ॥ ११ ॥

पौरं सुतीयति जनं समरान्तरेऽसा-
वन्तःपुरीयति विचित्रचरित्रचुञ्चुः ।
नारीयते समरसीम्नि कृपाणपाणे-
रालोक्य तस्य चरितानि सपत्नसेना ॥ १२ ॥

मृधे निदाघघर्मांशुदर्शं पश्यन्ति तं परे ।
स पुनः पार्थसंचारं संचरत्यवनीपतिः ॥ १३ ॥

महाभारते द्रोणपर्वणि रात्रियुद्धे १८४ अध्याये चन्द्रोदयवर्णनमिदम्। कुमुदानां नाथेन। कामिन्याः गण्ड इव पाण्डुः तेन। "उपमानानि सामान्यवचनैः" [पा. सू. २।१।५५ / ७३४] नेत्रयोरानन्दजनकेन चन्द्रेण माहेन्द्री दिक् प्राची अलंकृता।

"अत्र गण्डपाण्डुनेति द्वयोः समासः। द्वितीया यथा-असितेति" [प्र०]

अयं राजा प्रतिभटविक्रमदर्शने शत्रुपराक्रमदर्शने। असितभुजगः कृष्णसर्पः। तद्भीषणः असिरेव पत्रं असिपत्रं यस्य सः। रुहरुहिकया रभसोत्कण्ठया आहितश्चित्र आश्चर्यभूतस्तूर्णस्त्वरितश्चारो गमनं यस्य सः। पुलकिता तनुर्यस्य। उद्गता कपोलयोः कान्तिः शोभा यस्य। आसीत्।

"अत्रासितभुजगेत्यादावुपमानधर्मोपमेयशब्दानां त्रयाणामपि समासः।

क्यच्क्यङ्णमुल्भेदत्रयं यथा— पौरमिति" [प्र०]

"असौ नृपः पौरं जनं सुतमिवाचरति। 'उपमानादाचारे' [पा० सू० ३।१।१० / २६६४] इति कर्मभूतादुपमानात्क्यच्। समरस्यान्तरे मध्ये अन्तःपुरीयति अन्तःपुरे इवाचरति। अत्र 'अधिकरणाच्च' इत्यनेन क्यच्। विचित्रेत्यादि। विचित्रेण चरित्रेण वित्त इत्यर्थः। 'तेन वित्तश्चुञ्चुप्चणपौ' [पा०सू० ५।२।२६ / १८२७] इत्यनुशासनात्। नारीयते इति नारीवाचरतीत्यर्थः। 'कर्तुः क्यङ् सलोपश्च' [पा० सू० ३।१।११ / २६६५] इत्यनेनक्यङ्" [चं०] "यत्तु सुतपदस्य सुतसादृश्यलक्षकत्वेऽपि सादृश्यवाचकाभावात् वाचकलुप्तेति तन्न। चंद्रप्रतिपक्षमाननमित्यादावपि वाचकलुप्तापत्तेः" [उ०]। णमुलि भेदद्वयं यथा-मृधे इति—परे शत्रवः तं राजानं मृधे युद्धे निदाघघर्मांशुं ग्रीष्मकालसूर्यं इव पश्यन्ति। 'उपमाने कर्मणि च' [पा० सू० ३।४।४५ / ३३६६] इति कर्मण्युपपदे णमुल् स अवनीपतिः पुनः पार्थसंचारं चरति। पार्थ इव संचरतीत्यर्थः। सूत्रस्थचकारात् अत्र कर्तरि णमुल्।

एतद्द्विलोपे क्विप्समासगा ॥ ३ ॥

एतयोर्धर्मवाद्योः। उदाहरणम्,—

सविता विधवति विधुरपि सवितरति तथा दिनन्ति यामिन्यः।
यामिनयन्ति दिनानि च सुखदुःखवशीकृते मनसि ॥ १४ ॥

परिपन्थिमनोराज्यशतैरपि दुराक्रमः ।
संपरायप्रवृत्तोऽसौ राजते राजकुञ्जरः ॥ १५ ॥

"अथ क्विलोपे विभजनीया । तत्र धर्मवाद्योर्लोपे वाक्यगा न संभवति । शिष्टयोर्मुखं चन्द्र इत्येतावन्मात्रयोरुपादाने उपमाऽनवगमात् । नापि तद्धितगा । तद्धितस्यापि कल्पबादित्वेन तत्सत्त्वे क्विलोपाभावात् । नापि श्रौती । इवाद्यभावादित्यन्यथा विभजते—एतदिति" [प्र०] ।

क्विगा यथा—सवितेति । मनसि सुखदुःखाभ्यां वशीकृते सति सविता सूर्यः विधुश्चन्द्रमा इवाचरति । विधुः सवितेवाचरति । दिनानि यामिनयन्ति यामिन्य इवाचरन्ति । यामिन्यः रात्रयः दिनन्ति दिनानीवाचरन्ति । "सुखिते मनसि सूर्यश्चन्द्रसदृशः, आह्लादकत्वात् । दुःखिते चन्द्रः सूर्यसदृशः, दुःखदत्वात्" [उ०] । 'सर्वप्रातिपदिकेभ्यः क्विब्वा वक्तव्यः'- [वा. १७२२/२६६५] इति वार्तिकेन आचारार्थे क्विप् ।

"यद्यप्याचारे क्विब्विधानात्तस्यैव च समानधर्मरूपत्वेन क्विपि धर्मलोपो नास्ति तथापि क्विप एव लोपाद्धर्मलोपव्यवहारः । अत एव समानार्थत्वेऽपि क्यङत्र नोपात्तः । तस्यालुप्तत्वेन धर्मलोपाभावात् । समासगा यथा—परिपन्थीति" [प्र०] ।

सम्पराये युद्धे प्रवृत्तोऽसौ परिपन्थिनां शत्रूणां मनोराज्यं मनोरथः तस्य शतैरपि दुराक्रमः दुष्प्रापः राजकुञ्जरः राजा कुञ्जरः हस्ती इव राजते शोभते । 'उपमितं व्याघ्रादिभिः सामान्याप्रयोगे' (पा. सू. २।१।५६/१३५) इत्युपमितसमासः । अत्र राजायं कुञ्जर इवेत्युपमा ।

धर्मोपमानयोर्लोपे वृत्तौ वाक्ये च दृश्यते ॥

धर्मेति । साधारणधर्मस्य उपमानस्य च लोपे वृत्तौ समासे वाक्ये च उपमा दृश्यते । "तद्धिते तु नेयम् । उपमानलोपे तद्धितस्यैवाभावात् । नापि श्रौती । उपमानाप्रयोगे इवादेरप्रयोगात्" [प्र०] । अतो धर्मोपमानयोर्लोपे द्विविधैव, साप्यार्थ्येव ।

दुण्ढुण्णन्त मरीहसि कण्टअकलिआइं केअइवणाइं ।
मालइकुसुमसरिच्छं भमर भमन्तो ण पावहिसि ॥ १६ ॥

[" दुढुंलायमानो मरिष्यसि कण्टककलितानि केतकीवनानि ।
मालतीकुसुमसदृशं भ्रमर भ्रमन्न प्राप्स्यसि ॥ "]

कुसुमेण सममिति पाठे वाक्यगा ।

तत्र समासगा यथा–ढुण्ढुण्णन्त इति । हे भ्रमर भ्रमणशील दुष्ट विट चुम्बितानि शंभलीकुलानि (कुट्टिनीकुलानि) गवेषयन् विपद्यसे न कदापि मालतीसुकुमारसुभगां नारीं प्राप्स्यसीति भावः । तेन तुल्यमित्यादौ तुल्यादिपदानामुपमेय एव विश्रान्तिरिति यद्यप्युक्तं तथाऽपि सदृशशब्दवाच्यगुणत्वेन बलादुपमानत्वं नोपमेयत्वमित्युपमानस्यैव लोपः " [सं०] ।

" यत्तु 'नेयमुपमानलुप्तोपमा, तस्याः संभवदुपमानानुपादानविषयत्वात् । अपि त्वसमालङ्कारः ' इति रत्नाकरेणोक्तं तदसत् । मालतीकुसुमसदृशं भ्रमर भ्रमन्न प्राप्स्यसीत्युक्त्या वर्ततां नाम तत्सदृशं क्वापि, त्वया तु दुष्प्रापमेवेति प्रत्यया दात्यन्तिकोपमाननिषेधाभावादुपमानलुप्तोपमैवेयं भवितुमर्हति न त्वसमालंकारः । अन्यथा मालतीकुसुमसदृशं नास्तीत्येव ब्रूयात् , न तु प्राप्स्यसीति" [र० गं० २११] । " कुसुमसरिच्छमित्यत्र 'कुसुमेणसमं' इति पाठे इयमेव वाक्यगा " [प्र०]

क्यचि वाद्युपमेयासे

आसे निरासे ।

अरातिविक्रमालोकविकस्वरविलोचनः ।
कृपाणोदग्रदोर्दण्डः स सहस्रायुधीयति ॥ १७ ॥

अत्रात्मा उपमेयः ।

वाद्युपमेययोरासे निरासे लोपे इत्यर्थः । एकविधैव, सा च क्यचि । यथा– अरातीति । " वैरिविक्रमालोकनेन विकासशालिनेत्रः कृपाणेन उदग्र उद्भटो दोर्दण्डो यस्य तादृशो नृपः स सहस्रमायुधानि यस्य तमिवात्मानमाचरति । यथा तं दुर्जयं मन्यते तथात्मानमपीत्यर्थः " [चं०] ।

अत्र सहस्रायुधीयतीत्यत्र ' उपमानादाचारे ' (पा. सू. ३।१।१० / २६६४) इति कर्मण आचरार्थे क्यच् ।

" अत्र यद्यपि विशेषणद्वारोपात्तः कर्तैवोपमेयस्तथापि न तथात्वेन, किं तु कर्मत्वेन । अन्यथा क्यचोऽसंगतत्वापत्तेः । तथा चात्मानं सहस्रायुधीयतीत्यर्थः ।

इत्युपमेय आत्मा लुप्त इति यथोक्तोदाहरणमेतत् । हंसायते इत्यादौ कर्त्रैवोपमेयः । तस्य चानुपादाने वाक्यमेव न पर्याप्यत इति विशेषात् क्यङि नेयं संभवति । यद्यपि द्विलोपेऽन्यदपि भेदत्रयं संभवति, यथा उपमानोपमेययोः, उपमानवाद्योः, उपमानधर्मयोरिति तथापि तेषूपमायाः प्रसङ्ग एव नास्तीति न न्यूनत्वमाशङ्कनीयम् " [प्र०] ।

त्रिलोपे च समासगा ॥ ४ ॥

त्रयाणां वादिधर्मोपमानानाम् । उदाहरणम्,—

तरुणिमनि कृतावलोकना ललितविलासविलब्धविग्रहा ।
स्मरशरविसराचितान्तरा मृगनयना हरते मुनेर्मनः ॥ १८ ॥

अत्र सप्तम्युपमानेत्यादिना यदा समासलोपौ भवतः, तदेदमुदाहरणम् । क्रूरस्याचारस्यायःशूलतयाऽध्यवसायात्, अयःशूलेनान्विच्छति 'आयःशूलिकः'–इत्यतिशयोक्तिर्न तु क्रूराचारोपमेय–तैक्ष्ण्यधर्म–वादीनां लोपे त्रिलोपेयमुपमा । एवमेकोनविंशतिर्लुप्ताः पूर्णाभिः सह पञ्चविंशतिः ।

" त्रिलोपे तूपमेयातिरिक्तत्रितयलोप एव संभवतीत्युक्तम् । सापि समासमात्रे । अन्यत्र बोधकाभावात् । तत्राप्यर्थैव इवादेर्लोपात्, इत्येकविधैवेत्याह—त्रिलोप इति । यथा तरुणिमनीति " [प्र०] ।

तरुणिमनि तारुण्ये विषये कृतमवलोकनं यया सा । ललितेभ्यः सुन्दरेभ्यो विलासेभ्यो विलब्धो दत्तो विग्रहो यया सा । स्मरस्य कामस्य शराणां विसरः समूहः । तेन आचितं व्याप्तमान्तरं मनो यस्याः सा । मृगनयने इव नयने यस्याः सा । मुनेर्मनः हरते ।

" अत्र यदि मृगशब्देन लक्षणया तल्लोचने विवक्ष्येते तदा नेदमुदाहरणम् । यदा तु मृगलोचने इव नयने यस्या इत्यर्थो विवक्ष्यते तदा 'सप्तम्युपमानपूर्वपदस्य बहुव्रीहिरुत्तरपदलोपश्च' इत्यनेन मृगलोचनेत्युपमानपूर्वपदस्य नयनशब्देन बहुव्रीहावुपमानवाचिनि मृगलोचने इति पूर्वपदे उत्तरपदभूतस्य लोचनशब्दस्य लोपे उपमेयभूतस्य नयनमात्रस्योपादानादिदमुदाहरणम् " [प्र०] ।

अधुना भट्टेन्दुराजादिभिः उद्भटविरचितकाव्यालङ्कारसारसङ्ग्रहटीकायां समुत्थापितं मतं ग्रन्थकृत्परामृशति—

" केचित्तु " उपमानमात्रोपादानेऽपि त्रिलोपा संभवति । यथा ' अयमायः-शूलिकः ' इति । अत्रायःशूलपदेन क्रूर आचार उपमेयः । तीक्ष्णत्वादिकं च साधारणो धर्मः । न च तयोरेकमप्युपात्तम् । नापीवादिः " इति मन्यन्ते । तन्न युक्तम् । यतः क्रूरस्याचारस्यायःशूलतयाध्यवसानादतिशयोक्तिरियं न तूपमा अन्यथाऽध्यवसानमूलातिशयोक्तेर्निर्विषयत्वापत्तेः " [प्र०] ।

" निर्विषयत्वापत्तेरिति । कमलमनंभसीत्यादावपि कमलादिपदैः स्वार्थ-सदृशमुखादेर्लक्षणादेतद्भेदापत्तेरिति भावः " [उ०]

" तदेवं धर्मलोपे पञ्च । उपमानलोपे द्वौ । द्योतकलोपे षट् । धर्मवाद्योर्लोपे द्वौ । धर्मोपमानयोर्लोपे द्वौ । द्योतकोपमेयलोपे चैकः । त्रिलोपे त्वेकः । इत्यू-नविंशतिर्लुप्ताभेदाः । पूर्णाभेदाश्च षट् । इत्येवं पञ्चविंशतिः ।

" नन्वन्येऽप्युपमाभेदाः संभवन्ति । तथाहि–एकस्यैवोपमेयस्य बहूपमान-संबन्धो मालोपमा । सा च द्विधा–साधर्म्यस्याभेदात्तद्भेदाच्च । तत्राद्या यथा–" [प्र०]

" अनयेनेव राज्यश्रीर्दैन्येनेव मनस्विता ।
म्म्लौ सा च विषादेन पद्मिनीव हिमाम्भसा ॥ १९ ॥

इहाभिन्ने साधारणे धर्मे,

ज्योत्स्नेव नयनानन्दः सुरेव मदकारणम् ।
प्रभुतेव समाकृष्टसर्वलोका नितम्बिनी ॥ २० ॥

इति भिन्ने च तस्मिन्, एकस्यैव बहूपमानोपादाने मालोपमा । यथो-त्तरमुपमेयस्योपमानत्वे पूर्ववदभिन्नभिन्नधर्मत्वे,

अनवरतकनकवितरणजललवभृतकरतरङ्गितार्थिततेः ।
भणितिरिव मतिर्मतिरिव चेष्टा चेष्टेव कीर्तिरतिविमला ॥ २१ ॥
मतिरिव मूर्तिर्मधुरा मूर्तिरिव सभा प्रभावचिता ।
तस्य सभेव जयश्रीः शक्या जेतुं नृपस्य न परेषाम् ॥ २२ ॥

इत्यादिका रशनोपमा च " न लक्षिता । एवंविधवैचित्र्यसहस्रसम्भ-वात् । उक्तभेदानतिक्रमाच्च ।

" अनयेनेवेति ।

" अत्र म्लानिरेव सर्वोपमानसाधर्म्यम् । अन्त्या यथा—ज्योत्स्नेवेति ।

" अत्र ज्योत्स्नादीनां नयनानन्दहेतुत्वादयः साधारणधर्मा भिन्नाः ।

" पूर्वपूर्वोपमेयस्योत्तरोत्तरमुपमानत्वे रशनोपमा । सापि द्विधा–साधर्म्याभेदात्तद्भेदाच्च । तत्राद्या यथा —अनवरतेति " [प्र०] ।

" हे राजन्, अनवरतं कनकस्य वितरणेन ये जललवास्तैर्भृते पूर्णे करे तरङ्गिता तरङ्गवत् श्रेणीभूय पूर्वपश्चाद्भावेन सन्ततमिलिता अर्थिनां ततिः पङ्क्तिर्यस्य तादृशस्य तव मत्यादिर्भणित्यादिवत् अतिविमलेति पूर्वपूर्वस्योत्तरोत्तरमुपमानत्वाद्रशनोपमा । भणितिरुक्तिः । सर्वत्र विमलत्वमेकं साधर्म्यम् " [चं०] ॥

" अत्र विमलत्वमेव सर्वासूपमासु साधारणो धर्मः । अन्या यथा—मतिरिवेति ।

" अत्र मूर्त्यादीनां मधुरत्वादयो धर्मा भेदवन्तः । त एते भेदाः किमिति नोक्ता इति चेत्, उक्ता एव । उक्तभेदान्तर्भावात् । तथापि तेन तेन रूपेण किं नोक्ता इति चेत्, एवंविधवैचित्र्यसहस्रसंभवात्सर्वेषामाख्यातुमशक्यत्वात् " [प्र०] ।

उक्तं च सङ्केते—" एवंविधेति भणनादेकदेशविवर्तिन्युपमा । यथा—

नेत्रैरिवोत्पलैः पद्मैर्मुखैरिव सरःश्रियः ।
पदे पदे विभान्तिस्म चक्रवाकैः स्तनैरिव ॥

अत्र सरःश्रीणां नायिकात्वं न समासोक्त्या । विशेषणसाम्याभावात् । तस्मादुपमैकदेशविवर्तिनी वाच्यैव । यथान्यैरुक्ता । " उद्भटेन त्विदमुदाहरणं सम्पूर्णाया वाक्योपमायाः श्रौतीभेदे दत्तम् । साहित्यदर्पणकारश्चेदमेकदेशविवर्तिन्या उपमाया उदाहरणमाह । अन्यैरपि भोजहेमचन्द्रजगन्नाथाद्यैरियमुपमा सहान्यैर्भेदैः स्वीक्रियते ।

उपमानोपमेयत्वे एकस्यैवैकवाक्यगे ।
अनन्वयः

उपमानान्तरसंबन्धाभावोऽनन्वयः ।

उदाहरणम्—

न केवलं भाति नितान्तकान्तिर्नितम्बिनी सैव नितम्बिनीव ।
यावद्विलासायुधलासवासास्ते तद्विलासा इव तद्विलासाः ॥२३॥

उपमानेति । " उपमानान्तरव्यवच्छेदाय यदेकस्यैवोपमानोपमेयत्वे भेदोपचारेणैव निबध्येते सोऽनन्वयः । तदेतदुक्तम् ' उपमानान्तरसंबन्धाभावोऽनन्वयः ' इति बहुव्रीहिसमासात् । यद्वा संज्ञायोगनिर्वचनं तत् । अनन्वयः संबन्धाभावः स चार्थादुपमानान्तरेण उपमेयभिन्नेनेति । एवकारो वैचित्र्यविशेषस्फोरणार्थः । एकवाक्यगे इति विपर्यासोपमाव्यावर्तनाय । तत्र हि वाक्यद्वये तथाभावः " [प्र०] ।

" **न केवलमिति** । एवकारो भिन्नक्रमः । सा नितम्बिन्येव केवलं नितम्बिनीव नितान्तकान्तिर्भातीति न । यावत् । अपिस्त्वर्थे । तेऽनुभयैकगोचरास्तस्या विलासास्तद्विलासा इव भान्तीति वचनविपरिणामेनान्वयः । कीदृशा विलासाः । विलासायुधस्य कामस्य लासो नृत्यं तस्य वासा निवासभूताः । नितम्बिनी सैव नितम्बिनीव । तन्मात्रनितम्बिनीसदृशीति वार्थः । तेन स्फुटतया व्यक्तयैक्यलाभः । एवं च तत्रैव तदुपमानेनान्वेतीत्यनन्वयोऽलङ्कारः । तत्फलं च निरुपमत्वबोधः " [चं०] । " अत्र दशादिविशेषभेदाद्भेदोपचारः । " [प्र०]

विपर्यास उपमेयोपमा तयोः ॥ ५ ॥

तयोः उपमानोपमेययोः परिवृत्तिः अर्थात् वाक्यद्वये, इतरोपमानव्यवच्छेदपरा उपमेयेनोपमा इति उपमेयोपमा ।

उदाहरणम्—

कमलेव मतिर्मतिरिव कमला तनुरिव विभा विभेव तनुः ।
धरणीव धृतिर्धृतिरिव धरणी सततं विभाति बत यस्य ॥ २४ ॥

" **विपर्यास इति** । तयोरुपमानोपमेययोर्विपर्यास उपमेयोपमानभावः । अर्थाद्वाक्यद्वये । एकवाक्ये तथाऽसंभवात् । मुखमिव चन्द्र इत्यस्य निन्दाभिव्यक्तौ प्रतीपरूपत्वात् । उपमेयोपमेति यौगिकी संज्ञा । विपर्यासश्चायमुप-

मानान्तरव्यवच्छेदार्थः । उदाहरणम्—कमलेवेति " [प्र०] । " कमला लक्ष्मीः । विभा कान्तिः । धृतिर्धैर्यम् । बत हर्षे । यस्य राज्ञो मतिकमलादिकमन्योऽन्यसदृशं विभातीति निर्गलितान्वयः । सेयं तृतीयसदृशव्यवच्छेदफला उपमेयोपमा " [चं०] । " अत्र पूर्ववाक्यात्सादृश्यावगतौ पुनरिह सादृश्यमुच्यमानमनन्यार्थत्वे सत्यन्यव्यावृत्तिं लक्षयति । अत्र पूर्वत्र चैतयोः सदृशं नान्यदस्तीति भावः " [सं०] ।

संभावनमथोत्प्रेक्षा प्रकृतस्य समेन यत् ।

समेन उपमानेन ।

उदाहरणम्—

उन्मेषं यो मम न सहते जातिवैरी निशाया-
मिन्दोरिन्दीवरदलदृशा तस्य सौंदर्यदर्पः ।
नीतः शान्तिं प्रसभमनया वक्त्रकान्त्येति हर्षा-
ल्लग्ना मन्ये ललिततनु ते पादयोः पद्मलक्ष्मीः ॥ २५ ॥

लिम्पतीव तमोऽङ्गानि वर्षतीवाञ्जनं नभः
असत्पुरुषसेवेव दृष्टिर्विफलतां गता ॥ २६ ॥

इत्यादौ व्यापनादि लेपनादिरूपतया संभावितम् ।

" वाच्यसाधर्म्यालंकारं निरूप्य व्यंग्यसाधर्म्येषु निरूपणीयेषु प्रथमं प्राधान्यात् उत्प्रेक्षामाह । संभावनमिति । उत्कटकोटिकः संदेहः । अथ वाच्यसाधर्म्यालंकारनिरूपणोत्तरम् । उत्प्रेक्षा निरूप्यत इति शेषः । समेन । प्रकृतमात्मनः समं करोतीति सममुपमानम् । उत्कटा प्रकृष्टस्योपमानस्येक्षा ज्ञानं उत्प्रेक्षा । एवं चोत्कटोपमानकोटिकप्रकृतविषयकसंभावनमुत्प्रेक्षेत्यर्थः " [उ०] ।

" समेनेत्यत्र सह एकरूपतयेति शेषः । तेन प्रकृतस्य संभविनोऽर्थस्य समेनासंभविना सहैकरूपतया यत्संभावनं तदुत्प्रेक्षालंकार इत्यर्थः । सा चेयं हेत्वादिसंभावनाभेदाद्बहुप्रकारा । तत्र हेतूत्प्रेक्षा यथा—उन्मेषमिति " [प्र०] ।

"हे ललिततनु, पद्मलक्ष्मीः मन्ये इति हर्षात्तव पादयोर्लग्नेति सम्बन्धः। तेन हर्षरूपहेतूत्प्रेक्षेयम्। इति किम्। यो मम पद्मलक्ष्म्या जातिवैरी सहजशत्रुर्निशायामुन्मेषमुदयं न सहते तस्येन्दोः सौन्दर्यगर्वोऽनया इन्दीवरदलदृशा कर्तृभूतया वक्त्रकान्त्या करणभूतया प्रसभं बलाच्छान्तिं नीत इति" [चं०]।

"अत्र पद्मलक्ष्म्याः कामिनीचरणयोः स्वभावलग्नत्वं यथोक्तहर्षहेतुकलग्नत्वतादात्म्येन संभावितम्। स्वरूपसंभावनं यथा—लिम्पतीवेति। (स्पष्टम्)। अत्र गम्यमानं तमसो व्यापनादि लेपनादिरूपतया संभावितमिति स्वरूपोत्प्रेक्षेयम्। अत एव 'तमसो लेपनकर्तृत्वमत्रोत्प्रेक्ष्यम्' इत्यलंकारसर्वस्वकारमतमपास्तम्। विवक्षितविवेकेन लेपनमात्रस्यैवोत्प्रेक्षणात्। एवं फलाद्युत्प्रेक्षाप्यूहनीया" [प्र०]।

संकेतस्तु—"अत्र तमोगतत्वेन लेपनक्रियाकर्तृत्वोत्प्रेक्षायां व्यापनादिक्रिया निमित्तं गम्यम्। व्यापनादौ तूत्प्रेक्षाविषये निमित्तमन्यदन्वेष्यं स्यात्। न च विषयस्य गम्यत्वं युक्तम्। तस्योत्प्रेक्षिताधारत्वेन प्रस्तुतस्याभिधातुमुचितत्वात्। यत्तु व्यापनाद्युत्प्रेक्षाविषयमत्रोचे तच्चिन्त्यम्" इति प्राह।

ससंदेहस्तु भेदोक्तौ तदनुक्तौ च संशयः ॥ ६ ॥

भेदोक्तौ यथा—

अयं मार्तण्डः किं स खलु तुरगैः सप्तभिरितः
कृशानुः किं सर्वाः प्रसरति दिशो नैष नियतम्।
कृतान्तः किं साक्षान्महिषवहनोऽसाविति चिरं
समालोक्याजौ त्वां विदधति विकल्पान्प्रतिभटाः ॥ २७ ॥

भेदोक्तावित्यनेन न केवलमयं निश्चयगर्भो, यावन्निश्चयान्तोऽपि संदेहः स्वीकृतः। यथा—

इन्दुः किं क कलङ्कः सरसिजमेतत्किमम्बु कुत्र गतम्।
ललितसविलासवचनैर्मुखमिति हरिणाक्षि निश्चितं परतः ॥ २८ ॥

किन्तु निश्चयगर्भ इव नात्र निश्चयः प्रतीयमान इत्युपेक्षितो भट्टोद्भटेन।

"भेदो वैधर्म्यम्। संशयस्तु कविप्रतिभानिर्मित एवालंकारो न तु स्वारसिकः स्थाणुपुरुषादिविषयोऽपि। वैचित्र्याभावात्। अत्र संशयः

ससंदेह इति लक्षणम्। भेदोक्तौ तदनुक्तौ चेति विभागः। तत्र भेदोक्तौ यथा अयमिति" [प्र०]

"राजानं प्रति कस्यचिदुक्तिरियम्। हे राजन् प्रतिभटाः शत्रवः त्वाम् आजौ संग्रामे समालोक्य इति एवं विधान् विकल्पान् संशयान् चिरं विदधति कुर्वन्ति। किंविधानित्याकाङ्क्षायामाह—अयं भूलोकगतः मार्तण्डः सूर्यः किम्, स प्रसिद्धः सूर्यः खलु सप्तभिः तुरगैः इतः युक्तः 'सर्वं वाक्यं सावधारणम्' इति न्यायेन सप्तभिरेव तुरगैरितः इत्यर्थः अयमसंख्यतुरगयुक्तत्वान्न सूर्य इति भावः। तर्हि कृशानुः अग्निः किम् एषः, स सर्वाः दिशः नियतं यथा स्यात्तथा न प्रसरति किंतु वाय्वभिमुखामेव दिशं प्रसरति। अयं तु सर्वदिक्प्रसरणान्नाग्निरिति भावः। तर्हि साक्षात् कृतान्तो यमः किम्, असौ सः महिषवहनः महिषारूढः। अयं तु कदाचिदपि महिषं नारोहतीत्यर्थः" [झ०]।

"अत्र मार्तण्डत्वादीनां संदेहे सप्ततुरगत्वादीनि वैधर्म्याणि तदाश्रयेषूक्तानि। न चायं व्यतिरेकालंकारः। तस्य संदेहानुयायितया तेनैव व्यपदेशौचित्यात्। ननु भट्टोद्भटेन भेदोक्तौ निश्चयगर्भ एवायं स्वीकृतो न तु निश्चयान्तोऽपि। तत्किमस्यापि स एव पन्थाः। नेत्युच्यते। कुत एतत्। भेदोक्ताविति विभजनात्। निश्चयान्तस्यापि तत्संभवात्। वैचित्र्यानुभवाच्च। यथा इन्दुरिति।" [प्र०]।

"इन्दुरिति। नायिकां प्रति कस्यचिदुक्तिः। हे हरिणाक्षि एतत् (मुखम्) इन्दुः किम्। तर्हि कलङ्कः क्व। सरसिजं किम्। तर्हि अम्बु कुत्र गतम्। इति प्रथमं सन्दिग्धम्। परतः पश्चात् ललितसविलासवचनैः मुखमिति निश्चितम्" [उ०]। "तत्किं भट्टोद्भटेनायमुपेक्षितः। प्रतीयमानवद्वाच्ये तादृग्वैचित्र्याभावादिति गृहाण" [प्र०]।

इदमत्रावधेयम्। उद्भटेन निश्चयान्तसन्देहो न क्वापि प्रत्याख्यातः। उपेक्षित इति चेत्तर्हि भामहदण्डिवामनैरपि।

तदनुक्तौ यथा—

अस्याः सर्गविधौ प्रजापतिरभूच्चन्द्रो नु कान्तिप्रदः
शृङ्गारैकरसः स्वयं नु मदनो मासो नु पुष्पाकरः।

वेदाभ्यासजडः कथं नु विषयव्यावृत्तकौतूहलो
निर्मातुं प्रभवेन्मनोहरमिदं रूपं पुराणो मुनिः ॥ २९ ॥

भेदानुक्तौ यथा—अस्या इति । विक्रमोर्वशीये प्रथमेऽङ्के उर्वशीमुद्दिश्य पुरूरवस उक्तिरियम् । अस्या उर्वश्याः सर्गविधौ सृष्टौ यः प्रजापतिर्निर्माता अभूत् स कान्तिप्रदः चन्द्रः नु किम् । शृङ्गारैकरसः शृङ्गार एव प्रधानो रसो यस्य स मदनः स्वयं किम् । पुष्पाकरः वसन्तः मासः किम् । "इति प्रजापतिधर्मिकश्चन्द्रत्वादिरूपविरुद्धनानाभावकोटिकः संशयः" [उ०] वेदाभ्यासेन जडः कुण्ठितमतिः विषयेभ्यो व्यावृत्तं कौतूहलं औत्सुक्यं यस्य स पुराणो मुनिः ब्रह्मा इदं मनोहरं रूपं निर्मातुं कथं प्रभवेत् समर्थः भवेत् ॥ " अत्र शङ्क्यमानस्य प्रजापत्यादेः कस्यापि न वैधर्म्यमुक्तम् " [प्र०] ।

तद्रूपकमभेदो य उपमानोपमेययोः ।

अतिसाम्यात् अनपह्नुतभेदयोः अभेदः ।

तद्रूपकमिति । " रूपयत्येकतां नयतीति रूपकम् " [सं०] । " अभेदोऽभेदारोपः । बीजं तु तत्रातिसाम्यम् " [प्र०] । " साम्यमात्र उपमा । अतिसाम्ये तु रूपकम् । सर्वथाऽतिसाम्ये पुनरप्रस्तुतप्रशंसातिशयोक्ती । इदं तत्त्वम्—भेदे ज्ञातेऽपि यत्राभेदप्रतीतिरिवाभेदप्रतीतिरभेदप्रतीतिरेव तत्र क्रमेणोपमारूपकातिशयोक्त्याद्या ज्ञेयाः" [सं०] । " अभेदश्चात्रानपह्नुतभेदयोर्विवक्षित इति नापह्नुतावतिव्याप्तिः । तदेतद् द्विविधम्—सावयवं निरवयवं च । तत्राद्यं समस्तवस्तुविषयमेकदेशविवर्ति च । द्वितीयं तु शुद्धमात्रमिति । आद्ये विभागे लक्षणमाह " [प्र०] ।

समस्तवस्तुविषयं श्रौता आरोपिता यदा ॥ ७ ॥

आरोपविषया इव आरोप्यमाणाः यदा शब्दोपात्ताः, तदा समस्तानि वस्तूनि विषयोऽस्येति समस्तवस्तुविषयम् । आरोपिता इति बहुवचनमविवक्षितम् । यथा—

ज्योत्स्नाभस्मच्छुरणधवला बिभ्रती तारकास्थी—
न्यन्तर्धानव्यसनरसिका रात्रिकापालिकीयम् ।

30270

द्वीपाद् द्वीपं भ्रमति दधती चन्द्रमुद्राकपाले
न्यस्तं सिद्धाञ्जनपरिमलं लाञ्छनस्य च्छलेन ॥ ३० ॥

अत्र पादत्रये, अन्तर्धानव्यसनरसिकत्वमारोपितधर्म एवेति रूपकपरिग्रहे साधकमस्तीति तत्संकराशंका न कार्या ।

"**समस्तेति** । आरोपिता आरोप्यमाणाः ते सर्वेऽपि यद्यारोपविषयवच्छाब्दा एव भवन्ति तदा समस्तवस्तुविषयं नाम रूपकम् । समस्तं वस्तु आरोप्यमाणं विषयः शब्दप्रतिपाद्योऽत्रेति व्युत्पत्तेः । आरोपिता इति बहुवचनमविवक्षितमित्यारोप्यद्वयस्थले नाव्याप्तिः । उदाहरणम्—**ज्योत्स्नेति** ।" [प्र०] ॥

कवी रूपकमुखेन ज्योत्स्नीं योगिनीत्वेन वर्णयति । इयम् रात्रिरेव कापालिकी योगिनी द्वीपात् द्वीपान्तरं भ्रमति । कीदृशी । ज्योत्स्ना एव भस्म तस्याः छुरणेन लेपनेन धवला । तारका एव अस्थीनि बिभ्रती धारयन्ती । अन्तर्धानस्य व्यसने कौतुके रसिका । चन्द्र एव मुद्राकपालं दीक्षासमयगृहीतोपकरणम् । तस्मिन् । लाञ्छनस्य छलेन व्याजेन न्यस्तं स्थापितं सिद्धाञ्जनस्य अन्तर्धानादिसाधनस्य परिमलं चूर्णं दधती धारयन्ती । अत्र "रात्रिरेव कापालिकी योगिनीति प्रधानरूपकम् । एतन्निर्वाहकाण्यपराणि विशेषणानि" [चं०] ।

"अत्र पादत्रये ज्योत्स्नादिषु भस्मत्वादिकमारोप्यमाणं सर्वं शाब्दम् । नन्विदं रूपकोदाहरणं न युज्यते । साधकबाधकाभावेन रूपकोपमयोः सन्देहात्सन्देहलक्षणसङ्करौचित्यादिति चेत् । ('एवं च कापालिकीव रात्रिः कापालिक्यभिन्नेति वा, ज्योत्स्ना भस्मेव ज्योत्स्नैव भस्मेति वा, अस्थ्यभिन्नास्तारकाः अस्थिसदृशास्तारका इत्यादिक्रमेण रूपकोपमयोः सन्देह इत्याशयः' [उ०]) भवेदेवम् । यद्यन्तर्धानव्यसनरसिकत्वं विशेषणं न स्यात् । तद्धि रूपकपरिग्रहे साधकम् । कापालिक्यां तत्संभवाद्रात्रावसंभवाच्च । उपमापरिग्रहे तु रात्रेरेव प्राधान्यात्तस्यानन्वय एव स्यात्" [प्र०] ।

श्रौता आर्थाश्च ते यस्मिन्नेकदेशविवर्ति तत् ।

केचिदारोप्यमाणाः शब्दोपात्ताः, केचिदर्थसामर्थ्यादवसेयाः—इत्येकदेशविवर्तनात् एकदेशविवर्ति । यथा—

जस्स रणन्तेउरए करे कुणन्तस्स मण्डलग्गलअम् ।
रणसंमुही वि सहसा परम्मुही होइ रिउसेणा ॥ ३१ ॥

[यस्य रणान्तःपुरे करे कुर्वतो मण्डलाग्रलताम् ।
रससंमुख्यपि सहसा पराङ्मुखी भवति रिपुसेना ॥]

अत्र रणस्यान्तःपुरत्वमारोप्यमाणं शब्दोपात्तम्; मण्डलाग्रलतायाः नायिकात्वम्, रिपुसेनायाश्च प्रतिनायिकात्वम् अर्थसामर्थ्यादवसीयते इति एकदेशे विशेषेण वर्तनादेकदेशविवर्ति ।

साङ्गमेतत्

उक्तद्विभेदं सावयवम् ।

" श्रौता इति । ते इत्यारोपिताः । तथा च यत्र केचिदारोप्यमाणाः शब्दोपात्ताः । केचिदर्थसामर्थ्यादवसेयास्तदेकदेशविवर्ति । एकदेशे विशेषेण वर्तत इति व्युत्पत्तेः । उदाहरणम्—जस्सेति " [प्र०] ।

" मण्डलाग्रलतां खड्गलताम् । करे कुर्वतो धारयतः । युद्धार्थं रतार्थं च । अन्तःपुरत्वारोपसामर्थ्याल्लताया नायिकात्वावगमात् । रसेन वीररसेन शृङ्गारेण च । संमुखी युयुत्सू रिरंसुश्च । पराङ्मुखी भवति भयाद्युद्धान्निवर्तते कोपात् प्रियसंगमाच्च " [चं०] ।

" अत्र रणेऽन्तःपुरत्वमारोप्यं शाब्दम् । मण्डलाग्रलताया नायिकात्वं रिपुसेनायाः प्रतिनायिकात्वं चारोप्यं न शाब्दम् । किं त्वन्तःपुरत्वारोपसामर्थ्यादेवावसीयते । अन्यथा तस्यापर्यवसानात् । अत एकदेशे विशेषेण वर्तनादेकदेशविवर्ति । साङ्गमिति । साङ्गं सावयवम् । एतत् । उक्तप्रकारद्वयवदित्यर्थः । साङ्गत्वमनेकरूपकसमुदायः । एकस्मिन्रूपके द्वितीयस्याङ्गत्वेनावस्थानात् । अङ्गशब्दस्य हेत्वर्थत्वात् । " [प्र०] ।

निरङ्गं तु शुद्धम्

" निरङ्गमिति । निरङ्गमद्वितीयम् । तच्छुद्धमेवेत्यर्थः " [प्र०] ।

यथा—

कुरङ्गीवाङ्गानि स्तिमितयति गीतध्वनिषु यत्
सखीं कान्तोदन्तं श्रुतमपि पुनः प्रश्नयति यत् ।
अनिद्रं यच्चान्तः स्वपिति तदहो वेद्म्यभिनवां
प्रवृत्तोऽस्याः सेक्तुं हृदि मनसिजः प्रेमलतिकाम् ॥३२॥

" कुरङ्गीति—यद्यस्माद्गीतध्वनिषु सत्सु अङ्गानि स्तिमितयति निश्चेष्टानि करोति। तथा श्रुतमपि कान्तस्योदन्तं वृत्तान्तं सखीं प्रति पुनः प्रश्नविषयं करोति। यस्माच्चानिद्रं नेत्रमुद्रणादिशून्यं यथा स्यात्तथा अन्तः स्वपिति। कान्तैकतानान्तःकरणतया विषयान्न गृह्णाति अहो इति संबोधने। हे सखि, तत्तस्मान्मनसिजः अस्या हृदि। उद्गतामितिशेषः। अभिनवां प्रेमरूपां लतिकां सेक्तुं प्रवृत्त इति वेद्मीत्यन्वयः। अभिनवेति सेकौचित्यसूचनम् " [चं०]। " अत्र प्रेममात्रे लतिकात्वारोपः। " [प्र०]।

माला तु पूर्ववत् ॥ ८ ॥

मालोपमायामिवैकस्मिन् बहव आरोपिताः।

यथा—

सौन्दर्यस्य तरङ्गिणी तरुणिमोत्कर्षस्य हर्षोद्गमः
कान्तेः कार्मणकर्म नर्मरहसामुल्लासनावासभूः।
विद्या वक्रगिरां विधेरनवधिप्रावीण्यसाक्षात्क्रिया।
बाणाः पञ्चशिलीमुखस्य ललनाचूडामणिः सा प्रिया ॥ ३३ ॥

" अथ साङ्गस्यैव वैचित्र्यान्तरमाह—माला त्विति। यथैकत्र बहूपमानयोगे मालोपमा तथैकत्रानेकधर्मारोपे मालारूपकमित्यर्थः। यथा—सौन्दर्यस्येति " [प्र०]। " तरङ्गिणी नदी। सौन्दर्यस्य तरङ्गवत्त्वावगमेनोत्तरोत्तराविच्छेदलाभः हर्षोद्गमश्च योग्यस्थानलाभात्। कार्मणकर्म वशीकरणम्। नर्मरहसां (वचसां) क्रीडारहस्यानामुल्लासनाया जृम्भणस्य वासस्थानम्। वक्रोक्तीनां विद्या शिक्षाशास्त्रम्। विधेर्ब्रह्मणो निरवधिनिपुणतायाः साक्षात्कारः। सा प्रियेत्येकस्यां प्रियायां बहूनामारोपान्मालारूपकम्। पञ्चशिलीमुखः कामः " [चं०]।

नियतारोपणोपायः स्यादारोपः परस्य यः ।
तत्परम्परितं श्लिष्टे वाचके भेदभाजि वा ॥ ९ ॥

यथा—

विद्वन्मानसहंस वैरिकमलासंकोचदीप्तद्युते
दुर्गामार्गणनीललोहित समित्स्वीकारवैश्वानर ।
सत्यप्रीतिविधानदक्ष विजयप्राग्भावभीम प्रभो
साम्राज्यं वरवीर वत्सरशतं वैरिञ्चमुच्चैः क्रियाः ॥ ३४ ॥

अत्र, मानसमेव मानसम्, कमलायाः संकोच एव कमलानामसंकोचः, दुर्गाणाममार्गणमेव दुर्गायाः मार्गणम्, समितां स्वीकार एव समिधां स्वीकारः, सत्ये प्रीतिरेव सत्यामप्रीतिः, विजयः परपराभव एव विजयोऽर्जुनः,–एवमारोपणनिमित्तो हंसादेरारोपः । यद्यपि शब्दार्थालंकारोऽयमित्युक्तम्, वक्ष्यते च, तथाऽपि प्रसिद्ध्यनुरोधादत्रोक्तः । एकदेशविवर्ति[1] हीदमन्यैरभिधीयते ।

" **नियेतति** । नियतस्य मुख्यस्यारोपो वस्त्वन्तरतादात्म्यप्रतीतिस्तस्योपायः कारणं यः परस्यामुख्यस्यारोपस्तत्परम्परितम् । रूपणानां कार्यकारणभावरूपा परम्परा संजाताऽत्रेति योगादिति केचित् । वस्तुतस्तु नियतमारोपणमुपायो यत्र । आरोपणं विना यदारोपणं न संभवत्येवेति यावत् । एवंभूतः परस्यान्यस्य य आरोपः स तथा । एवं चैकरूपणानन्तरं परम्परितम् । कार्यकारणभावरूपा

1. According to the ग ms. of the Ānandāśrama edition of का. प्र. the reading is एकदेशवृत्ति हीदमन्यैरभिधीयते । This seems to be the correct reading as the word अन्यैः evidently refers to उद्भट who gives four varieties of रूपक–(1) समस्तवस्तुविषय, (2) एकदेशविवर्ति, (3) समस्तवस्तुविषय [मालारूपक] and (4) एकदेशवृत्ति. The last variety is defined as– एकदेशवृत्ति स्यात्पररूपेण रूपणात् which exactly tallies with the परम्परित type of मम्मट.

परम्परा संजाताऽत्रेति व्युत्पत्तेः। श्लिष्ट इत्यादि। तदेतद् द्विविधम्। उपायभूते रूपके आरोप्यारोपविषययोर्वाचकस्य श्लिष्टत्वाद्भिन्नरूपत्वाच्चेत्यर्थः। तत्राद्यं यथा—विद्वदिति " [प्र०]।—

" हे वरवीर प्रभो, त्वं वैरिञ्चं ब्राह्मं वत्सरशतं उच्चैः साम्राज्यं क्रिया इत्याख्यातपदम्। कीदृशः। विदुषां मानसमेव मानसं सरस्तत्र हंसरूपेति हंसत्वारोपे श्लेषबलान्मनसि सरोविशेषारोपस्य हेतुत्वात्परम्परितरूपकम्। एवमग्रेऽपि। वैरिकमलायाः संकोच एव कमलानामसंकोचस्तेन दीप्तद्युते सूर्य। दुर्गाणाममार्गणमेव दुर्गाया मार्गणमन्वेषणं तेन नीललोहित शिव। समितां सङ्ग्रामाणां स्वीकार एव समिधां स्वीकारस्तेन वह्ने। सत्ये प्रीतिरेव सत्यां दक्षकन्यायामप्रीतिस्तद्विधाने कुशल एव दक्षप्रजापतिरूप। विजयः परपराभव एव विजयोऽर्जुनस्तत्प्रागभावः प्राक्सत्त्वमग्रजत्वं च तेन भीम भीषण भीमसेन चेति " [चं०]।

" अत्र विदुषां मानसं सरोविशेष इत्यारोपहेतुकं राज्ञो हंसत्वारोपणम् तत्र चारोपविषयारोपणीययोर्हृदयसरोविशेषयोः श्लेषवता मानसशब्देनैवाभिधानम्। ननु श्लेषस्य शब्दपरिवृत्त्यसहतया शब्दालंकारत्वमित्युक्तं वक्ष्यते च। तथा च श्लेषपरम्परितमुभयालंकारो युज्यत इति तदवसर एव वक्तुमौचित्यात्किमित्यर्थालंकारमध्ये पठित इति चेत्। सत्यमेतत्। तथापि श्लेषापत्रादकं रूपकमित्यलंकारसर्वस्वकारादिप्रसिद्ध्यनुरोधेनोक्तः। तथाप्रसिद्धौ किं बीजमिति चेत्, मानसत्वादीनामार्थत्वम्। इदं हि तैरेकदेशविवर्तीत्युच्यते " [प्र०]।

भेदभाजि यथा—

आलानं जयकुञ्जरस्य दृषदां सेतुर्विपद्वारिधेः
पूर्वाद्रिः करवालचण्डमहसो लीलोपधानं श्रियः।
सङ्ग्रामामृतसागरप्रमथनक्रीडाविधौ मन्दरो
राजन्राजति वीरवैरिवनितावैधव्यदस्ते भुजः॥ ३५॥

अत्र जयादेर्भिन्नशब्दवाच्यस्य कुञ्जरत्वाद्यारोपे सति एव भुजस्य आलानत्वाद्यारोपो युज्यते।

अलौकिकमहालोकप्रकाशितजगत्त्रयः ।
स्तूयते देव सद्वंशमुक्तारत्नं न कैर्भवान् ॥ ३६ ॥

निरवधि च निराश्रयं च यस्य स्थितमनिवर्तितकौतुकप्रपञ्चम् ।
प्रथम इह भवान्स कूर्ममूर्तिर्जयति चतुर्दशलोकवल्लिकन्दः ॥ ३७ ॥

इति च अमालारूपकमपि परम्परितं द्रष्टव्यम् ।

द्वितीयं यथा– "आलानमिति । जय एव कुञ्जरो हस्ती तस्यालानं बन्धनस्तम्भ इति । भुजे आलानत्वारोपे जये कुञ्जरत्वारोपो हेतुः । एवमग्रेऽपि । विपद्रूपसमुद्रस्य पाषाणसेतुः । तदुत्तारणक्षमत्वात् । करवालः खङ्ग एव चण्डमहाः सूर्यस्तस्य पूर्वाद्रिरुदयाचलः । लीला सुखस्वापस्तत्रोपधानं शिरोनिधानं तूलपटः । संग्राम एवामृतसागरः । वीराणां वैरिणां या वनितास्तासां वैधव्यदः" [चं०]।

"अत्र जयादेर्भिन्नशब्दवाच्यकुञ्जरत्वाद्यारोपे सति भुजे आलानत्वाद्यारोपो युज्यते । इदमुदाहृतभेदद्वयं परम्परितमालारूपम् । अमालारूपमपि तद् द्रष्टव्यम् । तत्र श्लिष्टवाचके यथा " [प्र०] ।

"अलौकिकेति । अलौकिकस्य महस्योत्सवस्यालोको दर्शनं तेन प्रकाशितं जगत्त्रयं येनेति राजपक्षे । मुक्तामणिपक्षे तु—महालोको महादीप्तिः । सद्वंशो महाकुलमेव महावेणुस्तत्र मुक्तारत्नम् । वंशोद्भवमुक्ताया बहुमूल्यत्वाद्रत्नत्वोक्तिः । भवान्कैर्न स्तूयते " [चं०] । " भेदभाजि यथा " [प्र०]— " निरवधीति । स प्रथम आद्यः कूर्ममूर्तिर्भवान् जयतीति विष्णुं प्रति भक्तोक्तिः । यस्य स्थितं स्थितिर्निरवधि कालपरिच्छेदशून्यम् । सर्वाधः स्थितत्वादाश्रयशून्यं च । अत एवानिवर्तितः कौतुकस्याश्चर्यस्य प्रपञ्चो विस्तारो येन तत् । कीदृशः कूर्ममूर्तिः । चतुर्दशलोकरूपा या वल्लिः (लता) तस्याः कन्दः (मूलम्) " [चं०] ।

" अत्र लोकशब्दाद्भिन्नेन वल्लिपदेनारोप्यमाणमुक्तम् । परम्परिते चारोप्यारोपविषयानेकत्वेऽपि नालंकारानेकत्वम् । संभूयैव वैचित्र्यप्रकर्षाधायकत्वात् । एवं मालारशनयोरपि द्रष्टव्यम् । यद्यपि रशनारूपकमपि रूपकं संभवति । यथा—" [प्र०] ।

किसलयकरैर्लतानां करकमलैः कामिनां मनो जयति ।
नलिनीनां कमलमुखैर्मुखेन्दुभिर्योषितां मदनः ॥ ३८ ॥

इत्यादि रशनारूपकं न वैचित्र्यवदिति न लक्षितम् ।

" किसलयेति । मदनः कामिनां मनो जयति इत्यन्वयः । कैः तत्राह– किसलयेत्यादि लतानां पल्लवरूपः करैः । करकमलैर्मुखेन्दुभिरित्युभयत्रापि योषितामन्वयः । अत्र पूर्वमारोप्यमाणस्य करादेरुत्तरत्रारोपविषयत्वाद्रशनारूपकम् " [चं०] ।

प्रकृतं यन्निषिध्यान्यत्साध्यते सा त्वपह्नुतिः ।

उपमेयम् असत्यं कृत्वोपमानं सत्यतया यत् स्थाप्यते, सा तु अपह्नुतिः । उदाहरणम्—

अवाप्तः प्रागल्भ्यं परिणतरुचः शैलतनये
कलङ्को नैवायं विलसति शशाङ्कस्य वपुषि ।
अमुष्येयं मन्ये विगलदमृतस्यन्दशिशिरे
रतिश्रान्ता शेते रजनिरमणी गाढमुरसि ॥ ३९ ॥

इत्थं वा—

बत सखि कियदेतत्पश्य वैरं स्मरस्य
प्रियविरहकृशेऽस्मिन्रागिलोके तथा हि ।
उपवनसहकारोद्भासिभृङ्गच्छलेन
प्रतिविशिखमनेनोट्टङ्कितं कालकूटम् ॥ ४० ॥

अत्र हि न सभृङ्गाणि सहकाराणि, अपि तु सकालकूटाः शरा इति प्रतीतिः ।

सा अपह्नुतिः शाब्दी आर्थी चेति द्विधा । तत्राद्या यथा—"अवाप्त इति । परिणतरुचः पूर्णकान्तेः शशाङ्कस्य तत्त्वेन पराभिमतस्य वपुषि प्रागल्भ्यं प्रकटतां प्राप्तोऽयं कलङ्को नैव विलसतीत्यपह्नुतिः । तर्हि किं तत्राह—अमुष्य चन्द्रस्य विगलदमृतप्रवाहशीतले उरसि गाढं रतिश्रान्ता इयं रजनीरूपा रमणी शेते इति मन्ये [चं०] ।

" अत्र कलङ्को नैवायमिति शाब्दोऽपह्नवः । आर्थस्तु बह्वीभिर्भङ्गीभिरालोच्यते । तत्क्वचित्कपटार्थशब्दोपादानात् । यथा—" [प्र०] । " बतेति । बत खेदे । अस्मिन्मादृशे रागिलोके अनुरक्तजने कियदपरिमितमेतद्वैरम् । अस्तीति शेषः । पश्येति तथाहीत्यनन्तरं योज्यम् । उपवनेषु सहकारा आम्रास्तेषूद्भासिनो भृङ्गा भ्रमरास्तद्व्याजेन प्रतिबाणमनेन स्मरेण कालकूटमुद्दङ्कितं प्रकाशितम् । लापितमिति यावत् । " [चं०] । " अत्र च्छलशब्दबलान्न समृङ्गाणि सहकाराणि अपि तु सकालकूटाः शरा इति प्रतीयते " [प्र०] ।

एवं वा—

अमुष्मिँल्लावण्यामृतसरसि नूनं मृगदृशः
स्मरः शर्वप्लुष्टः पृथुजघनभागे निपतितः ।
यदङ्गाङ्गाराणां प्रशमपिशुना नाभिकुहरे
शिखा धूमस्येयं परिणमति रोमावलिवपुः ॥ ४१ ॥

अत्र न रोमावलिः, धूमशिखेयमिति प्रतिपत्तिः । एवमियं भङ्ग्यन्तरैरप्यूह्या ।

क्वचित्परिणामादिशब्दवशात् । यथा–अमुष्मिन्निति—" वेश्यामुद्दिश्य समृद्धं कामिनं प्रति दास्या उक्तिः " [उ०] । " शर्वेण हरेण प्लुष्टो दग्धः स्मरो लावण्यरूपामृतसरोवरभूते मृगदृशोऽस्मिन् महति जघनप्रदेशे नूनं निपतितः । यस्य कामास्याङ्गान्येवाङ्गारास्तेषां प्रशमस्य निर्वाणतायाः सूचिका इयं धूमस्य शिखा नाभिबिले रोमावलिमूर्तिः परिणमति । नेयं रोमावलिः किंतु धूमशिखैवेयं तदाकारेण परिणतेत्यर्थगम्याया अपह्नुतेः " [चं०] उदाहरणमिदम् ।

" अत्र धूमशिखा रोमावलिवपुः परिणमतीति परिणामशब्दार्थवशान्नेयं रोमावलिः किं तु धूमशिखेति प्रतीयते । एवं भङ्ग्यन्तरैरप्यूह्यम् । यथा 'इदं ते केनोक्तं' इत्यादौ " [प्र०] ।

श्लेषः स वाक्य एकस्मिन्यत्रानेकार्थता भवेत् ॥ १० ॥

एकार्थप्रतिपादकानामेव शब्दानां यत्रानेकोऽर्थः स श्लेषः ।

उदाहरणम्—

उदयमयते दिङ्मालिन्यं निराकुरुतेतरां
नयति निधनं निद्रामुद्रां प्रवर्तयति क्रियाः।
रचयतितरां स्वैराचारप्रवर्तनकर्तनं
बत बत लसत्तेजःपुञ्जो विभाति विभाकरः ॥ ४२ ॥

अत्राभिधाया अनियन्त्रणात् द्वावप्यर्कभूपौ वाच्यौ।

"श्लेष इति। परिवृत्तिसहानामेव शब्दानामेकवृन्तगतफलद्वयन्यायेन यत्रानेकार्थप्रतिपादकता सोऽर्थश्लेषः। यथा—उदयमिति" [प्र०]।

"विभाकरनामा राजविशेषः सूर्यश्च। उदयमुदयाचलं समृद्धिं च। अयते प्राप्नोति। दिशां मालिन्यमन्धकारस्तत्तद्दिग्गतदुष्टसामन्ताद्युपद्रवश्च। दिग्गतजनानां दारिद्र्येण कुवेषतेत्यन्ये। निद्रया मुद्रा मुद्रणं चक्षुषः निद्रामुद्रा निद्रासदृशी अवस्था आलस्यरूपा च। निधनं नाशम्। क्रिया अग्निहोत्राद्याः पक्षद्वयेऽपि। स्वैराचारप्रवर्तनमभिसारादि विधिनिषेधातिक्रमश्च। तत्खण्डनं निवृत्तिं रचयति। हर्षातिशयाद्वतबतेति द्विरुक्तिः। तेजःपुञ्जो रश्मिसमूहः कान्तिसमूहश्च" [चं०]।

"अत्र विभाकरनामा राजविशेषो मार्तण्डश्चेत्युभयार्थानि 'उदयमयते' इत्यादीनि वाक्यानि। न चायं द्वितीयार्थस्य ध्वनिरेवेति शङ्कनीयम्। संयोगादीनामभावेनाभिधाया अनियन्त्रणाद् द्वयोरपि वाच्यत्वात्" [प्र०]।

परोक्तिर्भेदकैः श्लिष्टैः समासोक्तिः

प्रकृतार्थप्रतिपादकवाक्येन श्लिष्टविशेषणमाहात्म्यात् न तु विशेष्यस्य सामर्थ्यादपि यत् अप्रकृतस्यार्थस्याभिधानम्, सा समासेन संक्षेपेणार्थद्वयकथनात् समासोक्तिः। उदाहरणम्—

लहिऊण तुज्झ बाहुप्फंसं तीए स को वि उल्लासो।
जअलच्छी तुह विरहे ण हुज्जला दुव्वला णं सा ॥४३॥

[लब्ध्वा तव बाहुस्पर्शं यस्याः स कोऽप्युल्लासः।
जयलक्ष्मीस्तव विरहे न खलूज्ज्वला दुर्बला ननु सा ॥]

अत्र जयलक्ष्मीशब्दस्य केवलं कान्तावाचकत्वं नास्ति ।

" परोक्तिरिति । परमप्रकृतम् । भेदकानि विशेषणानि । श्लिष्टान्यनेकार्थानि । तेन प्रकृतार्थविशेषणवाचिमात्रशब्दस्य श्लेषमहिम्ना यत्र प्रकृतार्थकेन वाक्येनाप्रकृतार्थवचनं सा समासोक्तिः संक्षेपेणार्थद्वयोक्तिः । मात्रग्रहणाद्यत्र विशेष्यपदस्यापि श्लिष्टत्वं तद्व्युदासः । तस्य श्लेषत्वात् । उदाहरणम्—लहिउणेति " [प्र०]।

" समरपतितं स्वामिनमवेक्ष्य वीरपत्न्या उक्तिरियमिति सुधासागरकाराः । महेश्वरेण तु ' दुर्बलानां सा ' इति संस्कृतं पठित्वा दैवाद् दुर्बलेन शत्रुणा जितं नृपतिं प्रति कस्यचिदुक्तिरियमित्युक्तम् । हे वीर तव बाहुस्पर्शं भुजसङ्गं लब्ध्वा अवाप्य यस्याः स कोऽपि अनिर्वचनीयः उल्लासो हर्षोत्फुल्लताभूत् सा जयलक्ष्मीः विजयश्रीः तव विरहे वियोगे सति न खलु उज्ज्वला ननु प्रत्युत दुर्बला जातेत्यर्थः " [भ्र०]।

" अत्र विशेष्यवाचिनो जयलक्ष्मीशब्दस्य परमप्रकृतार्थकत्वं नास्ति । श्लिष्टत्वं चोपलक्षणम्। औपम्यगर्भादीनामपि संभवात्। यथा 'विलिखति कुचौ' इत्यादाविति प्राचीनः पन्थाः । अत्र नव्याः—परोक्तिरिति परशब्देन सामान्यतः प्रकृतमप्रकृतं वा विवक्षितम् । तेन यत्राप्राकरणिकविशेषणसामर्थ्यात्प्राकरणिकमुच्यते तदपि संगृह्यते । तत्रापि वैचित्र्याविशेषात् अन्यत्रानन्तर्भावाच्च । यथा ' संप्राप्ते सकलाङ्ग '—इत्यादि । अत्र ह्यप्रकृतस्य भृङ्गस्य विशेषणसामर्थ्यात्प्रकृतस्यासत्पुरुषस्य प्रतीतिरित्याहुः । तन्न युक्तम् । अप्रस्तुतप्रशंसयैव तत्संग्रहात् । ' येनास्यभ्युदितेन ' इतिवत् । वृत्तौ चाप्रस्तुतप्रशंसाप्रकरणे तत्र समासोक्तिपदं श्लिष्टविशेषणत्वमात्रपरम् " [प्र०]।

निदर्शना ।

अभवन्वस्तुसंबन्ध उपमापरिकल्पकः ॥ ११ ॥

निदर्शनं दृष्टान्तकरणम् ।

उदाहरणम्—

क्व सूर्यप्रभवो वंशः क्व चाल्पविषया मतिः ।
तितीर्षुर्दुस्तरं मोहादुडुपेनास्मि सागरम् ॥ ४४ ॥

अत्र, उडुपेन सागरतरणमिव मन्मत्या सूर्यवंशवर्णनमित्युपमायां पर्यवस्यति ।

यथा वा--

उदयति विततोर्ध्वरश्मिरज्जावहिमरुचौ हिमधाम्नि याति चास्तम् ।
वहति गिरिरयं विलम्बिघण्टाद्वयपरिवारितवारणेन्द्रलीलाम् ॥ ४५ ॥

अत्र, कथमन्यस्य लीलामन्यो वहतीति तत्सदृशीमित्युपमायां पर्यवसानम् ।

"निदर्शनेति । यथाश्रुतमात्रेणासंभवी वस्तुसंबन्धो यत्रोपमां कल्पयित्वा पर्यवस्यति सैका निदर्शना । दृष्टान्तकरणात्मकनिदर्शनरूपत्वात् । सा च द्विधा—अवान्तरवाक्यभेदे तदभेदे च । तयोराद्या यथा—क्व सूर्येति । अत्राहं सागरं तितीर्षुरस्मीत्यस्यासंबद्धार्थकतया उडुपेन सागरतरणवन्मदीयमत्या सूर्यवंशवर्णनमसंभवितमित्युपमायाःकल्पनम्। अन्त्या यथा–उदयतीति" [प्र.] ।

"माघे रैवतकवर्णनम् । वितता विस्तृता ऊर्ध्वा रश्मय एव रज्जवो यस्य तादृशे अहिमरुचौ सूर्ये उदयति सति हिमधाम्नि चन्द्रे चास्तं याति सति अयं रैवतकगिरिरुभयतो विलम्बिघण्टाद्वयपरिवारितस्य वारणेन्द्रस्य गजश्रेष्ठस्य लीलां शोभां वहतीत्यन्वयः । अत्रान्यलीलाया अन्यत्रारोपो लीलासदृशीं लीलामित्युपमां गमयति। तत्र चन्द्रसूर्यघण्टयोश्च बिम्बप्रतिबिम्बभावस्तत्समर्थनाय च रश्मिषु रज्जुत्वारोप इति बोध्यम् " [चं०] ।

"अत्रान्यलीलोद्वहनस्यान्येनासंभवाद्वारणेन्द्रलीलासदृशीं लीलामित्युपमायां पर्यवसानम् । ' एवं च पूर्वोदाहरणे वाक्यार्थ उपमाक्षेपकः । इह तु पदार्थमात्रम् ' इति व्याख्यानमनादेयम् । अत्रापि लीलापदार्थमात्रस्यानाक्षेपकत्वात् । एषा मालारूपापि दृश्यते । " [प्र०] ।

दोर्भ्यां तितीर्षति तरङ्गवतीभुजंग-
मादातुमिच्छति करे हरिणाङ्कबिम्बम् ।
मेरुं लिलङ्घयिषति ध्रुवमेष देव
यस्ते गुणान्गदितुमुद्यममादधाति ॥ ४६ ॥

इत्यादौ मालारूपाऽप्येषा द्रष्टव्या ।

स्वस्वहेत्वन्वयस्योक्तिः क्रिययैव च साऽपरा ।

क्रिययैव स्वस्वरूप-स्वकारणयोः संबन्धो यदवगम्यते, सा अपरा निदर्शना । यथा—

उन्नतं पदमवाप्य यो लघुर्हेलयैव स पतेदिति ब्रुवन् ।
शैलशेखरगतो दृषत्कणश्चारुमारुतधुतः पतत्यधः ॥ ४७ ॥

अत्र पातक्रियया पतनस्य, लाघवे सति उन्नतपदप्राप्तिरूपस्य च संबन्धः ख्याप्यते ॥

'यथा **दोर्भ्यामिति**' [प्र०] हे देव राजन् यः कश्चिदपि पुरुषः ते तव गुणान् शौर्यौदार्यादीन् गदितुं वक्तुं उद्यमं उद्योगं आदधाति कुरुते स तरङ्गवतीनां नदीनां भुजङ्गं उपपतिं समुद्रमित्यर्थः दोर्भ्यां बाहुभ्यां तितीर्षति तर्तुमिच्छति तथा च हरिणाङ्कबिम्बं चन्द्रबिम्बं करे आदातुं ग्रहीतुं इच्छति । 'एवं च मेरुं पर्वतं लिलंघयिषति लङ्घयितुमिच्छति दोर्भ्यां सागरतरणादिवत् त्वद्गुणभाषणमशक्यमित्यनेकोपमाकल्पनात् मालारूपेयं निदर्शना' [चं०] ।

"**स्वस्वेति** । यत्र क्रिययैव स्वस्य स्वहेतोश्चान्वयो हेतुहेतुमद्भावरूपः ख्याप्यते साऽपरा निदर्शना । यथा—**उन्नतमिति**" [प्र०] । "दृषत्कणः पाषाणकणः । चारुणा मन्देनापि मारुतेन धुतः कम्पितोऽधः पतति । किं कुर्वन् । यो लघुः स उन्नतं पदमवाप्य हेलयैव (लीलयैव) पतेदिति ब्रुवन् स्वदृष्टान्तेन कथयन् उन्नतं पदमुत्कर्षः उच्चस्थलं च । लघुरल्पबुद्धिः अल्पपरिमाणश्च । पतनमुत्कर्षहानिः अधः संयोगश्च" [चं०] ।

"अत्र पतेत्पदप्रतिपाद्यस्य पातस्य कार्यस्य लाघवे सत्युन्नतपदप्राप्तिरूपस्य कारणस्य च तथा संबन्धः पततिपदप्रतिपाद्यया पातक्रियया प्रतिपाद्यते । तथा च लाघवे सत्युन्नतपदप्राप्तिः पाते हेतुर्यथा दृषत्कणस्येति दृष्टान्तपर्यवसानान्निदर्शनात्वमिति" [प्र०] ।

अप्रस्तुतप्रशंसा या सा सैव प्रस्तुताश्रया ॥१२॥

अप्राकरणिकस्याभिधानेन प्राकरणिकस्याक्षेपोऽप्रस्तुतप्रशंसा ।

कार्ये निमित्ते सामान्ये विशेषे प्रस्तुते सति ।
तदन्यस्य वचस्तुल्ये तुल्यस्येति च पञ्चधा ॥१३॥

तदन्यस्य कारणादेः ।

क्रमेणोदाहरणानि--

याताः किं न मिलन्ति सुन्दरि पुनश्चिन्ता त्वया मत्कृते
नो कार्या नितरां कृशासि कथयत्येवं सबाष्पे मयि ।
लज्जामन्थरतारकेण निपतत्पीताश्रुणा चक्षुषा
दृष्ट्वा मां हसितेन भाविमरणोत्साहस्तया सूचितः ॥४८॥

अत्र-प्रस्थानात्किमिति निवृत्तोऽसीति कार्ये पृष्टे कारणमभिहितम् ।

राजन्राजसुता न पाठयति मां देव्योऽपि तूष्णीं स्थिताः
कुब्जे भोजय मां कुमारसचिवैर्नाद्यापि किं भुज्यते ।
इत्थं राजशुकस्तवारिभवने मुक्तोऽध्वगैः पञ्जरा-
च्चित्रस्थानवलोक्य शून्यवलभावेकैकमाभाषते ॥४९॥

अत्र प्रस्थानोद्यतं भवन्तं ज्ञात्वा सहसैव त्वदरयः पलाय्य गताः— इति कारणे प्रस्तुते कार्यमुक्तम्--

" **अप्रस्तुतेति** । प्रशंसा वर्णनम् । सैव अप्रस्तुतप्रशंसैवेत्यर्थः । प्रस्तुताश्रया प्रकृतप्रतिपत्तिहेतुः । एतच्चालंकारत्वबीजमतिप्रसक्तमिति निवारयति । अप्राकरणिकेन प्राकरणिकाक्षेपोऽप्रस्तुतप्रशंसा प्राकरणिकेनाप्राकरणिकाक्षेपः समासोक्तिरिति विवेकः । तां विभजते—**कार्ये इति** । सेत्यनुवर्तते । कार्यादिपञ्चके प्रस्तुते तदन्यस्य कारणादिपञ्चकस्याप्रस्तुतस्य वर्णनमिति सा पञ्चधेत्यर्थः । तत्र कार्ये प्रस्तुते कारणस्य वर्णनं यथा—**याता इति** " [प्र०]। हे सुन्दरि । " याताः प्रस्थिताः किं पुनर्न मिलन्ति, अपि तु मिलन्त्येवेति काकुः । मत्कृते मदर्थं (त्वया पुनः चिन्ता नो कार्या । त्वं नितरामत्यर्थं कृशासि दुर्बलासि, एवं मयि सबाष्पे साश्रुणि कथयति सति)। अतिकार्श्यदर्शनादनिष्टशङ्कया सबाष्पत्वम् । मदीया गमनानिच्छा ज्ञातेति लज्जया मन्थरा स्तब्धा तारका कनीनिका यस्य तेन । तथा निपतत् पीतमशकुनभयात्

संहृतमश्रु येन तादृशेन चक्षुषा (मां दृष्ट्वा)। हसितेनेति। एवं किलास्याभिप्रायो यदियं मद्विरहेऽपि प्राणान् धारयिष्यतीति प्रहासरूपणेत्यर्थः। भाविन्यावश्यके मरणे उत्साहः स च वियोगदुःखशान्तिवाञ्छयेति ज्ञेयम्। इयं च प्रस्थाननिवृत्तिरूपे कार्ये प्रस्तुते कारणोक्तिरूपा अप्रस्तुतप्रशंसा" [चं०]। अमरुशतके "प्रस्थानात् किं निवृत्तोऽसीति कार्ये पृष्टे कारणस्य प्रियाया भाविमरणोत्साहस्य वचनम्। किं शब्दः प्रश्नार्थक इति न कारणप्रस्तावः" [प्र०]। यत्त्वर्जुनवर्मदेवैरस्य पद्यस्य टीकायामिदमुत्तरालङ्कारोदाहरणमित्युक्तं तदुद्योते नागेशभट्टैरित्थं प्रत्याख्यातम्–" अत एवोत्तरेण प्रश्नोन्नयनेऽपि नोत्तरालङ्कारः। तस्य चमत्कारजनकत्वाभावात्। अन्ये द्वयोः समावेशमिच्छन्ति।"

एतत्तस्य मुखात्कियत्कमलिनीपत्रे कणं वारिणो
यन्मुक्तामणिरित्यमंस्त स जडः शृण्वन्यदस्मादपि।
अङ्गुल्यग्रलघुक्रियाप्रविलयिन्यादीयमाने शनैः
कुत्रोड्डीय गतो ममेत्यनुदिनं निद्राति नान्तःशुचा ॥५०॥

अत्रास्थाने जडानां ममत्वसंभावना भवतीति सामान्ये प्रस्तुते विशेषः कथितः।

कारणप्रस्तावे कार्यवचनं यथा–राजन्निति। राजानं प्रति कवेरुक्तिः "राज्ञः शत्रुभूतस्य शुकस्तवारिभवने शून्यायां वलभौ भित्तौ चित्रस्थान् अवलोक्यैकैकं प्रतीत्थमाभाषते इत्यन्वयः। कीदृक्। तत्राह—(हे राजन्र। त्वसुता मां न पाठयति। देव्योऽपि तूष्णीं स्थिताः)। कुब्जे इति तादृश्या भोजिकाया संबोधनम्। (मां भोजय)। कुमारसहितैः सचिवैरद्यापि किं न भुज्यते इति काकुः [चं०]। "अत्र प्रस्थानोद्यतं भवन्तं ज्ञात्वा सहसैव त्वदरयः प्रपलाय्य गता इति शत्रुपलायने कारणे प्रस्तुते तस्याभाषणविशेषरूपं कार्यमुक्तम्। सामान्ये प्रस्तुते विशेषवचनं यथा—एतदिति" [प्र.]। भल्लटकविकृते भल्लटशतके कस्यचिन्मूर्खस्य वृत्तान्तं कुतश्चिदाकर्ण्य विस्मयेन भाषमाणं कंचित्प्रति कस्यचिदुक्तिः। मुखात्प्रतारकस्य कस्यचिन्मुखादपगतं शृण्वन् स जडः (मूर्खः कमलिनीपत्रे स्थितं वारिणः कणं बिन्दुं) यन्मुक्तामणिरित्यमंस्त एतत्तस्य

कियत्। यतोऽस्मादपि अधिकं किंचिज्जडत्वबोधकत्वमस्ति तदाह। अङ्गुल्यग्रेति। शनैरादीयमानेऽपि अङ्गुल्यग्रस्य लघुक्रियया अल्पचालनेन प्रविलायिनि अङ्गुलावेव लग्ने (सति मम मुक्तामणिः कुत्रोड्डीय गत इत्यनुदिनमन्तः शोकेन न निद्राति, नेत्रमीलनेऽपि चिन्तां न त्यजतीति भावः) " [उ०] । " अत्र जडानामस्थल एव ममत्वसंभावना भवतीति सामान्ये प्रस्तुते पुरुषविशेषस्य ममत्वविशेषोऽभिहितः " [प्र०] ।

सुहृद्वधूबाष्पजलप्रमार्जनं
करोति वैरप्रतियातनेन यः ।
स एव पूज्यः स पुमान्स नीतिमान्
सुजीवितं तस्य स भाजनं श्रियः ॥ ५१ ॥

अत्र कृष्णं निहत्य नरकासुरवधूनां यदि दुःखं प्रशमयसि, तत् त्वमेव श्लाघ्यः–इति विशेषे प्रकृते सामान्यमुदितम् ।

तुल्ये प्रस्तुते तुल्याभिधाने त्रयः प्रकाराः—श्लेषः, समासोक्तिः, सादृश्यामात्रं वा तुल्यात् तुल्यस्य ह्याक्षेपे हेतुः । क्रमेणोदाहरणम्–

पुंस्त्वादपि प्रविचलेद्यदि यद्यधोऽपि
यायाद्यदि प्रणयने नमहानपि स्यात् ।
अभ्युद्धरेत्तदपि विश्वमितीदृशीये
केनापि दिक्प्रकटिता पुरुषोत्तमेन ॥ ५२ ॥

येनास्यभ्युदितेन चन्द्र गमितः क्लान्तिं रवौ तत्र ते
युज्येत प्रतिकर्तुमेव न पुनस्तस्यैव पादग्रहः ।
क्षीणेनैतदनुष्ठितं यदि ततः किं लज्जसे नो मना-
गस्त्वेवं जडधामता तु भवतो यद्व्योम्नि विस्फूर्जसे ॥ ५३ ॥

विशेषे प्रस्तुते सामान्यवचनं यथा—सुहृदिति । " श्रीकृष्णेन नरकासुरे हते तत्सुहृदं (शाल्वं) प्रति तन्मन्त्रिण इयमुक्तिः " [चं०] । यः

वैरप्रतियातनेन वैरप्रतिक्रियया सुहृद्वधूबाष्पजलप्रमार्जनं मित्रपत्नीनामश्रुप्रोञ्छनं करोति, स एव पूज्यः, स पुमान्, स नीतिमान्, तस्य सुजीवितं सुष्ठु जीवितं, स श्रियो लक्ष्म्याः भाजनं पात्रम्।

" अत्र श्रीकृष्णं निहत्य नरकासुरवधूनां दुःखं यदि शमयसि तदा त्वमेव श्लाघ्य इति विशेषे प्रस्तुते सामान्यमुक्तम्। तुल्ये प्रस्तुते तुल्याभिधाने त्रयः प्रकाराः। विशेषणविशेष्यवाचिना सर्वेषामपि श्लिष्टत्वस्य, विशेषणमात्रवाचिनो वा श्लिष्टत्वस्य, श्लेषाभावेऽपि सादृश्यमात्रस्यैव वा प्रकृताक्षेपहेतुत्वात्। आद्यो यथा—**पुंस्त्वादिति** " [प्र०]। भल्लटशतके ७९ पद्यमिदमिति वामनाचार्यः। " पुरुषोत्तमेन विष्णुना दैत्यमोहने स्त्रीरूपतापत्त्या वाराहमूर्त्या पातालप्रवेशरूपाधोगमनेन बलिप्रणयने प्रार्थने वामनताप्राप्त्या च भुवनरक्षणादेवंप्रकारेणापि विश्वोद्धरणं कर्तव्यमिति दिङ्मार्गः प्रकटित इत्यप्रस्तुतस्योपमानभूतस्य विष्णोरभिधानात्तत्तुल्यप्रकृतपुरुषश्रेष्ठप्रतीतिः। तत्र च पुंस्त्वात्प्रचलनं पुरुषार्थहानिः। अधोयानं स्वपदभ्रंशः। अमहत्त्वं गौरवहानिः। विश्वं सर्वजनमित्यर्थो बोध्यः " [चं०]।

" अत्र पुंस्त्वादित्यादिविशेषणानां पुरुषोत्तमेनेति विशेष्यस्य च श्लेषात्सत्पुरुषप्रतिपत्तिः। न च श्लेष एवायम्। 'अवयवशक्तेः समुदायशक्तिर्बलीयसी' इति न्यायात्प्राग्विष्णूपस्थितौ सत्पुरुषस्याक्षेपेणैवोपस्थितेः। श्लेषसत्त्वेऽप्यप्रस्तुतस्य प्रथमोपस्थित्यैवाप्रस्तुतप्रशंसात्वात्। द्वितीयो यथा—**येनेति** "[प्र०]।

" क्षीणधनः कश्चित् उपजीवनार्थमपकारिणं सधनमनुसरन् केनचिदुपालभ्यते। येनाभ्युदितेन क्लांतिं गमितोऽसीति संबंधः। उदितेनैव न त्वपकृतेनापि। क्लांतिस्तेजोहीनता ग्लानिश्च। प्रतिकर्तुं प्रत्यपकर्तुम्। पादः पदं रश्मिश्च। क्षीणेन धनहीनेन कलाहीनेन च। मनागीषदपि किं न लज्जसे इत्यर्थः। अस्त्वेवं लज्जाशून्यत्वमप्यस्तु। जडधामता हिमाधारता मूढता च। विस्फूर्जसे सगर्वमुदेषि। अमायां सूर्येण सह संगत्य ततस्तेजोग्रहणं चंद्रस्येत्यागमसिद्धं पादग्रहणम्। अत्र श्लिष्टविशेषणमात्रमाहात्म्येन प्रस्तुतसधननिर्धनवृत्तान्ताक्षेपः "

[उ०]। " अत्र विशेष्यवाचि चन्द्रपदं न श्लिष्टम् " [प्र०]।

आदाय वारि परितः सरितां मुखेभ्यः
किं तावदर्जितमनेन दुरर्णवेन ।
क्षारीकृतं च वडवादहने हुतं च
पातालकुक्षिकुहरे विनिवेशितं च ॥ ५४ ॥

इयं च काचित् वाच्ये प्रतियमानार्थानध्यारोपेणैव भवति । यथा—

अब्धेरम्भःस्थगितभुवनाभोगपातालकुक्षेः
पोतोपाया इह हि बहवो लङ्घनेऽपि क्रमन्ते ।
आहो रिक्तः कथमपि भवेदेष दैवात्तदानीं
को नाम स्यादवटकुहरालोकनेऽप्यस्य कल्पः ॥ ५५ ॥

तृतीयो यथा–आदायेति । अनेन दुरर्णवेन दुष्टसमुद्रेण परितः सर्वतः सरितां नदीनां मुखेभ्यः वारि आदाय तावत् किं अर्जितं किं कृतम् । न किमपीत्यर्थः । तथाहि–क्षारीकृतं. वडवादहने वडवाग्नौ हुतं च, तथा पातालमेव कुक्षिकुहरं तस्मिन् विनिवेशितं विक्षिप्तं च । " अत्र श्लेषाभावेऽपि सादृश्यमात्रेणासत्पुरुषाक्षेपः " [प्र०] । " अत्र ग्रासकल्पं परधनमपहृत्य विफलव्ययकर्तरि दुरीश्वरे प्रकृते तत्सदृशस्याप्रकृतस्यार्णवस्य कथनम् " [उ] " यथा वा मम—

कौटिल्यं नयने निवारयतरां शीघ्रां गतिं शीलय
व्यक्तार्थां कुरु भारतीं विहसितेऽप्यौद्धत्यमायोजय ।
कुग्रामप्रमदाविलासरसिकः कांतस्त्वयाऽऽसादितो
नायं नन्दिनि नागरीजनसमाचारैःसमाकृष्यते ॥ "

कौटिल्यमिति । (नायिकां प्रति सख्या उक्तिः । ' नन्दिनि ' इति नायिकायाः सम्बोधनम् । कौटिल्यम् । वक्रताम् । निवारयतराम् । अतिशयेन निवारय । शीलस्य । अभ्यस्य । अभ्यासं विना स्वाभाविकमन्दगमनस्यानिवर्तनात् । भारतीम् । वाचम् । विहसिते । मधुरस्वरसहितहासे । नागरीजनानां समाचाराः व्यवहाराः नेत्रकौटिल्य-मन्दगमन-अस्पष्टार्थभाषण–अनौद्धत्यरूपाः

तैः । न समाकृष्यते न वशीक्रियते । शार्दूलविक्रीडितं छन्दः ।) अत्र दुष्प्रभुसत्कविवृतान्ताक्षेपः " [उ०]

" इयं च त्रिधा—काचिद्वाच्यार्थे प्रतीयमानार्थानध्यारोपमात्रेण । क्वचित्प्रतीयमानार्थाध्यारोपेण । क्वचित्त्वंशभेदेन तदध्यारोपानारोपाभ्याम् ।

तत्राद्या यथा—अब्धेरिति "[प्र०] अर्णो जलं तेन स्थगितः तिरस्कृतो भुवनस्य भूमेराभोगः विस्तारः तस्य पातालरूपः कुक्षिर्येन तस्य अब्धेः समुद्रस्य । पोतःसमुद्रयानं उपायो येषां तादृशाः समुद्रवणिजःलङ्घने उल्लङ्घनेऽपि क्रमन्ते उत्सहन्ते । आहो इति बह्वर्थेऽव्ययम् । यदि दैवात् एष रिक्तः जलशून्यः भवेत् तदा–अवटः गर्तः । कुहरं तस्यैव गम्भीरप्रदेशः । तदवलोकनेऽपि को नाम कथमपि कल्पः समर्थः स्यात् । " अत्र पुरुषेऽप्येतेऽर्था अबाधिता एवेति नेह प्रतीयमानार्थाध्यारोपः " [प्र०] ।

" अत्रोपमर्दनशीलस्य दुष्प्रभोः पूर्णतैव वरम्, न रिक्तता, अत्यन्तोपमर्दनापत्तेरिति व्यंग्यं गुणीभूतमेव । अत्र समुद्रेऽपीति पाठः । ध्वनित्वं तु नात्र । इहात्यन्ताप्रस्तुतस्य तत्त्वादेव वर्णनमनुचितमिति तत्रापर्यवसानात्तेन स्वस्योचितत्वसिद्धये व्यंग्यार्थस्य बलादाकृष्टत्वेन वाच्यसिध्यंगत्वात् " [उ०] ।

क्वचिदध्यारोपेणैव । यथा–

कस्त्वं भोः कथयामि दैवहतकं मां विद्धि शाखोटकं
वैराग्यादिव वक्षि साधु विदितं कस्मादिदं कथ्यते ।
वामेनात्र वटस्तमध्वगजनः सर्वात्मना सेवते
न च्छायापि परोपकारकरणे मार्गस्थितस्यापि मे ॥ ५६ ॥

क्वचिदंशेष्वध्यारोपेण । यथा––

सोऽपूर्वो रसनाविपर्ययविधिस्तत्कर्णयोश्चापलं
दृष्टिः सा मदविस्मृतस्वपरदिक्किं भूयसोक्तेन वा ।
सर्वं विस्मृतवानसि भ्रमर हे यद्वारणोऽद्याप्यसा-
वन्तः शून्यकरो निषेव्यत इति भ्रातः क एष ग्रहः ॥ ५७ ॥

अत्र रसनाविपर्यासः शून्यकरत्वं च भ्रमरस्य असेवने न हेतुः, कर्णचापलं तु हेतुः मदः प्रत्युत सेवने निमित्तम् ।

द्वितीया यथा—**कस्त्वमिति** । शाखोटकं प्रति कस्यचित् प्रश्नः " शाखोटको हि श्मशानाग्निज्वालालीढलतापल्लवादिस्तरुविशेषः । तस्य कथयामीत्यादिप्रत्युक्तिः। अनेन पदेनेदमाह–अकथनीयमेतत्। श्रूयमाणं हि निर्वेदाय भवति । तथापि तु यदि निर्बन्धस्तत्कथयामि । वैराग्यादिति। काक्वा दैवहतकमित्यादिना सूचितं ते वैराग्यमिति यावत् । साधु विदितमित्युत्तरम् । कस्मादिति वैराग्ये हेतुप्रश्नः । इदं कथ्यत इत्यादि सनिर्वेदस्मरणोपक्रमं कथं कथमपि निरूपणीयतयोत्तरम् । वामेनेति । अनुचितेन कुलादिनोपलक्षित इत्यर्थः । वट इति छायामात्रकरणादेव फलदानादिशून्यादुद्धुरकंधर इत्यर्थः " [लो०] । " नहि वृक्षविशेषेणसहोक्तिप्रत्युक्ती संभवत इत्यविवक्षिताभिधेयेनैवानेन श्लोकेन समृद्धासत्पुरुषसमीपवर्तिनो निर्धनस्य कस्यचिन्मनस्विनः परिदेवितं तात्पर्येण वाक्यार्थीकृतमिति प्रतीयते" (ध्वन्यालोकः, ३,पृ.२१९)

तृतीया यथा-सोऽपूर्व इति । भल्लटकविकृते भल्लटशतके १८ पद्यमिदम् । हे भ्रमर (यस्य वारणस्य) सोऽपूर्वः रसनाविपर्ययोऽग्निशापात करिणां जिव्हापरिवृत्तिः, अन्यत्र पूर्वविपरीताभिधानम् । तस्य विधिः प्रकारः । तत कर्णयोश्चापलं निरन्तरचालनं परवचनप्रतार्यत्वं च । मदः करिणां प्रसिद्धो गर्वश्च तेन विस्मृता स्वपरयोर्दिग् मार्गः आप्तानाप्तविभागश्च तादृशी दृष्टिः । भयसोक्तेन बहुनोक्तेन वा किम् । न किमपि फलमित्यर्थः। एतत् सर्वं विस्मृतवानसि यत् यस्मात् कारणात् असौ वारणोगजः, वारकश्च । अन्तर्मध्ये शून्यः सरन्ध्रो धनरहितश्च ' करः शुण्डा हस्तश्च यस्य सोऽद्यापि निषेव्यते । हे भ्रातः एष कस्ते ग्रहः आग्रहः । "अत्राप्रस्तुतयोर्गजभ्रमरयोरभिधानेन तुल्ययोः प्रस्तुतयोः सेव्यसेवकयोर्निवारकानुगतयोः पुरुषयोः श्लेषेणाक्षेप इत्यप्रस्तुतप्रशंसा । इयं हि कर्णचापलांशे वाच्ययोर्गजभ्रमरयोः सेव्यसेवकपुरुषरूपप्रतीयमानार्थानध्यारोपेण तदन्यत्र तु रसनाविपर्ययादिरूपांशत्रये तयोस्तदध्यारोपेणैव च भवतीति बोध्यम् । " [झ०] ।

" अत्र हस्तिनो रसनाविपर्यासः शून्यकरत्वं मदश्च वाच्यस्य भ्रमरस्य सेवनाभावहेतुत्वेन वाच्यानि, न तद्धेतवः । मदस्तु प्रत्युत सेवने हेतुरिति

तदंशे प्रतीयमानपुरुषाध्यारोपापेक्षा । कर्णचापलं तु भ्रमरस्यासेवने हेतुरेवेति तदंशे नाध्यारोप इति " [प्र०] ।

निगीर्याध्यवसानं तु प्रकृतस्य परेण यत् ।
प्रस्तुतस्य यदन्यत्वं यद्यर्थोक्तौ च कल्पनम् ॥ १४ ॥
कार्यकारणयोर्यश्च पौर्वापर्यविपर्ययः ।
विज्ञेयाऽतिशयोक्तिः सा

उपमानेनान्तर्निगीर्णस्योपमेयस्य यदध्यवसानं सैका । यथा—

कमलमनम्भसि कमले च कुवलये तानि कनकलतिकायाम्
सा च सुकुमारसुभगेत्युत्पातपरम्परा केयम् ॥ ५८ ॥

" **निगीर्येति** । प्रकृतस्योपमेयस्य समेनोपमानेन निगीर्याध्यवसानं द्रढीयसी बुद्धिः सैकाऽतिशयोक्तिः । यच्च तदेव वस्त्वन्यत्वेन विविक्ताकारवस्त्वन्तरत्वेनाध्यवसीयते सा द्वितीया । यच्च चेच्छब्देन यदिशब्देन वा यद्यर्थोक्तौ कल्पनमर्थादसंभविनोऽर्थस्य सा तृतीया । यश्च कारणकार्ययोः प्रसिद्धस्य पौर्वापर्यस्य विपर्ययो वैपरीत्यं कारणस्य शीघ्रकारितांप्रतीयते सा चतुर्थीति चतस्रोऽतिशयोक्तयः । तत्राद्या यथा—**कमलमिति** " [प्र०] । " प्रेयसीं दृष्ट्वा तत्सखीं प्रति नायकस्योक्तिरियम् । अनम्भसि अनुदके देशे कमलं कान्तावक्त्ररूपं पद्मम् । तस्मिन् कमले च कुवलये नेत्रद्वयरूपं नीलोत्पलद्वयम् । तानि कमलं कुवलयद्वयं चेति त्रीण्यपि कनकलतिकायां कान्तातनुरूपायां सुवर्णलतायाम् । सा च कनकलतिका सुकुमारा मृद्वी चासौ सुभगा सुन्दरी चेति उत्पातपरंपरा अद्भुतमाला केयमित्यर्थः " [झ०] ।

अत्र मुखादि कमलादिरूपतयाऽध्यवसितम् ।

यच्च तदेवान्यत्वेनाध्यवसीयते, सा अपरा यथा–

अण्णं लडहत्तणअं अण्णा विअ का वि वत्तणच्छाआ ।
सामा सामण्णपआवइणो रेह च्चिअ ण होई ॥ ५९ ॥

(अन्यत्सौकुमार्यमन्यैव कापि वर्तनच्छाया ।
श्यामा सामान्यप्रजापते रेखैव न भवति ॥)

'यद्यर्थस्य' यदिशब्देनचेच्छब्देन वा उक्तौ यत् कल्पनम् (अर्थात् असंभविनोऽर्थस्य), सा तृतीया । यथा—

राकायामकलङ्कं चेदमृतांशोर्भवेद्वपुः ।
तस्या मुखं तदा साम्यपराभवमवाप्नुयात् ॥ ६० ॥

" अत्र मुखादि कमलादित्वेनाध्यवसितम् । यथा वा मम—
कलशे परमहत्त्वं तिमिरस्तोमस्य सोमसहवासः ।
वियति च शैवलवल्ली शिव शिव कुसुमेषुसर्गसौभाग्यम् ॥ [प्र०]

कलश इति । अत्र कलशत्वेन स्तनयोरध्यवसानं, तिमिरसंघत्वेन केशपाशस्य, आकाशत्वेन मध्यस्य, वल्लीत्वेन रोमावल्या इति ज्ञेयम् " [प्रभा] ।
द्वितीया यथा--अण्णमिति

" सुकुमारशब्दस्य लडहादेशः । (वर्तते जीवतीति) वर्तनं शरीरम् । छाया कांतिः । श्यामा शीतोष्णकाले उष्णशीता (शीतकाले भवेदुष्णा ग्रीष्मे च सुखशीतला । सर्वावयवशोभाढ्या सा श्यामा परिकीर्तिता ।) सामान्यप्रजापतेः सर्वसाधारणप्रजापतेः । रेखा निर्मितिः । (आर्या जघनविपुला ।) अत्रान्यदेव सौकुमार्यमित्युक्त्याऽस्याः सौंदर्ये सौंदर्यांतरादतिशयः प्रतीयते " [उ०] ।

तृतीया यथा--राकायामिति । अमृतांशोश्चन्द्रस्य वपुः शरीरं, राकायां पूर्णचन्द्रायां पूर्णिमायां अकलङ्कं चेत् यदि स्यात्, तदा तस्याः नायिकायाः मुखं साम्यमेव पराभवोऽपकर्षः तं प्राप्नुयात् । " निरुपमस्योपमानसंभव एव पराभवः । पूर्वार्धे पूर्णेन्दौ कलंकाभावस्यासंबंधे संबंधः कल्पितः । उत्तरार्धे साम्यसंबंधसंभवेऽपि तदसंबंधः पराभवपदेन सूचितः । एवं चासंबंधे संबंध इति द्विविधेयम् " [उ०] । रुद्रटस्तु इमां उत्पाद्योपमामाह [८. १५-१६] । दण्डिमते चेयमद्भुतोपमा [२. २४] ।

कारणस्य शीघ्रकारितां वक्तुं कार्यस्य पूर्वमुक्तौ चतुर्थी । यथा—

हृदयमधिष्ठितमादौ मालत्याः कुसुमचापबाणेन ।
चरमं रमणीवल्लभ लोचनविषयं त्वया भजता ॥ ६१

प्रतिवस्तूपमा तु सा ॥ १५ ॥
सामान्यस्य द्विरेकस्य यत्र वाक्यद्वये स्थितिः ।

साधारणो धर्मः उपमेयवाक्ये उपमानवाक्ये च कथितपदत्वस्य दुष्टतयाऽभिहितत्वात् शब्दभेदेन यत् उपादीयते, सा वस्तुनो वाक्यार्थस्योपमानत्वात् प्रतिवस्तूपमा । यथा––

देवीभावं गमिता परिवारपदं कथं भजत्येषा ।
न खलु परिभोगयोग्यं दैवतरूपाङ्कितं रत्नम् ॥ ६२ ॥

चतुर्थी यथा-**हृदयमिति** । दामोदरगुप्तकृते कुट्टनीमते ९६ पद्यमिदम् । यत्तु बहुभिः टीकाकारैः मालतीमाधवस्थमिदं इत्युक्तं तदसत्, पद्यस्यास्य तत्रानुपलम्भात् ।

कुसुमान्येव चापो बाणाश्च यस्य तेन मदनेन मालत्याः मालतीनाम्न्या नायिकायाः हृदयं आदौ पूर्वं अधिष्ठितम् । चरमं पश्चात् । लोचनविषयं नेत्रगोचरताम् । भजता प्राप्नुवता । दृष्टेनेति यावत् । त्वया आक्रांतम् । आर्या छन्दः । अत्र कारणस्य कांताधिष्ठानस्य शीघ्रकारित्वं वक्तुं कार्यस्य कंदर्पाधिष्ठानस्य प्रथममुक्तिः अन्त्यं यथा । ' सममेव समाक्रांतं द्वयं द्विरदगामिना । तेन सिंहासनं पित्र्यं मण्डलं च महीभृताम् , ' (र. ४. ४) इत्यत्र सममेव न तु पूर्वापरभावेनेति प्रतीतेः । सिंहासनाक्रमणं कारणम् । महीभृन्मण्डलाक्रमणं कार्यम् " [उ०]

" **प्रतिवस्तूपमेति** ' एकस्य सामान्यस्य साधारणधर्मस्य वाक्यद्वये उपमानोपमेयवाक्ययोर्यत्र द्विरवस्थितिः । अर्थाच्छब्दभेदेन । अभिन्नस्य पदस्य दुष्टत्वात् । सा प्रतिवस्तूपमा । वस्तुनो वाक्यार्थस्योपमानत्वात् । अत्र ' द्विः ' ' द्वये ' इत्यनेकोपलक्षके । मालानुरोधात् । सा च द्विधा–अमालारूपा मालारूपा च " [प्र०]

तत्राद्या यथा-**देवीति** वामनकाव्यालंकारसूत्र-वृत्तावुदाहृतं पद्यमिदम् (४-३-२) राजानं प्रति देवीसख्या उक्तिः । देवीभावं देवीत्वम् । ' देवी

कृताभिषेकायाम् ' इत्यमरः । गमिता प्रापिता । एषा मे सखी । परिवारपदं साधारणकलत्रस्थानं कथं भजति, प्राप्नोतु इत्यर्थः । दैवतरूपेण अङ्कितं चिह्नितं, उल्लिखितदैवाकारं, स्वर्णादिघटितप्रतिमेत्यर्थः । रत्नं, परिभोगो भूषाद्यर्थमुपादानं, तस्य योग्यं न । "अत्र परिवारपदत्वं साधारणो धर्मः परिभोगयोग्यमिति पर्यायेण भिन्नशब्देनोक्तः । परिवारपदत्वपरिभोगयोग्यत्वयोरेकार्थत्वात्" [सं०] । "अत्र द्वयोर्वाक्यार्थयोरनौचित्यरूप एक एव साधारणधर्मः ' कथं ' ' न खलु ' इति भिन्नशब्दोपात्त इति प्रतिवस्तूपमालंकारः " [चं०] ।

"अत्र परिवारपदत्वपरिभोगयोग्यत्वयोरनर्थान्तरत्वादुदाहरणत्वमित्येके । ' कथं भजति ' ' न खलु ' इत्यनयोरेकार्थतया तथात्वमित्यपरे " [प्र०]

यदि दहत्यनलोऽत्र किमद्भुतं यदि च गौरवमद्रिषु किं ततः ।
लवणमम्बु सदैव महोदधेः प्रकृतिरेव सतामविषादिता ॥६३॥

इत्यादिका मालाप्रतिवस्तूपमा द्रष्टव्या । एवमन्यत्राप्यनुसर्तव्यम्॥

दृष्टान्तः पुनरेतेषां सर्वेषां प्रतिबिम्बनम् ॥ १६ ॥

एतेषां साधारणधर्मादीनाम्, दृष्टोऽन्तः निश्चयो यत्र स दृष्टांतः ।

त्वयि दृष्ट एव तस्या निर्वाति मनो मनोभवज्वलितम् ।
आलोके हि हिमांशोर्विकसति कुसुमं कुमुद्वत्याः ॥ ६४ ॥

एष साधर्म्येण । वैधर्म्येण तु—

तवाहवे साहसकर्मशर्मणः करं कृपाणान्तिकमानिनीषतः ।
भटाः परेषां विशरारुतामगुर्दधत्यवाते स्थिरतां हि पांसवः ॥६५॥

अन्त्या यथा-यदीति । " प्रकृतिरेवेति इदमेकं प्रकृतम् । शेषं त्वत्रोपमानभूतम् [सं० । " अत्र किमद्भुतमित्यादिभिरद्भुताभावस्य वाक्यचतुष्टयेऽप्युपादानान्मालात्वम् । चतुर्थवाक्यं चोपमेयवाचि " [प्र०]

"दृष्टान्त इति । अत्र पुनः शब्दः पूर्वस्माद्विशेषकः । विशेषश्च बिंबप्रतिबिम्बभाव एव । सर्वेषामिति । न तु प्रतिवस्तूपमायामिव साधारणधर्मस्यैव द्विःप्रयोगः किंतूपमेयादेरपि । विशेषस्य सामन्येन समर्थने त्वर्थान्तरन्यासः " [सं०] ।

" एतेषामुपमानोपमेयसाधर्म्याणां सर्वेषां प्रतिबिम्बनं दृष्टान्तः । दृष्टोऽन्तो निश्चय उपमानिर्वाहकोऽत्रालंकारे इति व्युत्पत्तेः । स च द्विधा—साधर्म्यवैधर्म्यरूपाभ्याम् । तत्र साधर्म्येण यथा–त्वयीति " [प्र०] । रुद्रटालङ्कारे पद्यमिदम् (८. ९५) नायिकासख्याः नायकं प्रति उक्तिरियम् । मनोभवज्वलितं कामप्रदीप्तं तस्याः मनः त्वयि दृष्ट एव निर्वाति, प्रसन्नं भवति । हिमांशोश्चन्द्रस्य आलोके दर्शने हि कुमुद्वत्याः कुसुमं विकसति । " यथा कुमुदिन्याश्चन्द्रालोके तद्गुणपक्षपातित्वेन कुमुदं विकसति तथा त्वद्दर्शने गुणपक्षपातात्तस्या मन इति सर्वप्रतिबिम्बनम् " [सं०] । " अत्र साधर्म्यस्यापि प्रतिबिम्ब एवेति प्रतिवस्तूपमाभेदः " [प्र०] ।

वैधर्म्येण यथा–तवेति । हे राजन् , साहसकर्मणा शर्म सुखं यस्य तस्य तव आहवे युद्धे कृपाणान्तिकं खड्गसमीपं करं आनिनीषतो नेतुमिच्छतो न तु नीतवतः । परेषां शत्रूणां भटाःयोद्धारः विशरारुतां नश्वरतां अगुः प्रापुः । हि यतः अवाते निर्वातदेशे पांसवः रजांसि स्थिरतां दधति धारयन्ति । "अत्र ' वाते तु पांसवः स्थिरतां न दधति ' इत्येवंरूपे वैधर्म्यविपर्यये साधर्म्यपर्यवसानमिति दृष्टान्तालंकारत्वम् । अत्र पांसुभटयोः पलायनास्थिरत्वयोर्बिम्बप्रतिबिम्बभावः " (झ०) ।

सकृद्वृत्तिस्तु धर्मस्य प्रकृताप्रकृतात्मनाम् ।
सैव क्रियासु बह्वीषु कारकस्येति दीपकम् ॥ १७ ॥

प्राकरणिकाप्राकरणिकानाम् अर्थात् उपमानोपमेयानाम् , धर्मः क्रियादिः, एकवारमेव यत् उपादीयते, तत् एकस्थस्यैव समस्तवाक्यदीपनात् दीपकम् । यथा—

किवणाणं धणं णाआणं फणमणी केसराइं सीहाणं ।
कुलवालिआणं थणआ कुत्तो छिप्पन्ति अमुआणम् ॥ ६६ ॥

कारकस्य च बह्वीषु क्रियासु सकृद्वृत्तिर्दीपकम् । यथा–

स्विद्यति कूणति वेल्लति विवलति निमिषति विलोकयति तिर्यक् ।
अन्तर्नन्दति चुम्बितुमिच्छति नवपरिणया वधूः शयने ॥ ६७ ॥

सकृदिति—

प्रकृताप्रकृतात्मनामर्थादुपमानोपमेयभूतानां धर्मिणां धर्मस्य क्रियादेः सकृद्वृत्तिरेकवारमेवोपादानं यत्तदेकम् । एकस्थस्यैव सर्ववाक्यदीपकत्वेन प्रदीपसाम्यात् । कारकस्य च बह्वीषु क्रियासु सकृद्वृत्तिरेव द्वितीयं दीपकम् । इतिशब्दः प्रकारे । तेनोक्तप्रकारद्वयवद्दीपकमित्यर्थः " [प्र०]

" एकस्थस्यैवेति । अयं भावः एकत्र स्थितः क्रियादिः समानो धर्मः प्रसङ्गेनान्यत्रोपकरोतीति दीपसाम्याद्दीपकम् । अत्र प्रकृताप्रकृतत्वयोर्वास्तवत्वादर्थानामौपम्यं सत्यम् । परं गम्यं, न श्रौतम् । अतो नोपमा " [सं०]।

आद्यं यथा--कृपणानां धनं नागानां फणमणिः केशराश्च सिंहानाम् ।

कुलपालिकानां च स्तनाः कुतः स्पृश्यन्तेऽमृतानाम् ॥

" अत्र छिप्यन्तीति सकृदुपात्तम् । कुलपालिकानां स्तना उपमेयाः " [प्र०] " अन्येषां तूपमानत्वम् । अत्र तत्तादुपमानैः प्रत्येकमौपम्यप्रतीतिः । अत्र क्रिया साधारणधर्मः । गुणो यथा—' श्यामलाः प्रावृषेण्याभिर्दिशो जीमूतपङ्क्तिभिः । भुवश्च सुकुमाराभिर्नवशाद्वलपङ्क्तिभिः ॥ " इति [उ०]।

अन्त्यं यथा—" स्विद्यतीति । नवोढा वधूः शयने तल्पे स्वेदं भजते, कूणति संकोचमालम्बते । सवितर्कं वीक्षत इति चण्डीदासः । वेल्लति परिवृत्य शेते । विवलति विशेषतश्चञ्चला भवति । निमिषति निद्राव्याजेन नेत्रे मुद्रयति । अन्तर्नन्दति हृष्यति । नवोढात्वेन बाह्यतो हर्षाप्रकाशनात् । अतएव चुम्बितुमिच्छति, न तु चुम्बतीत्यनेकासु क्रियासु वधूरूपकर्तृकारकस्य सकृद्वृत्तिः " [च०] । यत्तु—' किं च दीपकतुल्ययोगित्वादौ गम्यमानमौपम्यं जीवातुरिति सर्वेषां संमतम् । न चात्र स्वेदनकूणनादीनामेककारकान्वितानामप्यौपम्यं कविसंरम्भगोचरः ' इति वदता रसगङ्गाधरकारेण (पृ० ३२५) अस्योदाहरणस्यासंगतिर्दर्शिता, तत्रेदमवधेयं यन्मम्मटेन द्वितीये दीपके न कुत्रापि औपम्यस्य निर्देशः कृतः । औपम्ये सति तु इयं तुल्ययोगिता स्यात् ।

मालादीपकमाद्यं चेद्यथोत्तरगुणावहम् ।

पूर्वेण पूर्वेण वस्तुना उत्तरमुत्तरं चेदुपक्रियते, तत् मालादीपकम् ।

यथा--

सङ्ग्रामाङ्गणमागतेन भवता चापे समारोपिते
देवाकर्णय येन येन सहसा यद्यत्समासादितम् ।
कोदण्डेन शराः शरैररिशिरस्तेनापि भूमण्डलं
तेन त्वं भवता च कीर्तिरतुला कीर्त्या च लोकत्रयम् ॥ ६८ ॥

पूर्वपूर्वस्य उत्तरोत्तरोत्कर्षत्वे मालादीपकम् । उत्तरोत्तरस्य पूर्वपूर्वोत्कर्षत्वे तु एकावली । "सङ्ग्रामेति । खण्डप्रशस्तौ पद्यमिदम् । सङ्ग्राम एवाङ्गणं निर्भयसंचारात् । आगतेन भवता चापे समारोपिते सति । । देवेति संबोधनम् येन येन सहसा झटिति यद्यत्समासादितं प्राप्तं तदाकर्णयेति संबंधः । केन किमित्याकाङ्क्षायामुत्तरार्धम् " [चं०] ।

कोदण्डेन धनुषा शराःसमासादिताः, शरैः शत्रुशिरः समासादितं, शत्रुमूर्धा च पतता भूमण्डलं समासादितं, भूवलयेन च त्वं स्वामित्वेन समासादितः, भवता च अतुला कीर्तिः समासादिता, कीर्त्या च लोकत्रयं समासादितम् । अत्र कोदण्डस्य प्रक्षेपणाख्यशरोपकारहेतुत्वं शराणां चारिशिरसो भूमण्डलप्राप्तिरूपोपकारहेतुत्वं शिरसश्चोत्तमस्वामिलाभरूपभूमण्डलोपकारहेतुत्वं भूमण्डलेन कीर्तिमासादयता नृपोपकारकरणं नृपेण च कीर्तेर्लोकत्रयव्यापनाख्योपकारजननमित्यवगन्तव्यम् " [प्रभा] । रसगङ्गाधरकारस्तु उदाहरणमिदं दूषयन् पूर्वपूर्वस्य उत्तरोत्तरोत्कर्षत्वेऽपि एकावल्या एवभेदं पश्यति । " एवं च दीपकालंकारप्रकरणे प्राचीनैरस्य (मालादीपकस्य) लक्षणाद्दीपकविशेषोऽयमिति न भ्रमितव्यम् । तस्य सादृश्यगर्भतायाः सकलालङ्कारिकसिद्धत्वात् । इह च शृङ्खलावयवानां पदार्थानां सादृश्यमेव नास्तीति कथंकारं दीपकतावाचं श्रद्धीमहि । तेषां प्रकृताप्रकृतात्मकत्वविरहाच्च । " (पृ. ४६४)

" मालोपमादीनां बहूपमानसंबन्धान्नापरो विशेष इति न ते लक्षिताः । इदं तु पृथग्लक्षितम् । उत्तरोत्तरमुपकार्योपकारकतया परस्परसंसर्गेण मालाभावमापन्नानां सकृद्धर्मनिर्देशरूपत्वेनाधिकविशेषानुप्रवेशादिति " [प्र०] ।

नियतानां सकृद्धर्मः सा पुनस्तुल्ययोगिता ॥ १८ ॥

नियतानां प्राकरणिकानामेव अप्राकरणिकानामेव वा । क्रमेणोदाहरणम्—

पाण्डु क्षामं वदनं हृदयं सरसं तवालसं च वपुः ।
आवेदयति नितान्तं क्षेत्रियरोगं सखि हृदन्तः ॥ ६९ ॥
कुमुदकमलनीलनीरजालिर्ललितविलासजुषोर्दृशोः पुरः का ।
अमृतममृतरश्मिरम्बुजन्म प्रतिहतमेकपदे तवाननस्य ॥ ७० ॥

उपमानाद्यदन्यस्य व्यतिरेकः स एव सः ।

अन्यस्योपमेयस्य व्यतिरेक आधिक्यम् ।

नियतानामिति । नियतानां प्राकरणिकानामेव अप्राकरणिकानामेव वा । धर्म इत्यनन्तरं 'यदुपादीयते' इति शेषः । सकृत्पदोपादानाद्यत्र प्रतिस्वं भिन्नाः धर्मा एकस्यैव वा सर्वत्रोपादानं तत्र नातिप्रसंगः । तत्र प्राकरणिकानामेव यथा—" [प्र०] ।

पांड्विति । " हे सखि, तव पाण्डुक्षामं वदनं सरसमन्नरससहितं स्निग्धं च हृदयं अलसमालस्ययुक्तं वपुश्च हृदन्तः हृदयमध्ये नितान्तमत्यर्थं क्षेत्रियरोगमावेदयतीत्यन्वयः " [चं०] । " क्षेत्रियरोगो राजयक्ष्मा अन्यस्मिन्क्षेत्रे देहान्तरे चिकित्स्यः । पक्षे नृपपतिविषयोऽनुरागः " [सं०] ।

" अत्र प्रकृतानां विरहिणीवदनादीनामेव धर्मत्वेनावेदनाख्यो धर्म उपात्तः । न तूपमानरोगधर्मतया । अप्राकरणिकानामेव यथा—[प्र०] ।

" कुमुदेति । नायिकां प्रति नायकस्योक्तिरियम् । हे कान्ते ललितविलासजुषोः मनोहरकटाक्षादिचेष्टाभाजोः तव दृशोः नेत्रयोः पुरः अग्रे कुमुदानि श्वेतकमलानि, कमलानि (अर्थात्) रक्तकमलानि नीलनीरजानि नीलकमलानि च तेषां आलिः पङ्क्तिःका कः पदार्थः न मनागपि शोभते इत्यर्थः । अत्र प्रसादे कुमुदसाम्यं माने रक्तकमलसाम्यं प्रकृतदशायां नीलनीरजसाम्यमिति बोध्यम् । किं च तव आननस्य पुरः अमृतं पीयूषं अमृतरश्मिश्चन्द्रः अम्बुजन्म पद्मं च एकपदे युगपदेव प्रतिहतं निर्जितमित्यर्थः " [झ०] ॥ " अत्र कामिन्या वर्णनीयत्वादप्राकरणिकानां कुमुदादीनामेव धर्मतया पूर्वार्धेकापदव्यङ्ग्योऽधिक्षेप उत्तरार्धे प्रतिहतत्वं चोपात्तम् " [प्र०]

उपमानादिति । यत्र उपमेयस्य उपमानात् व्यतिरेकः, विशेषणातिरेक आधिक्यम् । स एव व्यतिरेक एव । पुरातनैरालङ्कारिकैस्तु उपमेयादुपमानस्य

उपमानादुपमेयस्य वा आधिक्ये व्यतिरेकः स्वीकृतः। तथा चाहोद्भटः–"विशेषापादनं यत्स्यादुपमानोपमेययोः" (२. ६)। व्याख्यातमिदं चेन्दुराजेन–"उपमानोपमेययोः परस्परं यत्र विशेषः ख्याप्यते स व्यतिरेकः । तत्र ह्युपमानादुपमेयस्योपमेयादुपमानस्य वा केनचिद्विशेषेणातिरेक आधिक्यं तस्माद्व्यतिरेकः । " रुद्रटरुय्यकावपि उपमानस्योपमेयादाधिक्येऽपि व्यतिरेकं आहतुः। उभाभ्यां च'क्षीणः क्षीणोऽपि' इत्यादिपद्यमुदाहृतम् । तदेतद् ग्रन्थकृत् खण्डयति।

क्षीणः क्षीणोऽपि शशी भूयो भूयो विवर्धते नित्यम् ।
विरम प्रसीद सुन्दरि यौवनमनिवार्ति यातं तु ॥ ७१ ॥

इत्यादावुपमानस्योपमेयादाधिक्यमिति यत् केनचिदुक्तम्, तदयुक्तम्। अत्र यौवनगताऽस्थैर्याधिक्यं हि विवक्षितम् ।

"कश्चित्तु —'यत्रोपमेयादुपमानस्य उपमानादुपमेयस्य वा आधिक्यं स व्यतिरेक इति लक्षणम् । कथमन्यथा—क्षीण इत्यादिसंग्रहः । अत्र ह्युपमानभूतस्य शशिन उत्कर्षः । क्षैण्येऽपि पुनर्वृद्धेः ' इत्याह । तन्न युक्तम् । अस्थैर्ये हि तस्योपमानता तदाधिक्यं चोपमेये यौवन एवात्र विवक्षितम् । तस्मादुपमानस्योत्कर्षे व्यतिरेक इति रिक्तं वचः " [प्र०] । " अस्थैर्ये हीति । अयं भावः । न ह्यत्र चंद्रयौवनयोः सादृश्यम् । किं तु तत्क्षययोः । तत्र चन्द्रक्षयस्य वृद्धिबाध्यतया न्यूनत्वम्। यौवनक्षयस्य त्वबाध्यतयाधिक्यम्। मानप्रसादनानुगुणतया प्रकृतवाक्यार्थानुगुणत्वात् इति। अस्थैर्यं क्षयः । एवं ह्यत्र वाक्यार्थः । चंद्रो हि पुनःपुनरागमनेन लोके सुलभोऽतो न तादृशमाहात्म्यशाली। इदं पुनर्यौवनमपुनरागमेनातिदुर्लभमिति मानादिभिरंतरायैर्विदग्धया भवत्या मुधा गमयितुं न सांप्रतमिति । अन्यथा ' किमिति अस्य कदर्यस्य यौवनस्य कृते मया मानाद्विरंस्यते यातु नाम यौवनम् ' इति प्रतिकूलेनार्थेन प्रकृतार्थस्यापुष्टतापत्तेः । प्रियहितकारिण्या दूत्या हीदं वचनम्। एतेन 'रक्तस्त्वं नवपल्लवैरहमपि श्लाघ्यैः प्रियाया गुणैस्त्वामायांति शिलीमुखाः स्मरधनुर्मुक्ताः सखे मामपि । कांतापादतलाहतिस्तव मुदे तद्वन्ममाप्यावयोः सर्वं तुल्यमशोक केवलमहं धात्रा सशोकः कृतः ॥ ' इत्यत्रोपमेयन्यूनतापर्यवसायी व्यतिरेक इत्यपास्तम्। सशोकत्वेन तद्रम्यचेतनत्वसहृदयत्वादिभिर्गुणाधिक्यस्यैव सत्त्वात्। न च न्यूनत्वपदेनापकर्षो विवक्षितः। स च शोकस्य स्वरूपेणापकृष्टत्वादस्त्येव।

वाच्यार्थबोधकालिकोत्कर्षापकर्षयोरेव तदलंकाररूपत्वादिति वाच्यम्। प्रकृतवाक्यार्थानुगुणधर्मवत्त्वस्यैवात्राधिक्यपदार्थत्वात्। 'परमचेतनत्वमेव सम्यक् न पुनः प्रियावियोगादिजन्यशोकास्पदं चैतन्यादि' इति पर्यवसानेन तस्य प्रकृतवाक्यार्थभूतविरहानुगुणत्वात्। अत एव प्रियावियोगाद्यपि तुल्यमित्यर्थकमावयोः सर्वं तुल्यमिति वाक्यं चरितार्थम्। एतेनोपमालंकारदूरीकरणमेवात्र चमत्कारि। रसाद्यनुकूलतया कुतश्चिदंगात् भूषणापसरणमिव रसानुसारेण क्वचिदलंकारवियोगोऽपि शोभावह इति ध्वनिकृदुक्तमपास्तम्। एवं 'हनूमदाद्यैर्यशसा मया पुनर्द्विषां हसैर्दूत्यपथः सितीकृतः' (नैषध ९. १२३) इत्यत्र नलमहीपतेः स्वनिंदया लब्धनिर्वेदातिशयरूपप्रकृतवाक्यार्थे दूत्यगतन्यूनताया एवानुगुणत्वेनाधिक्यरूपत्वात्" [उ०]।

हेत्वोरुक्तावनुक्तीनां त्रये साम्ये निवेदिते ॥ १९ ॥
शब्दार्थाभ्यामथाक्षिप्ते श्लिष्टे तद्वत्त्रिरष्ट तत्।

व्यतिरेकस्य हेतुः उपमेयगतमुत्कर्षनिमित्तम्, उपमानगतमपकर्षकारणम्, तयोर्द्वयोरुक्तिः, एकतरस्य द्वयोर्वा अनुक्तिरित्यनुक्तित्रयम्, एतद्भेदचतुष्टयमुपमानोपमेयभावे शब्देन प्रतिपादिते; आर्थेन च क्रमेणोक्ताश्चत्वार एव भेदाः; आक्षिप्ते चौपम्ये तावन्त एव; एवं द्वादश। एते श्लेषेऽपि भवन्तीति चतुर्विंशतिभेदाः।

क्रमेणोदाहरणम्—

असिमात्रसहायस्य प्रभूतारिपराभवे।
अन्यतुच्छजनस्येव न स्मयोऽस्य महाधृतेः ॥ ७२ ॥

अत्रैव तुच्छेति महाधृतेरित्यनयोः पर्यायेण युगपद्वाऽनुपादानेऽन्यत् भेदत्रयम्। एवमन्येष्वपि द्रष्टव्यम्। अत्र इवशब्दस्य सद्भावाच्छाब्दमौपम्यम्।

असिमात्रसहायोऽपि प्रभूतारिपराभवे।
नैवान्यतुच्छजनवत्सगर्वोऽयं महाधृतिः ॥ ७३ ॥

अत्र तुल्यार्थे वतिरित्यार्थमौपम्यम्।

इयं सुनयना दासीकृततामरसश्रिया।
आननेनाकलङ्केन जयन्तीन्दुं कलङ्किनम् ॥ ७४ ॥

अत्रेवादि-तुल्यादि-पदविरहे आक्षिप्तैवोपमा ।

जितेन्द्रियतया सम्यग्विद्यावृद्धनिषेविणः ।
अतिगाढगुणस्यास्य नाब्जवद्भङ्गुरा गुणाः ॥ ७५ ॥

अत्रेवार्थे वतिः । गुणशब्दः श्लिष्टः । शाब्दमौपम्यम् ।

"एनं विभजते । व्यतिरेकस्य द्वौ हेतू । उपमेयगतमुत्कर्षनिमित्तमुपमानगतमपकर्षनिमित्तं च; तयोर्द्वयोरप्युपादानमित्येकः प्रकारः । अनुपादाने तु त्रयो भेदाः । प्रथमस्यैव द्वितीयस्यैव उभयोरपि वा हेत्वोरनुपादानात् । तदेवं चत्वारो भेदाः । ते च प्रत्येकं त्रिधा । साधर्म्यस्य क्वचिदिवादिना शब्दशक्तेः प्रतिपादनात् । क्वचित्तुल्यादिशब्देनार्थशक्त्या । क्वचिदुभयाभावेऽप्याक्षेपेणेति द्वादश भेदाः । ते च प्रत्येकमश्लिष्टे श्लिष्टे च शब्दे इति चतुर्विंशतिभेदः स इत्यर्थः । तत्राश्लिष्टभेदेषु हेत्वोरुक्तौ शाब्दे साम्ये यथा—असीति" [प्र०] असिः खड्गः एव सहायो यस्य तस्य महाधृतेर्महाधैर्यस्य प्रभूताः येऽरयः तेषां पराभवे सति अन्यतुच्छजनस्येव स्मयः गर्वः न ।

"अत्रोपमाने तुच्छत्वमुपमेये महाधृतित्वं च हेतू । इवशब्दसत्त्वाच्च शाब्दमौपम्यम् । अत्रैव तुच्छत्वमात्रस्य महाधृतित्वमात्रस्य वा द्वयोरपि वा क्रमेणानुपादाने हेत्वनुपादानभेदत्रयेऽपि शाब्दौपम्यभेदत्रयं द्रष्टव्यम् । हेतुद्वयोपादान एवार्थसाम्ये यथा–असिमात्रसहायोऽपीति ।

अत्र तुल्यार्थे वतिरित्यार्थमौपम्यम् । अत्र पूर्ववदनुपादानभेदत्रयं द्रष्टव्यम् । हेत्वोरुक्तावेवाक्षिप्ते साम्ये यथा—इयमिति" [प्र०] । इयं सुनयना दासीकृता तामरसस्य पद्मस्य श्रीर्येन तेन अकलंकेन आननेन कलंकिनमिन्दुं जयति । "अत्राकलंकित्वकलङ्कित्वे हेतू समुपात्तौ । इवादीनां तुल्यादीनां वाऽभावादाक्षिप्तमौपम्यम् । अत्रैव हेत्वनुपादाने भेदत्रयं पूर्ववत् द्रष्टव्यम् । न चाक्षिप्तभेद उपमायां शंकनीयः । जयत्यादिशब्दस्यावश्यकतया व्यतिरेकेण विषयापहारात् । अथ श्लिष्टभेदेषु हेत्वोरुक्तौ शाब्दमौपम्यं यथा—जितेन्द्रियेति" [प्र० ।

विद्या च वृद्धाश्च तन्निषेविणः अस्य जितेन्द्रियतया अतिगाढो विरोधिसहस्रैरप्यनुच्छेद्यः गुणो धैर्यादिर्यस्य । गुणाः पण्डितत्वादयः अब्जवत् कमलस्य तन्तव इव भंगुराः नश्वराः न । "अत्र श्लिष्टो गुणशब्दः । तदर्थस्यातिगाढत्वभंगुरत्वे च हेतू समुपात्ते । इवार्थे वतिरिति शाब्दमौपम्यम् । अत्रैव पूर्ववदनुपादाने भेदत्रयं द्रष्टव्यम्" [प्र०] ।

अखण्डमण्डलः श्रीमान्पश्यैष पृथिवीपतिः ।
न निशाकरवज्जातु कलावैकल्यमागतः ।। ७६ ।।

अत्र तुल्यार्थे वतिः कलाशब्दः श्लिष्टः ।

मालाप्रतिवस्तूपमावत् मालाव्यतिरेकोऽपि संभवति, तस्यापि भेदा एवमूह्याः, दिङ्मात्रं चोदाह्रियते, यथा—

हरवन्न विषमदृष्टिर्हरिवन्न विभो विधूतविततवृषः ।
रविवन्न चातिदुःसहकरतापितभूः कदाचिदसि ।। ७७ ।।

अत्र तुल्यार्थे वतिः । विषमादयश्च शब्दाः श्लिष्टाः ।

नित्योदितप्रतापेन त्रियामामीलितप्रभः ।
भास्वताऽनेन भूपेन भास्वानेष विनिर्जितः ।। ७८ ।।

अत्र ह्याक्षिप्तैवोपमा । भास्वतेति श्लिष्टः । यथा वा—

तत्रैवार्थे साम्ये यथा-' अखण्डेति ' । अखण्डं मण्डलं राष्ट्रं बिम्बं च यस्य सः । श्रीः सम्पत्तिः शोभा चास्यास्तीति । निशाकरवत् चन्द्रवत् कलानां कौशलानां चन्द्रषोडशांशानां च वैकल्यं नाशं जातु कदापि न आगतः प्राप्तः । " अत्र कलाशब्दः श्लिष्टः । कलावैकल्यतदभावौ हेतू शब्दोपात्तौ तुल्यार्थे वतिरित्यार्थमौपम्यम् । अत्रानुपादानत्रयं चिन्त्यम् "[प्र०] । अत्राह उद्योतः । "चिन्त्यमिति । कलावैकल्यतदभावयोर्हेतुत्वेन तदनुपादाने श्लेषः किमाश्रयः स्यात् । हेतुभूतधर्मवाचकस्य तदाश्रयवाचकस्य वा श्लिष्टत्वे श्लिष्टभेद इति भावः । ' बहुलारिगतोऽप्येष श्रीमानुद्धतविक्रमः । न निशाकरवज्जातु दृश्यतां वसुधाधिपः ॥ ' इतिपाठेन बहुलशब्दे श्लेषसत्त्वात् अखण्डमंडलत्वकलावैकल्ययोर्हेत्वोरनुपादानेऽपि संभवत्येवानुपादानत्रयम् । बहुलः कृष्णपक्षः, विपुलश्चेत्यन्ये " [उ०] ।

अयमेव मालारूपो यथा-" हरवदिति । हे राजन् त्वं कदाचिदपि हरेण तुल्यं हरवत् विषमदृष्टिः त्रिलोचनः असमदृष्टिश्च नासि किन्तु समदृष्टिरेवेति भावः । हरिणा तुल्यं हरिवत् श्रीकृष्णवत् विधूतः क्षिप्तो विततो महान् वृषो वृषासुरो धर्मश्च येन एवं नासि किंतु सदा धर्मशील एवेति भावः । रविणा तुल्यं रविवत् अतिदुःसहाः ये कराः किरणाः राजग्राह्यभागाश्च तैः तापिता दाहं प्रापिता उद्वेजिता च भूः भूमिः भूमिस्थजनश्च एवं नासीत्यर्थः " [झ.] ।

"अत्र विषमदृष्टित्वमपकर्षहेतुरुपात्तः समदृष्टित्वमुत्कर्षहेतुर्नोक्तः । बहूपमाना-

पेक्षया आधिक्यवर्णनान्मालाऽत्रेति बोध्यम्" [उ०]। तत्रैवाक्षिप्ते साम्ये यथा "नित्योदितेति। प्रतापः पराक्रमः प्रकृष्टतापश्च। भास्वता कांतिमता रविणा च। त्रियामा रात्रिः" [उ०]।

"अत्र भास्वतेति प्रतापेति च श्लिष्टं पूर्वार्धोपात्तं हेतुद्वयम्। इवादेस्तुल्यादिशब्दानां चाभावादाक्षिप्तैवोपमा। अत्रैव पूर्ववदनुपादाने भेदत्रयं द्रष्टव्यम्। निर्जितजयत्यादिशब्दाभावेऽपि श्लिष्टविशेषणेनौपम्याक्षेपादप्ययं भेदःसंभवति। यथा—स्वच्छेति" [प्र०]।

स्वच्छात्मतागुणसमुल्लसितेन्दुबिम्बं
बिम्बप्रभाधरमकृत्रिमहृद्यगन्धम्।
यूनामतीव पिबतां रजनीषु यत्र
तृष्णां जहार मधु नाननमङ्गनानाम्॥ ७९॥

अत्रेवादीनां तुल्यादीनां च पदानामभावेऽपि श्लिष्टविशेषणैराक्षिप्तैवोपमा प्रतीयते। एवं जातीयकाः श्लिष्टोक्तियोग्यस्य पदस्य पृथगुपादानेऽन्येऽपि भेदाः संभवन्ति, तेऽपि अनयैव दिशा द्रष्टव्याः।

" यत्र वसन्ते रजनीषु रात्रिषु अतीव अत्यन्तं पिबतां पानकर्तॄणां चुम्बतां च यूनां तरुणानां तृष्णां पानेच्छां (मधुपानेच्छां अधरपानेच्छां च) मधु मद्यं (कर्तृ) जहार, अङ्गनानां नायिकानां आननं तु (कर्तृ) न जहारेत्यन्वयः। अधरपाने तृष्णा स्थितैवेति भावः। मधु आननं च कीदृशमित्याकांक्षायामुभयोः श्लिष्टविशेषणान्याह स्वच्छात्मतेत्यादिना। स्वच्छात्मता निर्मलस्वरूपत्वमेव गुणस्तेन समुल्लसितं प्रतिबिम्बितं इन्दुबिम्बं चन्द्रमण्डलं यत्र तादृशम्। आननपक्षेऽप्येवमेव। आननेऽपि कपोलयोश्चन्द्रप्रतिबिम्बात्। बिम्बं बिम्बिकाफलं पक्वं कन्दुरूफलम्। तस्य या प्रभा कान्तिः तस्याः धरति बिभर्तीति धरं धारकम् जीर्णमधुनो रक्तत्वादिति भावः। आननपक्षे बिम्बप्रभः बिम्बफलप्रभोऽधरो दशनवासो यत्र तादृशम्। अकृत्रिमो गन्धान्तरयोगं विना मुखवासनादिकं विना च हृद्यो हृदयंगमो गन्धो यस्य यत्र वा तथाविधम्" [झ०]

"अंगनानामाननं मधुसदृशं हृद्यगन्धादिमत्त्वादित्येवं श्लिष्टविशेषणैरौपम्याक्षेपेऽपि तृष्णां जहार नाननमित्यतो वैलक्षण्यात् व्यतिरेक इति बोध्यम्। अत्र सर्वलोकलभ्यत्वपुण्यैकलभ्यत्वरूपौ तृष्णाहरणरूपोत्कर्षापकर्षहेतू नोक्तौ।

उक्तेषूदाहरणेषु अयमस्मादधिक इति व्यतिरेकाकारो गम्य एव। 'इंदोः पद्माच्चाधिकं मे प्रियाया वदनं मतम्। विलासैर्हृद्यगन्धैश्च' इत्यादौ तु वाच्य एव" [उ०]

निषेधो वक्तुमिष्टस्य यो, विशेषाभिधित्सया ॥ २० ॥
वक्ष्यमाणोक्तविषयः स आक्षेपो द्विधा मतः ।

विवक्षितस्य प्राकरणिकत्वादनुपसर्जनीकार्यस्य अशक्यवक्तव्यत्वमतिप्रसिद्धत्वं वा विशेषं वक्तुं निषेधो (निषेध इव) यः स वक्ष्यमाणविषय उक्तविषयश्चेति द्विधा आक्षेपः। क्रमेणोदाहरणम्—

ए एहि किंपि कीएवि कएण णिक्किव भणामि अलमहवा।
अविआरिअकज्जारम्भआरिणी मरउ ण भणिस्सम् ॥ ८० ॥

[ए एहि किमपि कस्या अपि कृते निष्कृप भणामि अलमथ वा।
अविचारितकार्यारम्भकारिणी म्रियतां न भणिष्यामि ॥]

ज्योत्स्ना मौक्तिकदाम चन्दनरसः शीतांशुकान्तद्रवः
कर्पूरं कदली मृणालवलयान्यम्भोजिनीपल्लवाः।
अन्तर्मानसमास्त्वया प्रभवता तस्याः स्फुलिङ्गोत्कर-
व्यापाराय भवन्ति हन्त किमनेनोक्तेन न ब्रूमहे ॥ ८१ ॥

" **निषेध** इति। वक्तुमिष्टस्य प्राकरणिकत्वाद्वचनानर्हस्य यो निषेधः स आक्षेपः निषेधो निषेध इवेत्यर्थः। शब्दगत्या निषेधेऽप्यर्थगत्या विधेरेव प्रतिपत्तेः। तत्प्रयोजनमाह–विशेषाभिधित्सयेति। वक्ष्यमाणविषयेऽशक्यवक्तव्यत्वमुक्तविषयेऽतिप्रसिद्धत्वं चेति विशेषः। विभजते–वक्ष्यमाणेति। तत्र वक्ष्यमाणविषयो यथा—ए एहीति" [प्र०]।

" किमपि तत्पीडातिशयरूपम्। ए इति सामर्षं संबोधनम्। अलमथवेति पूर्वाक्षेपे। अविचारितेत्यादि तु त्वत्प्रेम्णः स्थैर्यास्थैर्ये अविचार्यैव प्रवृत्तेत्यर्थकम्। अलमित्यनेनैव निषेधलाभे 'न भणिष्यामि' इति पुनः कथनं खेदातिशयद्योतकम्। अत्र नायिकासंतापातिशयोऽवश्यं वक्तुमिष्टः, न चासौ विशिष्य वक्तुं शक्य इति व्यञ्जयितुं निषिद्धः। नायकं प्रति दूत्युक्तिः। एवमग्रेऽपि। [उक्तविषयो यथा–] **ज्योत्स्नेति**। ज्योत्स्ना चन्द्रिका। मौक्तिकदाम मुक्ताहारः। शीतांशुकांतद्रवः चन्द्रकांतमणिजलम्। आः इति खेदे। अंतर्मानसम्

मानसमध्ये । प्रभवता दाहकरणसमर्थेन । प्रवसतेति वा पाठः । त्वं... करणभूतेन । अतो दुःसमाधानत्वम् । प्रभवतेति पाठे प्रभोरनभियोज्यत्वम् । स्फुलिंगोत्करः अग्निकणसमूहः तस्य व्यापारः दाहोत्पादनम् तदर्थम् । अ... वियोगिनीनां ज्योत्स्नादि स्फुलिंगायते इत्यत्रातिप्रसिद्धत्वं विशेषं व्यंजयि... ज्योत्स्नादीन्युक्त्वा तत्कथनं प्रतिषिद्धम् । अत्र व्यंग्येनाशक्यवक्तव्यत्वादिना व्यंजकं वाच्यमेव चारुत्वमावहतीति गुणीभूतव्यंग्यता । यत्तु वामनेन ' उपमेये सति किमुपमानेनेत्येवमुपमानाक्षेप आक्षेपः ' इत्युक्तम् । तत्तु वक्ष्यमाणप्रतीपरूपतया गतार्थम् । इत्याक्षेपः " [उ०] ।

क्रियायाः प्रतिषेधेऽपि फलव्यक्तिर्विभावना ॥ २१ ॥

हेतुरूपक्रियायाः निषेधेऽपि तत्फलप्रकाशनं विभावना । यथा—

कुसुमितलताभिरहताऽप्यधत्त रुजमलिकुलैरदष्टाऽपि ।
परिवर्तते स्म नलिनीलहरीभिरलोलिताऽप्यघूर्णत सा ॥ ८२ ॥

"वैयाकरणमते क्रियैव हेतुरिति क्रियेत्युक्तम् । वस्तुतस्तु कारणप्रतिषेधे कार्यवचनं विभावना । न च विरोधः । स्वाभाविकत्वस्य कारणान्तरस्य वा विभावनात्" [प्र०] । " कार्यस्य कविना प्रतिपादनं न तु भवनम् । हेतुं विना कार्योत्पत्त्यसंभवात् । अत्र प्रसिद्धतरहेत्वनुपलब्धिर्हेत्वभावः । अप्रसिद्धस्तु हेतुर्वस्तुतोऽस्त्येव । अत एव विशिष्टतया प्रसिद्धतरहेत्वनुपलब्धिरूपया कार्यस्य भावना पर्यालोचना विभावना " [सं०] ।

" न कठोरं न वा तीक्ष्णम् " इत्यादावपि कठोरत्वादिविशिष्टायुधस्य जयहेतोरभावेऽपि कार्यकथनाद्विभावनैव । अतिशयोक्तिस्तु तदंगम् । ननु कारणाभावे कार्योत्पत्तौ स्फुरितस्य विरोधस्य प्रसिद्धातिरिक्तेन कारणेन परिहाराद्विरोधाभास एवायमिति चेन्न । समबलयोः परस्परविरोधे तत्स्वीकारात् । इह तु कारणविरहेण कार्यमेव बाध्यत्वेन गम्यते । न तु तेन कारणविरह इति विशेषात् " [उ०] ।

कुसुमितेति । नायिकायाः विरहावस्थावर्णनम् । सा नलिनीत्याख्या नायिका कुसुमितलताभिः पुष्पितलताभिः अहता अताडिता अपि रुजं पीडां अधत्त धृतवती । अलिकुलैः भ्रमरकुलैः अदष्टा अपि परिवर्तते स्म परावृत्य वर्तते स्म । नलिनीलहरीभिः नलिनीयुक्ताभिर्लहरीभिः अलोलिता अचालिता अपि अघूर्णत

घूर्णनं भ्रमणं अकरोत्। अनुक्तनिमित्तेयम्। "लताहननं विरहिण्या रोगहेतुः। सा नलिनीति रूपकम्। भ्रमरदंशः परिवर्तनहेतुः। तरंगसंबंधो घूर्णनहेतुः। नलिनीयुक्ततरंगैरिति वार्थः। अत्र विरहरूपहेत्वंतरजनितानां रुजादीनां अन्यत्वेऽप्येकत्वाध्यवसायो विभावनामूलम्। स च प्रकृतेऽनाहार्यः। 'निरुपादानसंभारमभित्तावेव तन्वते। जगच्चित्रं नमस्तस्मै कलाश्लाघ्याय शूलिने॥' इत्यत्राहार्यो रूपककृतः। सर्वथा कार्यांशेऽभेदबुद्धिर्विभावनाजीवितम्। सा च क्वचिदतिशयोक्त्या क्वचिद्रूपकेणेत्यन्यत्। 'अप्यलाक्षारसासिक्तं रक्तं तच्चरणद्वयम्' इत्यत्र स्वाभाविकत्वेन परिहारः। अत्र कारणव्यतिरेकः प्रतिबन्धकसत्ताया अप्युपलक्षणम् तेन 'सातपत्रं दहत्याशु प्रतापतपनस्तव' इत्यत्राप्येषा। अत्रापि स्वभावमादाय विरोधपरिहारः। 'कार्यात् कारणजन्माऽपि विभावना' इत्यपास्तम्। उक्तनिमित्ताऽप्येषा। यथा 'यदवधि विलासभवनं यौवनमुदियाय चन्द्रवदनायाः। दहनं विनैव तदवधि यूनां हृदयानि दह्यन्ते॥'

अत्रोपात्ते यौवने दाहहेतुत्वं पर्यवस्यतीति दिक्" [उ०]॥

विशेषोक्तिरखण्डेषु कारणेषु फलावचः।

मिलितेष्वपि कारणेषु कार्यस्याकथनं विशेषोक्तिः। अनुक्तनिमित्ता, उक्तनिमित्ता, अचिंत्यनिमित्ता च। क्रमेणोदाहरणम्—

निद्रानिवृत्तावुदिते द्युरत्ने सखीजने द्वारपदं पराप्ते।
श्लथीकृताश्लेषरसे भुजंगे चचाल नालिङ्गनतोऽङ्गना सा॥ ८३॥
कर्पूर इव दग्धोऽपि शक्तिमान्यो जने जने।
नमोऽस्त्ववार्यवीर्याय तस्मै मकरकेतवे॥ ८४॥
स एकस्त्रीणि जगति जयन्ति कुसुमायुधः।
हरताऽपि तनुं यस्य शंभुना न हृतं बलम्॥ ८५॥

विशेषोक्तिरिति—"अखण्डेषु मिलितेषु प्रसिद्धकारणेष्वकेषु कार्याभाववचनं विशेषोक्तिः। अत्राप्यप्रसिद्धे कार्याभावहेतौ पर्यवसानाद्विरोधाभावः। सा च त्रिधा—अनुक्तनिमित्ता उक्तनिमित्ता अचिन्त्यनिमित्ता च" [प्र०]। तत्राद्या यथा—निद्रेति। सा अङ्गना निद्रायाः निवृत्तौ। द्युरत्ने सूर्ये उदिते। सखीजने द्वारपदं परासे प्राप्ते सति। भुजंगे उपपतौ च श्लथीकृतः शिथिलीकृतः आश्लेषरसः आलिङ्गनरसो येन तादृशे सति। सत्स्वप्येतेषु कारणेषु आलिङ्गनतः न चचाल। कृतमुपगूहनं न तत्याजेत्यर्थः।

" अत्रानुरागातिशयो निमित्तं चलनाभावे । स च विशिष्य वक्तुं शक्यत्वेऽपि नोक्त इत्यनुक्तनिमित्तेयम्। उक्तनिमित्ता यथा—कर्पूर इति।" [प्र०] बालरामायणे तृतीयाङ्के पद्यमेतदित्युद्योतः । यः मदनः हरेण दग्धोऽपि कर्पूर इव जने जने शक्तिमान् ईषद्दग्धस्य कर्पूरस्य सौरभातिशयात् । अवार्यं अकुण्ठितं वीर्यं बलं यस्य तस्मै मकरकेतवे मदनाय नमोऽस्तु । " अत्र शरीरदाहः शक्तिध्वंसे कारणम् । सत्यपि (तस्मिन्) तदनुत्पत्तिकथनम् " [उ०] ।

" अत्र ' कर्पूरो दाहमात्रे उपमानं न तु शक्तिमत्त्वेऽपि ' इति भास्करः । शक्तिमत्त्वे इति परमार्थः । ईषद्दग्धस्य तस्य सौरभाद्यतिशयात् ।

' भ्रूभ्यां प्रियाया भवता मनोभूचापेन चापे घनसारभावः ।
निजां यदप्लोषदशामपेक्ष्य संप्रत्यनेनाधिकवीर्यताऽऽर्जि ॥ '

नैषध ७.२५ ।

अत्रावार्यवीर्यत्वं शक्तिमत्त्वे कार्याभावरूपे हेतुरुक्तः " [प्र०] ।

" भ्रूभ्यामिति । मनोभूचापेन मदनबाणेन प्रियायाः दमयन्त्याः भ्रूभ्यां भ्रूयुगुलेन भवता भ्रूत्वं गच्छता सता घनो दृढो सारो मज्जा यस्य तद्भावः अतिदृढत्वं च आपे प्रापे । यदैव च भ्रूत्वं तदैव दृढत्वमिति चकारार्थः । पुष्पत्वदशायां निःसारस्यापि धनुषो भैमीभ्रूत्वदशायां ससारत्वं जातमित्यर्थः । कथं ससारत्वमित्यत आह । यद्यस्मात् निजां स्वीयां अप्लोषदशां अदाहावस्थां अपेक्ष्य संप्रति दग्धस्य भैमीभ्रूभवनसमयेऽनेन धनुषा अधिकवीर्यता अतिशयितपराक्रमत्वं आर्जि अर्जितम् । अदग्धपुष्परूपचापापेक्षया दग्धस्य श्यामीभवत्केसरशेषस्य भैमीभ्रूभवतस्तस्यैव चापस्य जगद्वशीकरणे अधिकसामर्थ्यदर्शनादेवमनुमीयते इति भावः । घनत्वं सारत्वं दृढत्वं श्रेष्ठत्वं च प्रापे इति वा । अथ च घनसारभावः कर्पूरत्वं च । यतः कर्पूरोऽपि निजांगदाहात् स्वीयपक्वावस्थामपेक्ष्यादाहावस्थायामधिकवीर्यतामतिशयितं सौगन्ध्यं शीतलत्व चार्जयति ' इति नैषधीयप्रकाशे स्पष्टम्। " [उ०] ॥

" अचिन्त्यनिमित्ता यथा—स एक इति । अत्र तनुहरणेऽपि बलाहरणस्य हेतुर्विशिष्य वक्तुं न शक्यत इत्यचिन्त्यनिमित्तेयम् " [प्र०] ॥

यथासंख्यं क्रमेणैव क्रमिकाणां समन्वयः ॥ २२ ॥

यथा--

एकस्त्रिधा वससि चेतसि चित्रमत्र
देव द्विषां च विदुषां च मृगीदृशां च ।
तापं च संमदरसं च रतिं च पुष्णन्
शौर्योष्मणा च विनयेन च लीलया च ॥ ८६ ॥

" क्रमेण । उपदेशक्रमेण । पूर्वस्य पूर्वेण मध्यस्य मध्येनांत्यस्यांत्येनेत्येवमित्यर्थः । अन्वयिसमसंख्यपदार्थज्ञानस्य यथासंख्यान्वयबोध्यत्वं कार्यतावच्छेदकम् । यद्यपि कविप्रतिभानिर्मितत्वस्यालंकारताजीवातोर्लेशतोऽप्यभावादस्य नालंकारत्वम् । तथापि एकत्र पद्ये बहूनां क्रमान्वये वैचित्र्यादलंकारत्वेनोक्तः । एक इति । राजानं प्रत्युक्तिः । हे देव राजन् एकः त्वम् द्विषाम् शत्रूणाम्, विदुषाम् पंडितानाम्, मृगीदृशाम् स्त्रीणां च चेतसि त्रिधा प्रकारत्रयेण वससि । अत्र एतद्विषये चित्रम् आश्चर्यम् । शौर्योष्मणा प्रतापाग्निना, विनयेन नम्रतया, लीलया विलासेन च क्रमेण तापम् सन्तापम् , सम्मदरसम् आनन्दरसम्, रतिं प्रीतिं च पुष्णन् सन् इत्यर्थः । " [उ०] ॥

सामान्यं वा विशेषो वा तदन्येन समर्थ्यते ।
यत्र सोऽर्थान्तरन्यासः साधर्म्येणेतरेण वा ॥ २३ ॥

साधर्म्येण वैधर्म्येण वा सामान्यं विशेषेण यत् समर्थ्यते, विशेषो वा सामान्येन, सोऽर्थान्तरन्यासः । क्रमेणोदाहरणम्—

" सामान्यमिति । सामान्यं यद्विशेषेण समर्थ्यते विशेषो वा सामान्येन सोऽर्थान्तरन्यासः । द्वयोरपि प्रत्येकं समर्थनहेतुः साधर्म्यं वैधर्म्यं चेति चतुःप्रकारोऽयमित्यर्थः " [प्र०]॥

" सामान्यमिति । अनुपपद्यमानतया संभाव्यमानस्यार्थस्योपपादनार्थं यदर्थान्तरं न्यस्यते सोऽर्थान्तरन्यासः । दृष्टान्ते तु सामान्यं सामान्येन विशेषो विशेषेण समर्थ्यते इति ततो भेदः । साक्षाद्व्याप्त्यादेरनभिधानादनुमानतो भेदः । कविनिबद्धप्रमात्रन्तरनिष्ठानुमितेरेवानुमानालंकारविषयत्वाच्च" [उ०]॥

निजदोषावृतमनसामातिसुन्दरमेव भाति विपरीतम् ।
पश्यति पित्तोपहतः शशिशुभ्रं शङ्खमपि पीतम् ॥८७ ॥
सुसितवसनालङ्कारायां कदाचन कौमुदी-
महसि सुदृशि स्वैरं यान्त्यां गतोऽस्तमभूद्विधुः ।

तदनु भवतः कीर्तिः केनाप्यगीयत, येन सा
प्रियगृहमगान्मुक्ताशंका, क्व नासि शुभप्रदः ॥ ८८ ॥
गुणानामेव दौरात्म्याद्धुरि धुर्यो नियुज्यते ।
असंजातकिणस्कन्धः सुखं स्वपिति गौर्गलिः ॥ ८९ ॥
अहो हि मे बह्वपराद्धमायुषा यदप्रियं वाच्यमिदं मयेदृशम् ।
त एव धन्याः सुहृदः पराभवं जगत्यदृष्ट्वैव हि ये क्षयं गताः ॥९०॥

तत्र विशेषेण सामान्यसमर्थनं साधर्म्येण यथा—**निजदोषेति** । निजदोषावृतमनसां स्वदोषव्याप्तचित्तानां पुरुषाणां । एवकारोऽप्यर्थः । अतिसुन्दरमपि विपरीतं असुन्दरं भाति । पित्तोपहतः पित्तव्याप्तः शशिवत् शुभ्रं शङ्खमपि पीतं पश्यति । " अत्र निजदोषेत्यादि सामान्यं शंखपीतिम्ना विशेषेण समर्थितम् " [उ०] ॥

सामान्येन विशेषसमर्थनं साधर्म्येण यथा—" **सुसितेति** । राजानं प्रति कवेरुक्तिः । हे राजन्, सुदृशि शोभननयनायां कस्यांचन नायिकायां कदाचन सिंदमवश्चिसरेक कौमुदीमहसि चन्द्रिकोद्योते स्वैरं शङ्काराहित्येन स्वच्छन्दं यान्त्यां ज्योत्स्नाभिसारं कुर्वत्यामित्यर्थः । अत एव सुसिता अतिश्वेता वसनालङ्कारा वस्त्रसहिता अलङ्कारा यस्यास्तथाभूतायां सत्यां विधुश्चन्द्रोऽस्तंगतोऽभूत् । तदनु तदनन्तरं केनापि भवतः कीर्तिरगीयत गीता । येन कीर्तिगानेन तज्ज्योत्स्नाप्रकाशात्साभिसारिका मुक्ता आशङ्का श्वेताभरणैर्लोकदृश्यत्वभयं यया तथाभूता सती पतिगृहमगात् । अतस्त्वं कस्मिन्देशेऽवसरे वा शुभप्रदो नासि न भवसि । अपि तु सर्वत्रेत्यर्थः " [चं०] । " सुसितेत्यादिनाऽभिहितो विशेषः क्व नासीत्यादिना सामान्येन समर्थितः " [उ०] ।

विशेषेण सामान्यसमर्थनं वैधर्म्येण यथा—**गुणानामिति** । गुणानामेव दौरात्म्यादपराधात् धुर्यः तद्वहनक्षमः धुरि कार्यभारे नियोज्यते । असंजातकिणस्कन्धः । न संजातः किणः घर्षणचिह्नं स्कन्धे यस्य सः । गलिः कार्यकरणासमर्थः गौः वृषभः सुखं आनन्देन स्वपिति । " अत्र धुर्य इत्यादि साधारण्यात्सामान्यम् । गौर्गलिरिति विशेषः । वैधर्म्यं च स्फुटम् " [प्र०] ।

वैधर्म्येण विशेषस्य सामान्येन समर्थनं यथा—**अहो इति** । " आपन्नं सुहृदं प्रति तदवस्थोचितं अप्रियं वदतः खेदातिशयात् स्वजीवितं निन्दतः

कस्यचिदुक्तिः " [उ०] । " अभिमन्युमरणवार्तामर्जुनं प्रति कथयिष्यतः युधिष्ठिरस्य विषादोक्तिरियम् " इति महेश्वरः । " ते धन्या इति सामान्येनाहमधन्य इति वैधर्म्यद्वारा स्वायुरपराधरूपो विशेषः समर्थ्यते " [उ०] । स्पष्टम् ।

विरोधः सोऽविरोधेऽपि विरुद्धत्वेन यद्वचः ।

वस्तुवृत्तेनाविरोधेऽपि विरुद्धयोरिव यदभिधानं स विरोधः ।

जातिश्चतुर्भिर्जात्याद्यैर्विरुद्धा स्याद्गुणस्त्रिभिः ॥२४॥

क्रिया द्वाभ्यामथ द्रव्यं द्रव्येणैवेति ते दश ।

क्रमेणोदाहरणम्—

अभिनवनलिनीकिसलयमृणालवलयादि दवदहनराशिः ।
सुभग कुरङ्गदृशोऽस्या विधिवशतस्त्वद्वियोगपविपाते ॥ ९१ ॥

" वस्तुगत्या विरोधाभावेऽपि यद् द्वयोर्विरुद्धयोरिवाभिधानं स विरोधः । एनं विभजते—जातिरिति ।

" जात्याद्यैरिति जातिगुणक्रियाद्रव्यैः । त्रिभिरिति गुणक्रियाद्रव्यैः द्वाभ्यामिति क्रियाद्रव्याभ्याम् । यद्यपि गुणानामपि जात्या विरोधः संभवत्येव । तथापि जातेर्गुणविरोध एव प्रविष्टत्वाद्गुणस्त्रिभिरित्युक्तम् । एवं क्रिया द्वाभ्यामित्यपि द्रष्टव्यम् । तदयमर्थः—जातिनिरूपितो भेदश्चतुर्धा । गुणनिरूपितस्तु पूर्वभेदभिन्नस्त्रिधा । एवमग्रेऽपि " [प्र०] । " नित्यमेव द्रव्याश्रितत्वाज्जातेः न जातिद्रव्ययोर्विरोध इति ब्रुवन् रुद्रटो नवभेदीं (विरोधेनोक्तिं) मन्यते । तद्वार्तम् । जातेर्गुणाद्याश्रितत्वस्यापि भावात् " [सं०] ।

" यथाश्रुतशब्दोपस्थितिमहिम्ना विरोधज्ञानेऽपि शब्दस्यान्यत्र तात्पर्यान्न विरोध इत्ययं विरोधाभास इत्युच्यते । विरोधश्चैकाधिकरणसंबद्धत्वेन प्रसिद्धयोरर्थयोर्भासमानैकाधिकरणासंबद्धत्वम् । एकाधिकरणासंबद्धत्वेन प्रसिद्धयोरेकाधिकरणसंबद्धत्वेन प्रतिपादनं वा । स च बाधबुद्ध्यनभिभूतो दोषस्य विषयः । तदभिभूतोऽलंकारस्येति बोध्यम् । क्रियेति । क्रियाशब्देनाऽत्र धातुवाच्योऽर्थः " [उ०] ।

" अभिनवेति । हे सुभग, विधिवशतो दैववशतो वियोग एव पविर्वज्रं

तस्य पाते सति नूतननलिन्यादिकं (अभिनवा नूतना नलिनी कमलिनी किसलयं मृणालं बिसं तस्य वलय कङ्कणं चेत्यादिकं अस्याः कुरङ्गदृशः मृगाक्ष्याः दवदहनराशिः) दावानलराशिरूपं भवतीति शेषपूरणेनान्वयः। " [चं०]। " अत्र नलिनीत्वकिसलयत्वादिजातीनां दहनत्वजात्या विरोधः। वियोगातिशयेन गौणत्वात्तदाभासता। एवमग्रेऽप्यूह्यम् " [प्र०]।

ननु नलिन्यादीनां दवदहनेन सहाभेदारोपणाद्रूपकमत्रालङ्कारः। अन्यथा मुखं चन्द्र इत्यादिरूपकेष्वपि विरोधालङ्कारप्रसङ्गः। उच्यते—चमत्कारस्यैवालङ्कारजीवातुभूतत्वात् यत्र विरोधः प्राधान्येन चमत्कृतिं जनयति तत्र विरोधः, यत्र च अभेदारोपणं चमत्कारजनकं तत्र रूपकम्।

गिरयोऽप्यनुन्नतियुजो मरुदप्यचलोऽब्धयोऽप्यगम्भीराः।
विश्वंभराऽप्यतिलघुर्नरनाथ तवान्तिके नियतम् ॥ ९२ ॥
येषां कण्ठपरिग्रहप्रणयितां संप्राप्य धाराधर-
स्तीक्ष्णः सोऽप्यनुरज्यते च कमपि स्नेहं पराप्नोति च।
तेषां संगरसङ्गसक्तमनसां राज्ञां त्वया भूपते
पांसूनां पटलैः प्रसाधनविधिर्निर्वर्त्यते कौतुकम् ॥ ९३ ॥
सृजति च जगदिदमवति च संहरति च हेलयैव यो नियतम्।
अवसरवशतः शफरो जनार्दनः सोऽपि चित्रमिदम् ॥ ९४ ॥
सततं मुसलासक्ता बहुतरगृहकर्मघटनया नृपते।
द्विजपत्नीनां कठिनाः सति भवति कराः सरोजसुकुमाराः ॥९५॥

जातेर्गुणेन यथा—गिरय इति। हे नरनाथ राजन् तव अन्तिके तव समीपे त्वदपेक्षयेत्यर्थः। गिरयः पर्वताः अपि अनुन्नतियुजः उच्चत्वरहिताः। मरुत् वायुः अपि अचलः वेगरहितः। अब्धयः समुद्राः अपि अगंभीराः। विश्वंभरा पृथ्वी अपि अतिलघुः अपकृष्टगुरुत्वयुक्ता।

" अत्र गिरित्वादिजातीनामनुन्नतत्वादिगुणैर्विरोधः वर्णनीयातिशयविवक्षया तु परिहारः। विश्वंभरेति तु न जात्युदाहरणम् " [प्र०]।

जातेः क्रियया यथा—येषामिति। हे भूपते येषां तव शत्रूणां राज्ञां तीक्ष्णः तीक्ष्णधारः परुषश्च धराधरः खड्गः कण्ठपरिग्रहप्रणयितां आलिंगनप्रेमवत्तां संप्राप्य अनुरज्यते प्रीतियुक्तः रक्तवर्णः च भवति। कमपि अनिर्वचनीय

स्नेहं प्रेमाणं चिक्कणतां च पराप्नोति प्राप्नोति । तेषामेव संगरसङ्गसक्तमनसां सङ्गरसङ्गो युद्धप्राप्तिः तत्र सक्तं लग्नं मनो येषां तेषां त्वया पांसूनां धूलीनां पटलैः समूहैः प्रसाधनविधिः अलंकरणं निर्वर्त्यते क्रियते इति कौतुकम् आश्चर्यम् ।

" अत्र धाराधरत्वजातेरनुरागस्नेहपराप्तिक्रियाभ्यां विरोधः । लौहित्यचैक्कण्यार्थकत्वादविरोधः " [प्र०] । " एवं पांसुत्वजातेरलंकरणक्रियया विरोधः सोऽपि कण्ठं छित्त्वेत्यादि प्रागुक्तरीत्या परिहृत इति बोध्यम् " [झ०] ।

" तीक्ष्णत्वस्यानुरागेण विरोध इत्यपव्याख्यानम् । अनुदाहरणत्वप्रसङ्गात् " [प्र०] ।

"अनुदाहरणत्वेति । तीक्ष्णत्वस्य जातित्वाभावादिति भावः तीक्ष्णस्यापि क्वचिदनुरागदर्शनाच्चेत्यपि बोध्यम् " [उ०] ।

जातेर्द्रव्येण यथा—सृजतीति । " यः इदं जगत् हेलया लीलयैव (अनायासेनैव) नियतं यथा स्यात्तथा सृजति अवति रक्षति संहरति नाशयति च सोऽपि जनार्दनः अवसरवशतः कालवशात् शफरो मत्स्यो 'जातः' इति शेषः । इदं चित्रं आश्चर्यम् " [झ०] । अत्र शफरत्वजातेर्जनार्दनेन द्रव्येण विरोधः । स च लीलया सर्वसंभवात् मत्स्यशरीरपरिग्रहस्यागमसिद्धत्वादविरोधः । आत्मपरत्वाज्जनार्दनपदस्य द्रव्यपरत्वमिति प्रदीपोद्योतयोः स्पष्टम् ।

गुणस्य गुणेन यथा–सततमिति । हे नृपते सततं निरन्तरं मुसलेषु आसक्ताः बहुतरं यत् गृहकर्म रन्धनादि व्यापारः तस्य घटनया संपादनेन कठिनाः द्विजपत्नीनां कराः हस्ताः भवति दातरि सति सरोजवत् कमलवत् सुकुमाराः कोमलाः जाताः । " कठिनत्वकुसुमारत्वयोर्विरोधः " [प्र०] । "भवद्दानवशात् गृहव्यापारनिवृत्त्या तत्परिहारः " [उ०] ।

> पेशलमपि[1] खलवचनं दहतितरां मानसं सुतत्त्वविदाम् ।
> परुषमपि सुजनवाक्यं मलयजरसवत्प्रमोदयति ॥ ९६ ॥
> क्रौञ्चाद्रिरुद्दामदृषद्दृढोऽसौ यन्मार्गणाऽनर्गलशातपाते ।
> अभून्नवाम्भोजदलाऽभिजातःस भार्गवः सत्यमपूर्वसर्गः ॥ ९७ ॥
> परिच्छेदातीतः सकलवचनानामविषयः
> पुनर्जन्मन्यस्मिन्ननुभवपथं यो न गतवान् ।

---

१. पेलवमपि ।

विवेकप्रध्वंसादुपचितमहामोहगहनो
विकारः कोऽप्यन्तर्जडयति च तापं च कुरुते ॥ ९८ ॥

गुणस्य क्रियया यथा—**पेशलमपीति**। पेशलं सुन्दरं अपि खलवचनं सुतत्त्वविदां मानसं दहतितराम्। सुजनवाक्यं परुषं कठोरमपि मलयजस्य चन्दनस्य रसवत् प्रमोदयति आह्लादयति। "अत्र पेलवत्वपरुषत्वयोर्गुणयोर्दाहप्रमोदक्रियाभ्यां विरोधः। यथा वा मङ्क्षातुः श्रीहर्षस्य—

सर्वतः पुरत एव दृश्यते पात्रतां न पुनरेति चक्षुषोः।
हृद्गतोऽपि भुजयोर्न भाजनं कोऽयमालि वनमालिनः क्रमः॥

अत्र दर्शनगमनक्रिययोर्गमनाभावभुजभाजनत्वाभावाभ्याम्। उक्तत्रयातिरिक्तस्यैव गुणशब्देन विवक्षणात्। 'गिरयः' इत्यादि तथैवोदाहृतम्" [प्र०]।

उक्तत्रयेति। ननु नैयायिकादिमते अभावः गुणादिभ्यो भिन्नः सप्तमः पदार्थः, कथं तस्य गुणमध्ये परिगणनं कृत्वा गुणक्रिययोर्विरोधोदाहरणं पद्यमेतदिति चेत्—उच्यते। उक्तत्रयातिरिक्तस्येति। जातिद्रव्यक्रियातिरिक्तस्य सर्वस्यापि वैय्याकरणानामालङ्कारिकाणां च नये गुणत्वात्।

गुणस्य द्रव्येण यथा—**क्रौञ्चेति**। यस्य भार्गवस्य मार्गणानां बाणान अनर्गले प्रतिबन्धरहिते शातपाते शातवत् वज्रवत् पाते सति। उद्दामैः अतिमहद्भिः दृपद्भिः पाषाणखण्डैः दृढः असौ क्रौञ्चाद्रिः क्रौञ्चपर्वतः नवाम्भोजदलवत् नवकमलपत्रवत् अभिजातः कोमलः अभूत्। स भार्गवः परशुरामः अपूर्वसर्गः अपूर्वसृष्टिः इति सत्यम्। "यद्यपि कुमारः क्रौञ्चदारण इति कोशात् स्कन्दे तत्त्वं प्रसिद्धं तथापि स्कन्दसाहाय्यं भार्गवोऽपि तत्कृतवानिति पुराणे प्रसिद्धम्" [उ०]।

"अत्राम्भोजदलाभिजातत्वस्य गुणस्य क्रौञ्चाद्रिणा द्रव्येण विरोधः। क्रियायाः क्रियया यथा—**परिच्छेदेति**" [प्र०]।

"मालतीमाधवे मकरन्दं प्रति माधवस्य स्वावस्थाकथनमेतत्। परिच्छेद इयत्ता तमतीतस्तद्रहित इत्यर्थः। सकलानां सामान्यविशेषशक्तलाक्षणिकव्यांजनिकानां वचनानामविषयः। तैर्निर्वक्तुमशक्य इति भावः। पुनरन्यदा कालान्तरे अस्मिन् जन्मनि अनुभवपथं तद्विषयत्वं यो न प्राप्त इत्यर्थः। विवेकप्रध्वंसादिति। विवेको दोषगुणविभागः। प्रशब्देन समूलोन्मूलनलक्षणः

प्रकर्षस्तेन मोहप्रकर्षस्तेन च रागातिशयस्तेन च विप्रलम्भातिशयो व्यंग्यः । तद्धेतुकां उपचितिं वृद्धिं प्राप्तो यो महामोहः सकलविषयाणामज्ञानं विपरीतज्ञानं वा यत्र तादृशश्चासौ गहनश्च दुर्लंघ्य इत्यर्थः । ईदृशः कोऽप्यनिर्वचनीयः विकारः अन्तः अन्तःकरणं जडयति विषयग्राहिवृत्तिविषये स्तब्धं करोतीत्यर्थः । (शिखरिणी छन्दः ।) " [उ०]

अत्र " जडयति च तापं च कुरुत इति " क्रिययोर्विरोधः, [प्र०] । विरहवैचित्र्येण कालभेदात्तत्परिहार इत्युद्योतः ।

अयं वारामेको निलय इति रत्नाकर इति
श्रितोऽस्माभिस्तृष्णातरलितमनोभिर्जलनिधिः ।
क एवं जानीते निजकरपुटीकोटरगतं
क्षणादेनं ताम्यत्तिमिमकरमापास्यति मुनिः ॥ ९९ ॥

समदमतङ्गजमदजलनिस्यन्दतरङ्गिणीपरिष्वङ्गात् ।
क्षितितिलक त्वयि तटजुषि शंकरचूडापगाऽपि कालिन्दी ॥ १०० ॥

क्रियाया द्रव्येण विरोधो यथा—**अयमिति** । भल्लटकविकृते भल्लटशतके १०५ पद्यमिदम् । अयं जलनिधिः समुद्रः वारां जलानां एकः मुख्यो निलयः निधिः इति कारणात् । रत्नाकरः रत्ननिधिः इति कारणाच्च तृष्णया पिपासया रत्नेच्छया च तरलितं आक्रान्तं मनो येषां तैरस्माभिः श्रितः आश्रितः । किन्तु एवं को जानीते यन्मुनिरगस्त्यः निजा या करपुटी करसंपुटं तदेव कोटरं बिलं तद्गतं ताम्यन्तः ग्लायन्तः तिमयः मकराः मत्स्याश्च यत्र तादृशं एनं समुद्रं क्षणात् आ समन्तात् पास्यति । " अत्र पानक्रियायाः कर्मीभूतेन जलनिधिना विरोधः । यद्यपि जलनिधीनां बहुत्वेन न द्रव्यविरोधोदाहरणत्वमुचितं तथाप्येकलवणाम्बुधिपरतया समर्थनीयम् " [प्र०] ।

द्रव्यस्य द्रव्येण विरोधो यथा–**समदेति** । " हे क्षितितिलक, त्वयि तटजुषि तीरगते सति शंकरस्य चूडा मस्तकं तद्गता आपगा नदी गङ्गापि कालिन्दी यमुना भवति । कुतस्तत्राह—समदेत्यादि । (समदाः मदसहिताः) मतङ्गजाः करिणः तेषां मदजलनिस्यन्दः एव तरङ्गिणी नदी तत्परिष्वङ्गात् सम्बन्धात् ॥ मदजलस्य श्यामवर्णत्वं प्रसिद्धम् " [चं०] । अत्रगङ्गायमुनयोर्विरोधः स च कालिन्दीपदस्य श्यामाभामात्रपरत्वात् परिहृत इति प्रदीपोद्योतौ ।

स्वभावोक्तिस्तु डिम्भादेः स्वक्रियारूपवर्णनम् ॥ २५ ॥

स्वयोस्तदेकाश्रययोः । रूपं वर्णः संस्थानं च । उदाहरणम्—

" **स्वभावोक्तिरिति** । स्वत्वं च स्वमात्राश्रितत्वम् । न तु स्वाश्रितत्वमात्रम् । अतो न साधारणधर्मवर्णनेऽतिव्याप्तिः । रूपशब्देन वर्णः संस्थानं चोच्यते " [प्र०] ।

" **स्वमात्रेति** । डिम्भादेरित्यनेनैव संबंधावगतेः स्वशब्दोऽन्ययोगव्यवच्छेदक इति भावः । **रूपशब्देनेति** । अजहत्स्वार्थलक्षणयेति भावः । अत्र चमत्कृतिहेतुत्वमङ्कारसामान्यलक्षणप्राप्तम् । तेन 'पश्य चायं बलीवर्दो घासमत्ति मुखेन तु' इत्यादेर्निरासः । साधारणस्वभाववर्णनस्य स्फुटत्वान्नालङ्कारत्वम् । असाधारणस्तु लोकसिद्धोऽपि प्रतिभामात्रवेद्यत्वादलौकिकवद्भातीत्यलङ्कारः । डिम्भः शिशुः । आदिना युवतिमुग्धकातरतिर्यग्भ्रांतहीनपात्रादिसंग्रहः । एतामेव 'जातिः' इति केचिद्वदन्ति " [उ०] ।

पश्चादङ्घ्री प्रसार्य त्रिकनतिविततं द्राघयित्वाऽङ्गमुच्चै-
रासज्याभुग्नकण्ठो मुखमुरसि सटां धूलिधूम्रां विधूय ।
घासग्रासाभिलाषादनवरतचलत्प्रोथतुण्डस्तुरङ्गो
मन्दं शब्दायमानो विलिखति शयनादुत्थितः क्ष्मां खुरेण ॥ १०१ ॥

पश्चादिति । बाणभट्टकृते श्रीहर्षचरिते तृतीयोच्छ्वासे पद्यमिदम् । पश्चात् अंघ्री पश्चिमचरणौ प्रसार्य । त्रिकं पृष्ठवंशः तस्य नतिः नमनं तेन विततं विस्तृतं अङ्गं उच्चैः अतिशयेन द्राघयित्वा दीर्घं कृत्वा । आभुग्नकण्ठो वक्रग्रीवः उरसि वक्षःस्थले मुखं आसज्य संयोज्य धूलिधूम्रां रेणुधूसरां सटां ग्रीवाकेशराशिं विधूय कंपयित्वा घासग्रासस्य तृणग्रासस्य अभिलाषात् अनवरतं चलन् प्रोथः नासिका तुण्डं मुखं च यस्य सः । एतादृशः शयनादुत्थितः तुरङ्गः मंदं शब्दायमानः खुरेण क्ष्मां महीं विलिखति उत्किरति ।

" अत्राश्वमात्रगतयोः क्रियासंस्थानयोर्वर्णनम् " [प्र०] ।

व्याजस्तुतिर्मुखे निन्दा स्तुतिर्वा रूढिरन्यथा ।

व्याजरूपा व्याजेन वा स्तुतिः । क्रमेणोदाहरणम्—

हित्वा त्वामुपरोधवन्ध्यमनसां मन्ये न मौलिः परो
लज्जावर्जनमन्तरेण न रमामन्यत्र संदृश्यते ।

यस्त्यागं तनुतेतरां मुखशतैरेत्याश्रितायाः श्रियः
प्राप्य त्यागकृतावमाननमपि त्वय्येव यस्याः स्थितिः ॥ १०२ ॥

"व्याजस्तुरिति । मुखे निन्दावगतौ यत्स्तुतौ पर्यवसानं स्तुतेर्वा मुखेऽवगमो निन्दायां पर्यवसानं तद्व्याजस्तुतिपदवाच्यमित्यर्थः । कथमुभयोरनेनाभिधानमिति चेत्, आद्यस्य व्याजेन स्तुतिरिति ग्रहणात्, अन्त्यस्य तु व्याजरूपा स्तुतिरिति । तत्राद्या यथा—हित्वेति " [प्र०] । हे राजन् उपरोधवन्ध्यमनसां अनुरोधरहितचित्तानां मौलिः शिखरभूतः त्वां हित्वा त्यक्त्वा परोऽन्यः नेति मन्ये । अथ च रमां लक्ष्मीं अन्तरेण विना लज्जावर्जनं निर्लज्जत्वं न संदृश्यते । उभयत्र हेतुमाह—यो भवान् मुखशतैः युद्धादिभिः उपायशतैः एत्य आगत्य आश्रितायाः श्रियः लक्ष्म्याः त्यागं दानं तनुतेतराम् अतिशयेन विस्तारयति । यस्याश्च श्रियः त्यागकृतं दानजनितं अवमाननं तिरस्कारं प्राप्यापि त्वयि एव स्थितिर्निवासः । " राज्ञ आश्रितत्यागरूपनिंदाव्याजेन महादातृत्वेऽपि लक्ष्मीवत्त्वाभिधानात्स्तुतिः " [उ०] ।

हे हेलाजितबोधिसत्त्व वचसां किं विस्तरैस्तोयधे
नास्ति त्वत्सदृशः परः परहिताधाने गृहीतव्रतः ।
तृष्यत्पान्थजनोपकारघटनावैमुख्यलब्धायशो-
भारप्रोद्वहने करोषि कृपया साहायकं यन्मरोः ॥ १०३ ॥

तत्रान्त्या यथा—हे हेलेति । " हेलया जिता बोधिसत्त्वा बौद्धा येन सः अतिकारुणिकेत्यर्थः । तोयधे समुद्र । (वचसां विस्तरैः, बहुशब्दप्रयोगैः किम् । परेषां हिताधाने हितसाधने गृहीतव्रतः त्वत्सदृशः) परोऽन्यः (नास्ति) (यत् यस्मात्) तृष्यतां पान्थजनानामुपकारस्य घटनायां संपादने वैमुख्येन पराङ्मुखत्वेन लब्धं यदयशस्तद्भारस्य प्रोद्वहने मरोर्देशस्य कृपया साहायकं करोषीति स्तुतिपूर्विकेयं व्याजस्तुतिर्निन्दापर्यवसायिनी " [चं.] ।

" न चात्राऽप्रस्तुतप्रशंसैवास्तु । स्तुतिनिन्दात्मकतया विच्छित्तिविशेषात् । कार्यकारणभावादिसंबन्धाभावाच्च " [उ०] ।

सा सहोक्तिः सहार्थस्य बलादेकं द्विवाचकम् ॥ २६ ॥

एकार्थाऽभिधायकमपि सहार्थबलात् यत् उभयस्यावगमकं सा सहोक्तिः । यथा—

सह दिअहणिसाहिं दीहरा सासदण्डा
सह मणिवलएहिं बाहधारा गलन्ति ।
तुह सुहअ विओए तीअ उव्विग्गिरीए
सह अ तणुलदाए दुब्बला जीविदासा ॥ १०४ ॥

सह दिवसनिशाभिर्दीर्घाः श्वासदण्डाः सह मणिवलयैर्बाष्पधारागलन्ति। तव सुभग वियोगे तस्या उद्विग्नायाः सह च तनुलतया दुर्बला जीविताशा ॥

कर्पूर मं. २. ९.

श्वासदण्डादिगतं दीर्घत्वादि शाब्दम्, दिवस-निशादिगतं तु सहार्थसामर्थ्यात्प्रतिपद्यते ।

सेति । "शब्दशक्त्या एकार्थाभिधायकं पदं यत्सहार्थान्वयबलादनेकार्थाभिधायकं सा सहोक्तिः । 'चैत्रमैत्रौ गच्छतः' इत्यादौ तु शब्दशक्त्यैवोभयाभिधानम्" [प्र०] ।

"अत्र सहशब्दार्थः साहित्यम् एकजातीयैककालिकक्रियाद्यन्वयित्वसमनियतम् । 'पुत्रेण सहागतः' इत्यत्र पुत्रप्रतियोगिकसाहित्यवानागत इति शाब्दबोधः । तेन पुत्रवृत्त्यागमनसमानकालिकसमानदेशागमनवान् पितेति मानसो बोधः। तत्र तृतीयान्तस्य विशेषणतया गुणत्वम्। प्रथमान्तस्य विशेष्यतया प्रधानत्वम्। एवं च प्रथमान्ते आगमनस्य शाब्दोऽन्वयः। तृतीयान्ते तु सहार्थसामर्थ्यादार्थः। एवं च यत्र गुणप्रधानभावावच्छिन्नयोः शाब्दार्थमर्यादया एकधर्मसंबंधस्तत्रायमलङ्कारः । समुच्चये तूभयत्र प्राधान्यं, शाब्द एव चैकान्वय इति ततो भेदः । 'चैत्रमैत्रौ सह गच्छतः' इत्यादावपि तथैवेति नायमलङ्कारः" [उ०]।

सहेति । "हे सुभग सुन्दर तव वियोगे विरहे सति उद्विग्नायाः विमनस्कायाः तस्याः नायिकायाः दण्डाकाराः श्वासाः श्वासदण्डाः । श्वासानां घनप्रचुरतया दण्डाकारत्वम् । दिवसनिशाभिः सह दीर्घाः जाताः । अत्र दिवसनिशादौ दीर्घत्वं दुःखदायित्वादौपचारिकम् । तथा बाष्पो नेत्राम्बु तस्य धाराः मणिवलयैः रत्नकङ्कणैः सह गलन्ति पतन्ति। कार्श्यान्मणिवलयगलनम् । तथा जीविताशा जीवनाशा तनुलतया शरीरयष्ट्या सह दुर्बला जातेत्यर्थः" [झ०] । "अत्र दीर्घत्वादीनां श्वासादिभिरन्वयः साक्षादेव शाब्दः, दिवसादिभिस्तु सहान्वयबलात्" [प्र०] ।

विनोक्तिः सा विनाऽन्येन यत्रान्यःसन्न नेतरः ।

क्वचिदशोभनः, क्वचिच्छोभनः क्रमेणोदाहरणम्–

अरुचिर्निशया विना शशी शशिना साऽपि विना महत्तमः ।
उभयेन विना मनोभवस्फुरितं नैव चकास्ति कामिनोः ॥१०५॥
मृगलोचनया विना विचित्रव्यवहारप्रतिभाप्रभाप्रगल्भः ।
अमृतद्युतिसुन्दराशयोऽयं सुहृदा तेन विना नरेन्द्रसूनुः ॥१०६॥

" विनोक्तिरिति । अत्रापि विनाशब्दार्थ एव विवक्षितः । तेन नञ्–निर् वि-अन्तरेण-ऋते-रहित-विकलेत्यादिप्रयोगेऽपि इयमेव " [उ०] ।

" सन्न शोभनो न, नेतरो नाशोभन इत्यर्थः । तेन केनचिद्विना कस्यचिदशोभनत्वं शोभनत्वं वा प्रतिपाद्यते सा विनोक्तिः । तत्राशोभनत्वं यथा " [प्र०] ।

अरुचिरिति । निशया विना शशी अरुचिर्दीप्तिशून्यः । सा निशापि शशिना विना महदुत्कटं तमोऽन्धकारः । उभयेन चन्द्रनिशाभ्यां विना कामिनोः मनोभवस्फुरितं कामविलसितं नैव चकास्ति शोभते ।

शोभनत्वं यथा—मृगलोचनेति । अयं नरेन्द्रसूनुः राजपुत्रः मृगलोचनया विना–स्त्रिया विरहित इत्यर्थः—विचित्रेषु व्यवहारेषु या प्रतिभायाः बुद्धेः प्रभा प्रकाशः तेन प्रगल्भः चतुरः । तेन च सुहृदा विना अमृतद्युतिः चन्द्रः तद्वत् सुन्दराशयः स्वच्छान्तःकरणः । " अत्र मृगलोचनया दुष्टसुहृद्विशेषेण च विना नरेन्द्रसूनोर्विचित्रव्यवहारप्रगल्भत्वचन्द्रसुन्दराशयत्वरूपं शोभनत्वमुक्तम् " [प्र०] ।

" य एव राजपुत्रः स्त्रीमोहितः कृत्यविकलः स एव तया विनाऽतिव्यवहाराभिज्ञः । य एव दुष्टसुहृदालिंगितो विषमहृदयः स एव तेन विनाऽतिसदयहृदय इत्यर्थः " [उ०] ।

परिवृत्तिर्विनिमयो योऽर्थानां स्यात्समासमैः ॥२७॥

परिवृत्तिरलङ्कारः । उदाहरणम्:—

" परिवृत्तिरिति । परिवृत्तिरिति लक्ष्यालङ्कारनिर्देशः । पूर्वाचार्याणां तथैवोद्देशदर्शनात् । अतो न लक्ष्यलक्षणसंदेहः । समासमैरिति विभागः ।

विनिमयो हि केनचिद्वस्तुना दत्तेन कस्यचिदादानम्। तच्च क्वचित्समेन समस्य। क्वचिदसमेनासमस्य। अन्त्यमपि द्विधा—क्वचिन्न्यूनेनोत्तमस्य, क्वचिदुत्तमेन न्यूनस्येति त्रिविधेयमित्यर्थः। समासमत्वं चोपादेयत्वानुपादेयत्वाभ्याम्" [प्र०]।

"कस्यचिदादानमिति। परकीयस्य कस्यचिदादानमित्यर्थः। विनिमयपदस्य तत्रैव शक्तेः। एवमादाय दानमपि सा। दानादानव्यवहारः कविकल्पित एव न वास्तवस्तत्रालङ्कारत्वाभावात्। तेन 'क्रीणन्ति यत्र मुक्ताभिर्बदराण्यपि बालिकाः' इत्यत्र नेयम्। परकीयस्येत्युक्तेः 'किमित्यपास्याभरणानि यौवने धृतं त्वया वार्धकशोभि वल्कलम्' इत्यत्र नेयम्। विनिमयाभावात्" [उ०]।

लतानामेतासामुदितकुसुमानां मरुदयं
मतं लास्यं दत्वा श्रयति भृशमामोदमसमम्।
लतास्त्वध्वन्यानामहह दृशमादाय सहसा
ददत्याधिव्याधिभ्रमिरुदितमोहव्यतिकरम् ॥ १०७ ॥

अत्र प्रथमेऽर्धे समेन समस्य, द्वितीये उत्तमेन न्यूनस्य।

नानाविधप्रहरणैर्नृप संप्रहारे
स्वीकृत्य दारुणनिनादवतः प्रहारान्।
दृप्तारिवीरविसरेण वसुंधरेयं
निर्विप्रलम्भपरिरम्भविधिर्वितीर्णा ॥ १०८ ॥

अत्र न्यूनेनोत्तमस्य।

तत्राद्यद्वयं यथा—लतानामिति। अयं मरुद्वायुः एतासां उदितकुसुमानां लतानां मतं मनोरमं लास्यं नृत्यं दत्वा असमं अनुपमं आमोदं गन्धं भृशं श्रयति प्राप्नोति। अहह इति खेदे। लताः तु अध्वन्यानां पान्थानां सहसा दृशं आदाय हरणं कृत्वा तेभ्यः आधिः मनोव्यथा, व्याधिः कायपीडा, भ्रमिः दिग्भ्रमणदर्शको विकारः, रुदितं रोदनं, मोहः निश्चेष्टता, एषां व्यतिकरं समूहं ददति प्रयच्छन्ति। "अत्र प्रथमार्धे लास्येनोपादेयतया समास्यामोदस्य, द्वितीयार्धे उपादेयतया उत्तमया दृशा आधिव्याधीनामतादृशतया न्यूनानां विनिमयः" [प्र०]।

“ मरुत्संबंधेन लतानां लास्यदर्शनात् लतादर्शनेन च पथिकानामाध्यादि-दर्शनाद्दातृत्वं कविकल्पितम् ” [उ०] ।

अन्त्या यथा—“ नानेति । हे नृप दृप्तो दर्पयुक्तो (बलगर्वितः) योऽरिवीरविसरः शत्रुवीरसमूहस्तेन (कर्त्रा) संप्रहारे युद्धे नानाविधैः अनेक-प्रकारकैः प्रहरणैः आयुधैः दारुणनिनादवतः भयंकरशब्दयुक्तान् प्रहारान् ताडनानि स्वीकृत्य निर्गतो विप्रलम्भो वियोगो यस्मात्तादृशः (वियोगशून्यः) परिरम्भस्य (स्वस्वामिभावसंबन्धस्य) विधिः स्वीकारः प्रकारो वा यस्याः तादृशी इयं वसुंधरा वसुमती (भूमिः) वितीर्णा दत्ता अर्थात्तुभ्यमित्यर्थः ” [झ०] । “अत्रोत्तमया वसुंधरया न्यूनानां प्रहाराणां विनिमयः” [प्र०] ।

प्रत्यक्षा इव यद्भावाः क्रियन्ते भूतभाविनः ।

तद्भाविकम्

भूताश्च भाविनश्चेति द्वन्द्वः । भावः कवेरभिप्रायोऽत्रास्तीति भाविकम् । उदाहरणम्–

आसीदञ्जनमत्रेति पश्यामि तव लोचने ।
भाविभूषणसंभारां साक्षात्कुर्वे तवाकृतिम् ॥ १०९ ॥

अत्र आद्ये भूतस्य, द्वितीये भाविनो दर्शनम् ।

“**प्रत्यक्षा इति**। भूतभाविन इति द्वन्द्वः न कर्मधारय इत्यविरोधः । भूता भाविनो भावा यत्प्रत्यक्षा इव क्रियन्ते प्रत्यक्षतयाऽभिधीयन्ते तद्भाविकम् । भावः कवेरभिप्रायो निश्चयादिप्रतीतिविषयकोऽत्रास्तीति व्युत्पत्तेरित्यर्थः” [प्र०]

“**प्रत्यक्षतयेति**। अलौकिकप्रत्यक्षविषया अपि लौकिकप्रत्यक्षविषयतयेत्यर्थः। अभिप्रायो लौकिकप्रत्यक्षविषयत्वेन प्रतिपादनेच्छा । न चेयं भ्रांतिः । भूतभा-वित्वेनैव निर्देशात् । अंजनाद्यसत्त्वेऽपि तत्कृतशोभाद्यभिप्रायेण तथाप्रयोगाच्च । न चैवं स्वभावोक्तिः । तत्र वस्तुधर्मो वैचित्र्याधायकः । इह तु कवेस्तन्निबद्धस्य वाऽभिप्राय इति विशेषात् ” [उ०]

आसीदिति । हे कान्ते अत्र तव नेत्रयोः यत् अञ्जनं दत्तं आसीत् इति तद्युक्ते लोचने पश्यामीत्यर्थः । भावी भूषणानां संभारः समूहो यत्र तां तादृशीं तवाकृतिं साक्षात्कुर्वे पश्यामि । अधुना निरञ्जनयोरपि ते नेत्रयोः पूर्वदत्तमञ्जनं साक्षात् पश्यामि । अथ च अधुना निर्भूषणमपि ते शरीरं भाविभूषणोपचितं

साक्षात्करोमीत्यर्थः । " अत्र पूर्वार्धे भूतस्याञ्जनस्य उत्तरार्धे भाविनो भूषण-संभारस्य प्रत्यक्षतयाऽभिधानम् " [प्र०]

" अत्रांजनभूषणादिकं विनाऽपि स्वरूपवैलक्षण्येनैव शोभातिशयात्तेषां वैयर्थ्यं ध्वन्यते । क्वचिद्भूतत्वादिनिर्देशं विनाप्येष दृश्यते। 'अहं विलोकयेऽद्यापि युध्यंनेऽत्र सुरासुराः' इत्यादौ । अत्रेदं चिंत्यम् । असंबंधे संबंधरूपातिशयोक्त्यैव गतार्थोऽयम् । प्रत्यक्षासंबंधेऽपि तत्संबंधवर्णनात् " [उ०] ।

काव्यलिङ्गं हेतोर्वाक्यपदार्थता ॥२८॥

वाक्यार्थता यथा–

वपुःप्रादुर्भावादनुमितमिदं जन्मनि पुरा
पुरारे न प्रायः क्वचिदपि भवन्तं प्रणतवान्
नमन्मुक्तः संप्रत्यहमतनुरग्रेऽप्यनतिभाक्
महेश क्षन्तव्यं तदिदमपराधद्वयमपि ॥ ११० ॥

अनेकपदार्थता यथा—

प्रणयिसखीसलीलपरिहासरसाधिगतै–
र्ललितशिरीषपुष्पहननैरपि ताम्यति यत् ।
वपुषि वधाय तत्र तव शस्त्रमुपक्षिपतः
पततु शिरस्यकाण्डयमदण्ड इवैष भुजः ॥ १११ ॥

एकपदार्थता यथा—

भस्मोद्धूलन भद्रमस्तु भवते रुद्राक्षमाले शुभं
हा सोपानपरम्परां गिरिसुताकान्तालयालंकृतिम् ।
अद्याराधनतोषितेन विभुना युष्मत्सपर्यासुखा-
लोकोच्छेदिनि मोक्षनामनि महामोहे निधीयामहे ॥११२॥

एषु अपराधद्वये पूर्वापरजन्मनोरनमनम्, भुजपाते शस्त्रोपक्षेपः. महामोहे सुखालोकोच्छेदित्वं च यथाक्रममुक्तरूपो हेतुः ।

" काव्यलिङ्गमिति । अत्र विवक्षितविवेकेन हेतुवचनं काव्यलिङ्गमिति लक्षणम् । वाक्यपदार्थतेति विभागः । वाक्यार्थता पदार्थता चेत्यर्थः " [प्र०] ।

" अयं भावः–यत्र हेतुः कारकरूपस्तत्काव्यलिङ्गम् । ज्ञापकहेतौ त्वनुमानालङ्कारः । काव्यग्रहात् काव्यलिङ्गे व्याप्तिपक्षधर्मोपसंहारादयो न स्युः" [सं०] ।

तत्र वाक्यार्थता यथा "**वपुरिति**। क्वचित्कस्मिन्नपि जन्मनि। पुरा प्रायः भवन्तं अहं न प्रणतवान्। इदं वपुषः प्रादुर्भावादनुमितम्। त्वन्नतौ शरीरोत्पत्तेरभावात्। संप्रति नमन्मुक्तः अतनुः शरीरशून्यः अहं अग्रेऽपि अनतिभाक् नतिरहितः। इदं अपराधद्वयं क्षंतव्यम्। शिखरिणी छन्दः। अग्रेऽप्यनतौ अतनुत्वमेकपदार्थो हेतुः। अतनुत्वे च नमन्मुक्त इत्यनेकपदार्थो हेतुः" [उ०]।

" अत्र पुरा क्वचिदपि नाहं भवन्तं प्रणतवान् अग्रेऽप्यहमनतिभागित्यवान्तरवाक्ययोरर्थोऽनमनमपराधे हेतुः " [प्र०]।

"**अनमनमपराधे** इति। यद्यप्यनमनमेवापराधस्तयोश्च न हेतुहेतुमद्भावस्तथापि तदिदमित्यस्य सर्वनाम्नां बुद्धिस्थपरामर्शकत्वात् दुरितविशेषरूपमित्यर्थः। क्षंतव्यमित्यस्य च लक्षणया नाशनीयमित्यर्थ इत्यदोषः" [उ०]।

अनेकपदार्थता यथा-"**प्रणयीति**। मालतीमाधवे मालतीं हन्तुमुद्यतमघोरघण्टं कापालिकं प्रति माधवस्योक्तिः। तत्र तस्मिन् वपुषि शस्त्रमुपक्षिपतस्तव शिरसि अकाण्डे अनवसरे यमदण्ड इवैष मद्भुजः पतत्वित्यन्वयः। तत्किम्। यद्वपुः प्रणयिनीनां सखीनां ये सलीलं परिहासरसास्तैरधिगतैः प्राप्तैर्ललितशिरीषपुष्पताडनैरपि ताम्यति ग्लायति" [चं०]।

" अत्र शस्त्रोपक्षेपो भुजपाते हेतुः। न चायं वाक्यार्थः। 'शस्त्रमुपक्षिपतः' इत्येतावन्मात्रस्यावाक्यार्थत्वात्। तत्र वपुषि वधाय शस्त्रमुपक्षिपत इत्यस्यापि न वाक्यत्वम्, विशेषणत्वादिति तदर्थस्यापि हेतुत्वे न वाक्यार्थस्य हेतुत्वमिति। [प्र०]

एकपदार्थता यथा—**भस्मेति**। "शिवप्रसादेन जाततत्त्वज्ञानस्योक्तिरियम्। हे भस्मोद्धूलन भूत्यालेपन भवते भद्रमस्तु तुभ्यं कल्याणमास्ताम्। हे रुद्राक्षमाले भवत्यै शुभमस्तु। गिरिसुताकान्तस्य शिवस्य आलयः प्रासादः तस्य अलंकृतिं अलङ्कारभूतां सोपानपरंपरां हा तस्याः शोच्यतेत्यर्थः। अद्य आराधनेन सेवया तोषितेन विभुना शिवेन (कर्त्रा) युष्माकं भस्मोद्धूलनादीनां भवतां या सपर्या सेवा तत्सुखस्य तदानन्दस्य आलोकः अनुभवरूपः प्रकाशः तदुच्छेदिनि तन्नाशके मोक्षनामनि मोक्षसंज्ञके महामोहे महान्धकारे निधीयामहे निपात्यामहे" [झ०]

" अत्र महामोहत्वे सुखालोकोच्छेदिता हेतुः। तच्च समासादेकपदार्थ एव।

अर्थान्तरन्यासे तटस्थतयोपनिबद्धस्य हेतुत्वे पर्यवसानम्, इह तु साक्षादेव हेतुविभक्त्यादिना हेतुतयोपनिबद्ध इति ततो भेदः " [प्र०]।

प्रदीपे हेतुविभक्त्यादिनेति क्वाचित्कोऽपपाठ इत्युद्योतः।"गम्यमानहेतुत्वकस्यैव हेतोः सुंदरत्वेन प्राचीनैः काव्यलिङ्गाभ्युपगमात् । अतएव वपुःप्रादुर्भावाद-नुमितमित्यंशे नायमलङ्कार इत्याहुः " [उ०]

पर्यायोक्तं विना वाच्यवाचकत्वेन यद्वचः ।

वाच्यवाचकभावव्यतिरिक्तेनावगमनव्यापारेण यत् प्रतिपादनम्, तत् पर्यायेण भङ्ग्यन्तरेण कथनात् पर्यायोक्तम् । उदाहरणम्––

यं प्रेक्ष्य चिररूढाऽपि निवासप्रीतिरुज्झिता ।
मदेनैरावणमुखे मानेन हृदये हरेः ॥ ११३ ॥

अत्र ऐरावणशक्रौ मदमानमुक्तौ जाताविति व्यङ्ग्यमपि शब्देनोच्यते, तेन यदेवोच्यते तदेव व्यङ्ग्यम्, यथा तु व्यङ्ग्यं न तथोच्यते; यथा गवि शुक्ले चलति दृष्टे, ' गौःशुक्लश्चलति '—इति विकल्पः, यदेव दृष्टं तदेव विकल्पयति, न तु यथा दृष्टं तथा । यतोऽभिन्नाऽसंसृष्टत्वेन दृष्टम् भेद-संसर्गाभ्यां विकल्पयति ।

"पर्यायोक्तमिति । वाच्यवाचकभावभिन्नेनावगमनव्यापारेणार्थाद्वाच्यस्यैव यदभिधानं तत्पर्यायोक्तम् । पर्यायेण भङ्ग्यन्तरेणाभिधानात् । ध्वनेस्तु न वाच्य एवार्थो विषय इति ततो भेदः । उदाहरणम्—यमिति " [प्र०]।

" काश्मीरिकमेण्ठकविप्रणीते हयग्रीववधाख्ये नाटके पद्यमिदमिति वदन्ति" [झ०]

" अत्रैक एवार्थ ऐरावतशक्रौ मदमानविमुक्तौ जातविति व्यञ्जनया मदमा-नाभ्यां तयोरधिकरणयोर्निवासप्रीतिरुज्झितेत्यभिधया च प्रतिपाद्यते । तेन च यदेवोच्यते तदेव व्यङ्ग्यम् । न चैवं प्रतिपन्नस्यैव प्रतिपत्तिरफलेति किं व्यापा-रद्वयेनेति वाच्यम् । यतो यथा व्यङ्ग्यं तथा नोच्यते । प्रकारयोर्भेदात् । एक-रूप एव वस्तुनि प्रकारभेद एव कथं स्यादिति चेत्, यथा शुक्ले गवि चलति निर्विकल्पकसविकल्पकयोः एक एव ह्यर्थस्ताभ्यां विषयीक्रियते । न पुनर्यथा निर्विकल्पकविषयस्तथैव सविकल्पकेनाऽपि विषयीक्रियते । भिन्नत्वसंसृष्टत्वा-विषयकं निर्विकल्पकं, भिन्नत्वसंसृष्टत्वप्रकारकं तु सविकल्पकमिति '' [प्र०]।

“ **यथेति** । येन प्रकारेण व्यङ्ग्यं तेन रूपेण शब्देन नोच्यत इत्यर्थः । एकस्यैव प्रकारभेदेन वाच्यत्वव्यंग्यत्वयोरविरोधः । यथा यावककुसुंभजपाकुसुमादिरूपाणां रक्तत्वादिना वाच्यत्वेऽपि तत्तद्वैजात्यरूपेण प्रत्यक्षत्वमेव न वाच्यत्वं तथेहापीति भावः। **न पुनर्यथेति** । निर्विकल्पके शुक्लतदाश्रयगोत्वतदाश्रयचलनतदाश्रया विकलिता भासंते, सविकल्पके तु संसृष्टतयेत्यर्थः । निर्विकल्पकस्य विशिष्टधीहेतुत्वादिति भावः । **भिन्नत्वेति** । भेदोऽतद्व्यावृत्तिस्तच्छून्यत्वेन संसर्गराहित्येन च निर्विकल्पकविषयता । भेदोऽतद्व्यावृत्तिः परनये । तस्याः सविकल्पके विशेषणत्वं बाह्या मन्यंते । अन्यमते **संसृष्टत्वेति** । प्रकारशब्दो विषयमात्रपरः । एवं च यथा निर्विकल्पकस्य विशिष्टविज्ञानहेतुत्वात्ततो वैलक्षण्यं तथा निवासप्रीतित्यागरूपवाच्यज्ञानस्य मदमुक्तत्वरूपव्यंग्यज्ञानहेतुत्वाद्वैलक्षण्यमिति भावः । यद्वा निर्विकल्पके किंचित्त्वेन वस्तु भासते, सविकल्पके तु तत्तन्नामरूपजात्यादिप्रकारेणेति ‘ न पुनर्यथा ’ इत्यादेरर्थः । इदमेव भिन्नत्वाविषयकत्वादीति बोध्यम् । अत्र व्यंग्यमगूढं वाच्याद्चारु चेति न ध्वनित्वम् ” [उ०] ।

उदात्तं वस्तुनः संपत्

संपत् समृद्धियोगः । यथा—

मुक्ताः केलिविसूत्रहारगलिताः संमार्जनीभिर्हृताः
प्रातः प्राङ्गणसीम्नि मन्थरचलद्बालाङ्घ्रिलाक्षारुणाः ।
दूराद्दाडिमबीजशङ्कितधियः कर्षन्ति केलीशुकाः
यद्विद्वद्भवनेषु भोजनृपतेस्तत्त्यागलीलायितम् ॥ ११४ ॥

महतां चोपलक्षणम् ॥ २९ ॥

उपलक्षणमङ्गभावः, अर्थादुपलक्षणीयेऽर्थे । उदाहरणम्—

तदिदमरण्यं यस्मिन्दशरथवचनाऽनुपालनव्यसनी ।
निवसन्बाहुसहायश्चकार रक्षःक्षयं रामः ॥ ११५ ॥

न चात्र वीरो रसः । तस्येहाङ्गत्वात् ।

“ **उदात्तमिति** । संपत्समृद्धियोगः । न तु तस्यैवातिशयः ” [प्र०] यथा **मुक्ता इति** । यस्य भोजनृपतेः विदुषां भवनेषु केलौ विसूत्रात् छिन्नसूत्रात् हारात् गलिताः पतिताः संमार्जनीभिः हृताः अपसारिताः । प्रातः प्राङ्गणसीम्नि

अङ्गणप्रान्ते मन्थरं मन्दं चलन्तीनां बालानां षोडशवर्षाणां युवतीनां अङ्घ्रि-लाक्षया चरणालक्तकेन अरुणाः ईषद्रक्ताः मुक्ताः (कर्मभूताः) दूरात् दाडिमबीज-शंकितधियः दाडिमबीजानि मन्वानाः केलीशुकाः (कर्तृभूताः) कर्षन्ति यत् तत् भोजराजस्य त्यागलीलायितं दानलीलेत्यर्थः। अत्र विद्वद्भवनस्य मुक्तादिधनसमृद्धियोगः, तेन वर्णनीयनृपतेः समृद्ध्यतिशयः इति प्रदीपोद्योतौ।

"महतामिति। महतां यदुपलक्षणमङ्गभावः अर्थाद्वर्णनीये, तदप्युदात्त-मित्यर्थः [प्र०]। वर्णनीये अंगिनीत्यर्थः। तदिदमिति। "पुष्पकविमानस्थस्य लक्ष्मणस्यांगदं प्रतीयमुक्तिः" [उ०]। स्पष्टम्। "अत्रैतादृशो महान्रामो दण्डकाया वर्णनीयाया अङ्गम्। नन्वत्र रामगत उत्साहातिशय एव चमत्कार-निदानं तस्य प्रधानत्वाद्विच्छित्त्यन्तराभावाच्च किंविषयोऽयमलङ्कारव्यपदेश इति वाच्यम्। नह्यत्र वीरो रसः प्रधानम्। तस्येहाङ्गत्वात्" [प्र०]।

"वीररसाश्रयो रामस्तावदिहाङ्गम्। किं पुना रसः। ननु रसस्याङ्गत्वे रसवदलङ्कारः स्यात्। न। अस्योदात्तस्य तदपवादत्वात्। तदपवादत्वाकल्पने निर्विषयमुदात्तम्" [सं०]।

तत्सिद्धिहेतावेकस्मिन्यत्राऽन्यत्तत्करं भवेत्।
समुच्चयोऽसौ

तस्य (प्रस्तुतस्य कार्यस्य) एकस्मिन साधके स्थिते साधकान्तराणि यत्र संभवन्ति, स समुच्चयः। उदाहरणम्––

दुर्वाराः स्मरमार्गणाः प्रियतमो दूरे मनोऽत्युत्सुकं
गाढं प्रेम नवं वयोऽतिकठिनाः प्राणाः कुलं निर्मलम्।
स्त्रीत्वं धैर्यविरोधि मन्मथसुहृत्कालः कृतान्तोऽक्षमो
नो सख्यश्चतुराः कथं नु विरहः सोढव्य इत्थं शठः॥ ११६॥

अत्र विरहासहत्वं स्मरमार्गणा एव कुर्वन्ति, तदुपरि प्रियतमदूर-स्थित्यादि उपात्तम्। एष एव समुच्चयः सद्योगेऽसद्योगे सदसद्योगे च पर्यवस्यतीति न पृथक् लक्ष्यते। तथाहि––

कुलममलिनं भद्रा मूर्तिर्मतिः श्रुतशालिनी
भुजबलमलं स्फीता लक्ष्मीः प्रभुत्वमखण्डितम्।

प्रकृतिसुभगा ह्येते भावा अमीभिरयं जनो
व्रजति सुतरां दर्पं राजंस्त एव तवाङ्कुशाः ॥ ११७ ॥

अत्र सतां योगः । उक्तोदाहरणे त्वसतां योगः ।

" तत्सिद्धिहेतौ तस्य प्रस्तुतस्य कार्यस्य साधके । समाधावतुल्यकक्षयोः कारणयोरुपादानमत्र तु तुल्यकक्षयोरिति विशेषः " [प्र०] ।

" **इति विशेष इति** । समाधौ हि एकेन कार्ये निष्पाद्यमानेऽन्येनाकस्मादापतता सौकर्यादिरूपातिशयसंपादनम् । अत्र तु एककार्यसंपत्तौ सर्वेषां खलेकपोतन्यायेन पातः, कार्यस्य च न कोऽप्यतिशय इति भावः । काव्यलिंगे हेतुत्वमात्रं विवक्षितं न तु हेतूनां गुणप्रधानभावस्यैकत्वानेकत्वस्य वा चिन्ता। अत्र तु एकस्यैव तत्कार्यकारित्वेऽन्येषां साहाय्यमात्रमिति ततो विशेषः । **दुर्वारा इति** (मयूरसूनोः शंकुकर्णस्य पद्यमिति शार्ङ्गधरपद्धतौ स्पष्टम् ।) स्वं प्रति विधिं प्रति वा काचिद्वदति " [उ०] । स्मरमार्गणाः कामबाणाः दुर्वाराः । प्रियतमः दूरे विदेशे विद्यते । मनः अत्युत्सुकम् । प्रेम च गाढं अतिशयितम् । नवं वयः अवस्था । प्राणाः अतिकठिनाः, सत्यपि एतादृशे विरहे न नश्यन्ति। कुलं निर्मलं–अत एव स्वाच्छन्द्याभावः । स्त्रीत्वं धैर्यविरोधि स्त्रीत्वात् धैर्यावलम्बनमपि कर्तुं न शक्यते । मन्मथसुहृत्कालः वसन्तकालः । कृतान्तः यमः अक्षमः झटिति प्राणान् नापहरतीत्यर्थः । सख्यश्च विरहविनोदने अचतुराः। इत्थं सति शठः पीडादायी विरहः कथं नु सोढव्यः। रुद्रटस्तु समुच्चयं त्रिधा विभज्य पृथग्लक्षितवान् । काव्यप्रकाशकृत्तु तदयुक्तं मन्यमानःकेवलमुदाहृतवान् । तत्र सद्योगोदाहरणम्—**कुलमिति** । हे राजन्—अमलिनं निर्मलं कुलं, भद्रा शोभना मूर्तिः आकृतिः,श्रुतं शास्त्रश्रवणं,तच्छालिनी मतिः, अमलं अतिशयितं भुजबलं, स्फीता विस्तृता लक्ष्मीः, अखण्डितं अकुण्ठितं प्रभुत्वं—एते हि भावाः पदार्थाः प्रकृत्या सुभगाः शोभनाः । अयं दृश्यमानः जनः साधारणो लोकः अमीभिः भावैः सुतरां दर्पं व्रजति गर्वितः भवति । किन्तु ते एव तव अंकुशाः विनयहेतवः । "अत्र कुलादीनां समीचीनानामेव योगः। दुर्वारा इत्याद्युक्तोदाहरणे स्मरमार्गणादीनामसमीचीनानाम् " [प्र०] ।

शशी दिवसधूसरो गलितयौवना कामिनी
सरो विगतवारिजं मुखमनक्षरं स्वाकृतेः ।

प्रभुर्धनपरायणः सततदुर्गतः सज्जनो
नृपाङ्गणगतः खलो मनसि सप्त शल्यानि मे ॥ ११८ ॥

अत्र शशिनि धूसरे शल्ये शल्यांतराणीति शोभनाशोभनयोगः।

शशीति । भर्तृहरिकृते नीतिशतके पद्यमिदम् । स्पष्टम् । "अत्र सदसतोर्योगः । दुर्जनस्यासत्त्वात् शश्यादीनां सत्त्वात् । एतच्चिन्त्यम् । पूर्वं दूरस्थित्यादिविशेषणेन धूसरत्वादिनाऽत्राप्यसम्यक्त्वमिति" [प्र०] ।

"शशी स्वरूपेण सन्नपि दिवसधूसरत्वेनासन् । एवमग्रेऽपि । एवमत्र सदसतां शश्यादीनां योगः । **अत्र सदसतोर्योगः दुर्जनस्यासत्त्वात् शश्यादीनां सत्त्वादिति** । इदं चिंत्यम् । एवं हि सहचरभिन्नता स्यात् । सर्वत्र विशेष्यस्य शोभनत्वं विशेषणस्याशोभनत्वं च प्रक्रांतमिति भग्नप्रक्रमतां वा स्यात् । तस्मान्नृपांगणमसच्युतमिति पाठो युक्तः । सदसदिति च कर्मधारयो युक्तः । अत्रैकैकमपि मानसशल्यभूतज्ञानजनने हेतुस्तत्रान्यदपि षट्कमुपात्तमिति लक्षणसमन्वयः । **पूर्वमिति** । प्रियतमः शोभनोऽपि दूरस्थत्वदोषेणाशुभ इत्यर्थः । चिंताबीजं तु एकस्य तथात्वेऽपि मार्गणवयोवसंतानकेवलानामपि विरहिणीदुःखदानां सत्त्वमिति असद्योगोदाहरणमेव तदिति । उक्तोदाहरणेषु सतां योगस्यासतां योगस्य सदसद्योगस्य वा युक्तत्वस्यायुक्तत्वस्य वाऽप्रतीतेर्न समस्य विषमस्य वाऽलङ्कारस्यात्र प्रसंग इति दिक्" [उ०]

"तथैकमेव वस्तु सदसच्च तादृशं तादृशेन सदसता यदा युज्यते तदा सदसद्योगः । अत्र सत एव सतोऽसत्त्वं एकस्यैव वस्तुन इति विवक्षितम् । अत एव चारुत्वेनान्तःप्रविष्टान्यपि शश्यादीनि प्रकारेण व्यथाहेतुत्वेनोक्तानि । दुर्वाराः स्मरेत्यत्र तु कथं सोढव्य इति सर्वथा दुष्टत्वाभिप्रायेणोपन्यासः [सं०]

स त्वन्यो युगपद्या गुणक्रियाः ॥३०॥

गुणौ च क्रिये च गुणक्रिये च गुणक्रियाः । क्रमेणोदाहरणम्—

विदलितसकलारिकुलं तव बलमिदमभवदाशु विमलं च ।
प्रखलमुखानि नराधिप मलिनानि च तानि जातानि ॥११९॥

अयमेकपदे तया वियोगः प्रियया चोपनतः सुदुःसहो मे ।
नववारिधरोदयादहोभिर्भवितव्यं च निरातपत्वरम्यैः ॥ १२० ॥

कलुषं च तवाहितेष्वकस्मात्सितपङ्केरुहसोदरश्रि चक्षुः ।
पतितं च महीपतीन्द्र तेषां वपुषि प्रस्फुटमापदां कटाक्षैः ॥१२१॥

'धुनोति चासिं तनुते च कीर्तिम्'—इत्यादेः, 'कृपाणपाणिश्च भवान् रणाक्षितौ, ससाधुवादाश्च सुराः सुरालये'—इत्यादेश्च दर्शनात्, 'व्यधिकरणे'—इति 'एकस्मिन् देशे'—इति च न वाच्यम् ।

"समुच्चयान्तरमाह-स त्वन्य इति । अत्र गुणाः क्रियाश्चेति विग्रहे संख्याविशेषस्याविवक्षणात् विशेषविवक्षाविरहेण च सजातीयवद्विजातीयस्यापि यौगपद्यस्य लाभात् गुणौ च क्रिये च गुणक्रिये च युगपद्भवतः, स त्रिरूपः समुच्चयः । तत्र गुणयोर्यौगपद्यं यथा-विदलितेति" [प्र०] । हे नराधिप विदलितं नाशितं सकलानां अरीणां कुलं येन तत् तव इदं बलं सैन्यं आशु शीघ्रं विमलं निर्मलं च अभवत् । प्रकृष्टाः खलाः प्रखलाः दुष्टाः इत्यर्थः । तेषमुखानि च मलिनानि जातानि । "अत्र विमलत्वमलिनत्वयोर्गुणयोस्तुल्यकालतारूपः समुच्चयश्चकारद्वयगम्यः" [चं०] ।

क्रिययोर्यथा– "अयमिति । विक्रमोर्वशीये चतुर्थांके पुरूरवस उक्तिः । एकपदे अकस्मात् । प्रियया उर्वश्या । उपनतः प्राप्तः । निरातपत्वेन आतप राहित्येन रम्यैः । भवितव्यम् भूतम् । मालभारिणी छन्दः" [उ०] । "अत्रोपगतो भवितव्यं चेति क्रिययोः । गुणक्रिययोर्यथा—कलुषमिति" [प्र०] । हे महीपनीन्द्र स्वभावतः सितपङ्केरुहाणां श्वेतकमलानां सोदरा तुल्या श्रीः शोभा यस्य तादृशं तव चक्षुः अहितेषु शत्रुषु विषये अकस्मात् कलुषं क्रोधात् रक्तं च । तेषां शत्रूणां वपुषि शरीरे आपदां विपत्तीनां कटाक्षैः कर्तृभिः पतितं च । यदैव ते चक्षुः कलुषं तदैव विपत्तयः शत्रुषु पतन्तीत्यर्थः ।

रुद्रटस्तु—'व्यधिकरणे वा यस्मिन् गुणक्रिये चैककालमेकस्मिन् । उपजायेते देशे समुच्चयः स्यात्तदन्योऽसौ ॥' (७–२७) इति समुच्चयलक्षणं प्राह । इमामार्यां नमिसाधुरित्थं व्याख्यातवान्–"व्यधिकरण इति । वाशब्द एवशब्दार्थे भिन्नक्रमः । ततश्च यस्मिन् समुच्चये गुणक्रिये भिन्नाधिकरणे एकस्मिन् देशे समकालमुपजायेते असौ समुच्चयस्तदन्यः । ततः पूर्वसमुच्चयादपर इत्यर्थः । गुणक्रिये एव व्यधिकरणे इत्यवधारणं तु गुणक्रियाधिकरणयोर्वस्तुनोर्देशाधिकरणमेकमेवेति कृत्वा ॥" मम्मटस्तु–'व्यधिकरणे' इति, 'एकस्मिन् देशे' इति च लक्षणे न समावेशनीये–इत्याह । कुतः–'धुनोति चासिं तनुते च कीर्तिम्" इत्यस्मिन्नुदाहरणे सत्यपि राजरूपे देशाधिकरण-

स्यैकत्वे असिकम्पनकीर्तिप्रथनरूपयोः क्रिययोः सामानाधिकरण्यदर्शनात्। तथा च–'कृपाणपाणिश्च भवान् रणक्षितौ। ससाधुवादाश्च सुराः सुरालये' इत्यत्र कृपाणपाणित्वसाधुत्ववादयोर्गुणयोः सत्यपि वैयधिकरण्ये देशाधिकरणस्यैकत्वाभावदर्शनात्।

एकं क्रमेणानेकस्मिन्पर्यायः

एकं वस्तु क्रमेणानेकस्मिन् भवति क्रियते वा, स पर्यायः।

क्रमेणोदाहरणम्—

नन्वाश्रयस्थितिरियं तव कालकूट
केनोत्तरोत्तरविशिष्टपदोपदिष्टा।
प्रागर्णवस्य हृदये वृषलक्ष्मणोऽथ
कण्ठेऽधुना वससि वाचि पुनः खलानाम् ॥१२२॥

"एकमिति। एकत्वेन विवक्षितं वस्तु यत्र क्रमेणानेकस्मिन्भवति क्रियते वा स एकः पर्यायः। अत्र क्रमेणेति समुच्चयव्यावर्तनाय। प्रयोजकानिर्देशात-न्निर्देशौ भवतिकरोत्यर्थौ। न तु स्वाभाविकत्वास्वाभाविकत्वे। वृषलक्ष्मणः कण्ठे कालकूटवासस्यास्वाभाविकत्वेन भवतीत्यत्रानुदाहरणत्वापत्तेः" [प्र०]

"समुच्चयेति। वक्ष्यमाणविशेषालङ्कारद्वितीयभेदवारणाय चेत्यपि बोध्यम्। तत्र यौगपद्यसत्त्वादिति भावः" [उ०]।

तत्राद्यो यथा–नन्विति। भल्लटकविकृते भल्लटशतके चतुर्थं पद्यमिदम्। हे कालकूट विष उत्तरोत्तरं अधिकाधिकं विशिष्टं उत्कृष्टं पदं स्थानं यस्यां तादृशी इयं आश्रयस्थितिः आश्रयणरीतिः तव केन उपदिष्टा ननु। यतः त्वं प्राक् अर्णवस्य समुद्रस्य हृदये अभ्यन्तरे अवस इति शेषः। अथ तदनन्तरं वृषलक्ष्मणः शङ्करस्य कण्ठे अवसः। अधुना पुनः खलानां वाचि वससि। "अत्र कालकूटस्य वस्तुत एकस्यानेकत्र वासे प्रयोजकं किंचिदपि नोक्तम्।" [प्र०]।

'श्रोणीबन्धस्त्यजति तनुतां सेवते मध्यभागः, पद्भ्यां मुक्तास्तरलगतयः संश्रिता लोचनाभ्याम्। धत्ते वक्षः कुचसचिवतामद्वितीयं च वक्त्रं, तद्गात्राणां गुणविनिमयः कल्पितो यौवनेन॥' अयं श्लोकः काव्यप्रकाशपुस्तके क्वचित् दृश्यते।

" श्रोणीति । श्रोणीभागादीनां प्राथमिकाधारत्वमार्थम् । सेवते इत्यनेन मध्ये पूर्वमतनुतासत्ता बोधिता । एवमग्रेऽपि । अत एव विनिमयः संगच्छते । तनुता कार्श्यम् । तरलगतयः चंचलगतयः चंचलदर्शनं च । कुचसचिवताम् सद्वितीयताम् । धत्ते इत्यनेन तस्मिन्प्रागद्वितीयता या स्थिता सा वक्त्रेण गृहीतेति बोधितम् । मुखेऽद्वितीयत्वं निरुपमत्वम्, वक्षसि द्वितीयराहित्यम्, तयोश्चाभेदाध्यवसायः । कुचसचिववक्षस्त्वेनैव मुखस्य निरुपमत्वम् । अत्र तनुत्वत्यागादिना तत्तदुत्कर्षो व्यंजनया बोध्यते " [उ०] ।

यथा वा—

बिम्बोष्ठ एव रागस्ते तन्वि पूर्वमदृश्यत ।
अधुना हृदयेऽप्येष मृगशावाक्षि लक्ष्यते ॥१२३॥

रागस्य वस्तुतो भेदेऽप्येकतयाऽध्यवसितत्वादेकत्वमविरुद्धम् ।

तं ताण सिरिसहोअररअणाहरणम्मि हिअअमेक्करसम् ।
बिम्बाहरे पिआणं णिवेसिअं कुसुमबाणेन ॥१२४॥

[' तत्तेषां श्रीसहोदररत्नाभरणे हृदयमेकरसम् ।
बिम्बाधरे प्रियाणां निवेशितं कुसुमबाणेन ॥']

" न केवलमयं वास्तविक एकत्वे, किं त्वारोपितेऽपि । यथा—**बिंबोष्ठ एवेति** " [प्र०] " पद्मगुप्तप्रणीते नवसाहसाङ्कचरिते षष्ठे सर्गे ६० पद्यमिदम् " [झ०] । स्पष्टम् ।

" अत्र प्रयोजकानिर्देशः स्फुट एव । रागपदार्थस्य त्वोष्ठे लौहित्यात्मकतया हृदये तु स्नेहात्मकत्वेन भेदेऽप्येकत्वस्याध्यवसानाक्षैकत्वविवक्षाविरोधः । द्वितीयो यथा—**तं ताणेति**" [प्र०] गाथेयं आनन्दवर्धनाचार्यप्रणीतायां विषमबाणलीलायामसुरपराक्रमणे कामदेवस्येति ध्वन्यालोके २ उद्योते (पृ० १११) स्पष्टम् ।– तेषां पातालवासिनामसुराणां श्रीसहोदरं रत्नं कौस्तुभस्तदाभरणे विष्णौ एकरसं एकतानं तत्परं हृदयं कुसुमबाणेन कामेन प्रियाणां बिम्बाधरे निवेशितम् । "अत्र ' कुसुमबाणेन ' इति प्रयोजकनिर्देशः " [प्र०] । आचार्याभिनवगुप्तपादादयस्तु ' श्रीसहोदररत्नाहरणे ' इति पठन्ति । एतदभिप्रेत्यैवोद्योते प्रोक्तम्—

" केचित्तु यदसुराणां हृदयं विजिगीषाज्वलनजाज्वल्यमानं श्रीसहोदर-

रत्नानामासमंतात् हरणे तत्परमासीत्, तत्सुकुमारतरोपकरणेनाऽपि कामेन प्रियाबिंबाधरे निवेशितं सकलरत्नसारतुल्यो बिंबाधर इति तेषामभिमानोत्पत्तेः। एवं च व्यंग्योपमाऽत्रेत्याहुः। तन्मतेऽपि हरणस्य वैषयिकाधारत्वात्पर्यायाक्षतिरेव" [उ०]।

अन्यस्ततोऽन्यथा।

अनेकमेकस्मिन् क्रमेण भवति क्रियते वा, सोऽन्यः। क्रमेणोदाहरणम्–

मधुरिमरुचिरं वचः खलानाममृतमहो प्रथमं पृथु व्यनक्ति।
अथ कथयति मोहहेतुमन्तर्गतमिव हालहलं विषं तदेव ॥१२५॥

"अन्य इति। अनेकमेकस्मिन्क्रमेण यद्भवति क्रियते वा, सोऽन्यः पर्याय इत्यर्थः। पूर्ववद्व्याख्येयम्। तत्र भवत्यर्थे यथा––मधुरिमेति" [प्र०]।

"मधुरिम्णा रुचिरं खलानां वचनं प्रथमं पृथु बहुलममृतं व्यनक्ति प्रकाशयति। अथ विचारानन्तरं तदेव खलवचनं मोहहेतुभूतमन्तर्गतं हालहलाख्यं विषं कथयति। अहो आश्चर्यम्। अत्रैकस्मिन् खलवचने क्रमेणामृतविषयोः स्थितिरिति पूर्वविपरीतः पर्यायः" [चं०]।

"अत्रैकस्मिन्खलवचसि क्रमेणामृतव्यञ्जने विषकथने च न प्रयोजकनिर्देशः [प्र०]।

तद्गेहं नतभित्ति मन्दिरमिदं लब्धावकाशं दिवः
सा धेनुर्जरती नदन्ति करिणामेता घनाभा घटाः
स क्षुद्रो मुसलध्वनिः कलमिदं संगीतकं योषिताम्
आश्चर्यं दिवसैर्द्विजोऽयमियतीं भूमिं समारोपितः ॥ १२६ ॥

अत्र एकस्यैव हानोपादानयोरविवक्षितत्वात् न परिवृत्तिः।

करोत्यर्थे यथा—तद्गेहमिति। पद्यमिदं ध्वन्यालोके ३ उद्योते (पृ० १५८) दृश्यते। "सुदाम्नो मन्दिरमवलोक्य कस्यचिदुक्तिरियमिति सुधासागरे भीमसेनः। अयं द्विजः सुदामा (कर्म) दिवसैः (कर्तृभिः) इयतीं भूमिं समृद्धिसीमां समारोपितः इत्याश्चर्यम्। तदेव दर्शयति—तत् पूर्वदृष्टं गृहं नता नम्रा भित्तिर्यस्यैवंविधं इदानीं तु दिवः स्वर्गात् लब्धावकाशं इदं मन्दिरं राजयोग्यं गृहं जातमित्यर्थः। सा पूर्वदृष्टा जरती जरठा धेनुः इदानीं तु घनाभाः

मेघतुल्याः करिणां घटाः श्रेणयः नदन्ति। स क्षुद्रः निकृष्टोऽल्पो वा मुसलध्वनिः इदानीं तु कलं मधुरस्वरं योषितां इदं संगीतकम् " [झ०]। " अत्रैकस्मिन् द्विजे तद्गेहमन्दिरादीनामनेकेषां क्रमेण स्थितौ दिवसैरिति प्रयोजकनिर्देशः " [चं०]। " न चेयं परिवृत्तिः, हानोपादानयोरविवक्षितत्वात् " [प्र०]।

अनुमानं तदुक्तं यत्साध्यसाधनयोर्वचः ॥ ३१ ॥

पक्षधर्मोऽन्वयव्यतिरेकित्वेन त्रिरूपो हेतुः साधनम्, धर्मिणि अयोगव्यवच्छेदो व्यापकस्य साध्यम्। यथा—

यत्रैता लहरीचलाचलदृशो व्यापारयन्ति भ्रुवं
यत्तत्रैव पतन्ति संततममी मर्मस्पृशो मार्गणाः।
तच्चक्रीकृतचापमञ्चितशरप्रेङ्खत्करः क्रोधनो
धावत्यग्रत एव शासनधरः सत्यं सदासां स्मरः ॥ १२७ ॥

" **अनुमानमिति**। पक्षे संबन्धः, सपक्षवृत्तित्वं, विपक्षावृत्तित्वं चेति, रूपत्रयवान्हेतुःसाधनम्। व्यापकत्वाभिमतस्य पक्षेऽयोगव्यवच्छेदो व्यापकसंबन्धपर्यवसन्नः साध्यम्। तदुभयवचनमनुमानालङ्कारः" [प्र०]

" **साधनमिति**। एतद्रूपत्रयविशिष्टो हेतुः साधनपदेनोच्यते इत्यर्थः। **व्यापकत्वाभिमतस्येति**। अस्य ' यस्य ' इत्यादिः। **साध्यमिति**। अस्य ' तत् ' इत्यादिः। **व्यापकसंबंधः**। व्यापकास्तित्वम्। **तदुभयेति** ' कविप्रतिभोल्लिखित ' इत्यादिः " [उ०]

यत्रेति। यत्र यस्मिन् जने लहरीवत् चलाचलदृशः चंचलदृष्टयः एताः कामिन्यः भ्रुव व्यापारयन्ति वक्रीकुर्वन्ति। यत् तत्रैव तस्मिन्नेव जने मर्मस्पृशः मर्मभेदिनः अमी मार्गणाः कामशराः पतन्ति। तत् तस्माद्धेतोः शासनधरः आज्ञावर्ती क्रोधनः कोपशीलः चक्रीकृतः कर्षणेन वर्तुलीकृतः चापो यस्मिन् कर्मणि तथा अञ्चिते धनुषि योजिते शरे बाणे प्रेंखन् चलन् करः यस्य सः स्मरः सत्यं आसां योषितां अग्रतः पुरतः एव सदा धावति।

साध्यसाधनयोः पौर्वापर्यविकल्पे न किंचिद्वैचित्र्यमिति न तथा दर्शितम्।

" अत्र पूर्वार्धे साधनस्य उत्तरार्धे साध्यस्य वचनम्। प्रयोगश्चैवम्—एताश्चक्रीकृतचापं सदा पुरोधावदञ्चितशरत्वादिविशिष्टमनोभवाः संततनिपतन्मर्म-

भेदिबाणकलसद्भ्रूव्यापारकस्थानत्वादिति । नन्वत्र पूर्वं साधनवत्साध्यस्यापि वचनं संभवति । यथा—' मधु तिष्ठति वाचि योषिताम् ' तत्कथं सामान्यत एतदुक्तं न तु विशेषत इति चेत्, साध्यस्य पूर्वभागे तादृशवैचित्र्याभावादिति " [प्र०] ।

"अत्र पूर्वार्धे संततनिपतन्मर्मभेदिबाणकलसद्भ्रूव्यापारकस्थानकत्वं साधनं पक्षवृत्तित्वेनोक्तम् । परार्धे साध्यम् । यत्तद्भ्यां व्याप्तिः सूचिता । तत्र वस्तुतो व्याप्त्यसत्त्वेऽपि कविप्रौढोक्त्या तथाभिधानम् । अत्रानुमानमित्यत्र भावे ल्युट् । तेन जायमानाऽनुमितिरत्रालङ्कारः । सा च मन्ये शंकेऽवैमि जाने इत्यादिवाचकोपादाने वाच्या । यत्र लिंगलिंगिनोः सत्त्वं तत्र तेषामनुमितिबोधकत्वात् । यत्र सादृश्यादिनिमित्तसद्भावस्तत्रोत्प्रेक्षाबोधकत्वम् । वक्ति कथयति इत्यादि लक्षणपदोपादाने लक्ष्या । उभयानुपादाने साध्यसाधनाभ्यां तदाक्षेपे प्रतीयमानेति बोध्यम् । **नन्विति** । एवं चानया रीत्याऽनुमानस्य द्वैविध्यं वक्तुमुचितमिति भावः । **मध्विति** । ' हृदि हालाहलमेव केवलम् । अत एव निपीयतेऽधरो हृदयं मुष्टिभिरेव ताड्यते ॥ ' इति पादत्रयम् । **तादृशेति** कार्यकारणयोर्वैपरीत्ये झटिति कार्यकारित्वप्रतीतिरूपवैचित्र्यवदिह तथाभावाभावात् न विशिष्योक्तमिति भावः " [उ०] ।

" **न दर्शितमिति** । अयं भावः—साध्यसाधनयोरुक्तिरलङ्कारः । तेन क्रमेण व्युत्क्रमेण वा भवतां वैचित्र्याभावात् किं तच्चिन्तयेति । तस्मात् रुद्रटवन्न वाच्यम् " [सं०] । रुद्रटस्तु—' वस्तु परोक्षं यस्मिन्साध्यमुपन्यस्य साधकं तस्य । पुनरन्यदुपन्यस्येद्विपरीतं चैतदनुमानम् ॥ ' [७,५६]

विशेषणैर्यत्साकूतैरुक्तिः परिकरस्तु सः ।

अर्थाद्विशेष्यस्य । उदाहरणम्—

महौजसो मानधना धनार्चिता धनुर्भृतः संयति लब्धकीर्तयः ।
न संहतास्तस्य न भेदवृत्तयः प्रियाणि वाञ्छन्त्यसुभिः समीहितुम् ॥ १२८॥

" **विशेषणैरिति** । साकूतैः साभिप्रायैः । उक्तिः अर्थाद्विशेष्यस्य । उदाहरणम्—**महौजस इति** " [प्र०] । किरातार्जुनीये प्रथमसर्गे युधिष्ठिरं प्रति वनेचरवाक्यमिदम् । महौजसः प्रभूततेजोयुक्ताः मानं एव धनं येषां ते तथा संयति युद्धे लब्धकीर्तयः । तथा च न संहताः परस्परमिलिताः न वा

भेदवृत्तयः परस्परद्वेषिणः धनुर्भृतः धनुर्धराः भटाः तस्य दुर्योधनस्य प्रियाणि असुभिः प्राणैः समीहितुं कर्तुं वाञ्छन्ति इच्छन्ति। " अत्र महौजः शालित्वे-नानाक्रमणीयत्वं मानधनत्वेन युद्धे पलायनाभावः धनपूजितत्वेनोपेक्षाराहित्यं संग्रामे लब्धकीर्तित्वेनोत्साहः प्रतापशालित्वं च असंहतत्वेन सहायानपेक्षत्वं अभेदवृत्तित्वेन प्रयोजनैकपरत्वं च व्यज्यत इत्युक्तविशेषणानां साभिप्रायत्वात् परिकरालङ्कारः " [चं०]।

यद्यप्यपुष्टार्थस्य दोषताऽभिधानात्तन्निराकरणेन पुष्टार्थस्वीकारः कृतः, तथाऽप्येकनिष्ठत्वेन बहूनां विशेषणानामेवमुपन्यासे वैचित्र्यमित्यलङ्कार-मध्ये गणितः ।

" अत्र महौजस्त्वादिविशेषणानि परानभिभवनीयत्वाद्यभिप्रायकाणि । न च वाच्यम्—अपुष्टार्थत्वस्य दोषत्वाभिधानादर्थसिद्धं पुष्टार्थत्वमिति दोषाभा-वत्वमात्रतया कुतोऽलङ्कारमध्ये पठितोऽयमिति । एकनिष्ठत्वेन बहूनां विशेष-णानामुक्तोदाहरणवदुपादाने वैचित्र्यमपि ह्यनुभवसिद्धं, न तु दोषाभावत्वमा-त्रमिति संप्रदायः । वयं त्वालोचयामः—तादृशैकविशेषणोपन्यासेऽप्यलङ्का-रत्वमुचितम् । अपुष्टार्थत्वविरहस्य निर्विशेषणतयाऽप्युपपत्तेरर्थसिद्धत्वाभावा-द्वैचित्र्यस्य चानुभवसिद्धत्वात् । यथा—' शुद्धे सद्मनि पल्लविन्युपवने ' इत्यादौ " [प्र०]।

" तादृशैकेति । ' अयि लावण्यजलाशय तस्या हा हंत मीननयनायाः । दूरस्थे त्वयि किं वा कथयामो विस्तरेणालम् ' इत्यादौ " [उ०]।

व्याजोक्तिश्छद्मनोद्भिन्नवस्तुरूपनिगूहनम् ॥ ३२ ॥

निगूढमपि वस्तुनो रूपं कथमपि प्रभिन्नं केनापि व्यपदेशेन यद-पह्नूयते, सा व्याजोक्तिः। न चैषाऽपह्नुतिः, प्रकृताप्रकृतोभयनिष्ठस्य साम्यस्ये-हासंभवात् । उदाहरणम्—

" व्याजोक्तिरिति । उद्भिन्नत्वमस्फुटस्य प्रकाशः । तथा चास्फुटमपि वस्तुस्वरूपं कथंचिद्व्यक्तमथ केनापि यदपह्नूयते सा व्याजोक्तिः । न चेयम-पह्नुतिः । प्रकृताप्रकृतयोः साम्ये तत्स्वीकारात् । अत्र तु तदभावात् । न च प्रथमं गूढस्यानन्तरं प्रकाशस्यापह्नव इति सामग्रीभेदादेवापह्नुतिभेद इति वाच्यम् । एवंविधेऽपि विषये साम्यसंभवेऽपह्नुतेरेवोपगमात् । ननु यत्रापह्न-

वार्थं सादृश्योपक्षेपः सा व्याजोक्तिः, सादृश्यार्थमेव तु यत्रापह्नवोपक्षेपः साऽपह्नुतिरिति चेत्, न। तत्रोभयत्राऽप्यपह्नुतेरेवोपगमात्। यदाहुः—

सास्यायापह्नवो यत्र सा विज्ञेया त्वपह्नुतिः ।
अपह्नवाय सादृश्यं यस्मिन्नेषाऽप्यपह्नुतिः॥ इति ।" [प्र०] ।

" **कथंचित्** । लिंगादिना । **केनापि** । कपटेन । **प्रकृताप्रकृतयोरिति** । इदमुपलक्षणम् । **तत्रोपमेयनिषेधपूर्वकमुपमानव्यवस्थापनम्** । अत्र तु किंचिदनिषिध्यैव निमित्तांतरयुक्तत्वज्ञापनमित्यपि बोध्यम् " [उ०] ।

यदाहुरिति । प्रदीपोद्धृतः श्लोकोऽयं मङ्खुकविरचितेऽलङ्कारसर्वस्वे पाठभेदेन पठ्यते—

" सादृश्यव्यक्तये यत्रापह्नवोऽसावपह्नुतिः ।
अपह्नवाय सादृश्यं यत्र सैषाप्यपह्नुतिः॥ इति संक्षेपः" (रुय्यक, पृ० १११)

शैलेन्द्रप्रतिपाद्यमानगिरिजाहस्तोपगूढोल्लस-
द्रोमाञ्चादिविसंष्ठुलाऽखिलविधिव्यासङ्गभङ्गाकुलः ।
हा शैत्यं तुहिनाचलस्य करयोरित्यूचिवान्सस्मितं
शैलान्तःपुरमातृमण्डलगणैर्दृष्टोऽवताद्वः शिवः ॥ १२९ ॥

अत्र पुलकवेपथू सात्त्विकरूपतया प्रसृतौ शैत्यकारणतया प्रकाशितत्वादपलपितस्वरूपौ व्याजोक्तिं प्रयोजयतः ।

" **शैलेति** । शिवो वो युष्मानवताद्रक्षतु । कीदृशः शैलेन्द्रेण हिमवता प्रतिपाद्यमाना दीयमाना या गिरिजा तद्धस्तस्योपगूढमाश्लेषः । भावे क्तः । तेनोल्लसद्भी रोमाञ्चादिभिर्विसंस्थुलो व्यग्रश्चासावखिलस्य विधिव्यासङ्गस्य भङ्गेनाकुलः । ततश्च सात्त्विकभावगोपनाय तुहिनाचलस्य करयोर्हा शैत्यमित्यूचिवान् । हेति विस्मये । शैलान्तः पुरं च मातॄणां ब्राह्म्यादीनां मण्डलं समूहश्च गणाश्च तैरिति विग्रहः । सस्मितं दृष्टः । अत्र सात्त्विकभावस्य रोमाञ्चादेर्हिमवत्करस्पर्शनिमित्तकत्वेन गोपनाद्व्याजोक्तिरलङ्कारः " [चं०] ।

" अत्र पुलकवेपथू सात्त्विकैकरूपतया प्रसृतौ शैत्यकारणतया प्रकाशनादपलपितस्वरूपाविति व्याजोक्तिं प्रकाशयतः । वयं तु—पुलकवेपथुभ्यां सात्त्विकाभ्यां प्रकाशिता गूढा च रतिस्तयोः शैत्यकारणताप्रकाशनेनापह्नुतेति व्याजोक्तिरियम् " [प्र०] ।

उदाहरणमिदं मङ्खुकेन स्वालंकारसर्वस्वे व्याख्यातमित्थम्—" अत्र रोमाञ्चादिनोद्भिन्नो रतिभावः शैत्यप्रक्षेपेणापलपितः। यद्यप्यपह्नुतोऽपि सस्मितत्वख्यापनेन पुनरप्युद्भिन्नत्वेन प्रकाशितः,तथाप्यपलापमात्रचिन्तयास्यालङ्कारस्योल्लेखः। नन्वपह्नुतिग्रन्थे सादृश्याय योऽपह्नवः, सापह्नुतिः। तथा अपह्नवाय यत् सादृश्यं साप्यपह्नुतिरिति स्थापितम्। व्याजोक्तौ चोत्तरः प्रकारो विद्यते। तत् कथमियमलङ्कारान्तरत्वेन कथ्यते। सत्यम्। उद्भटसिद्धान्ताश्रयणेन तत्रोक्तम्। न हि तन्मते व्याजोक्त्याख्यमलङ्करणमस्ति। इह तु तस्य सद्भावाद् व्यतिरिक्तापह्नुरिति पृथगयमलङ्कारो निर्दिष्टः" [रुय्यक, पृ० १९६]।

किंचित्पृष्टमपृष्टं वा कथितं यत्प्रकल्पते।
तादृगन्यव्यपोहाय परिसंख्या तु सा स्मृता॥ ३३॥

प्रमाणान्तरावगतमपि वस्तु शब्देन प्रतिपादितं प्रयोजनान्तराभावात् सदृशवस्त्वन्तरव्यवच्छेदाय यत् पर्यवस्यति, सा भवेत्परिसंख्या। अत्र च कथनं प्रश्नपूर्वकं तदन्यथा च परिदृष्टम्, तथा उभयत्र व्यपोह्यमानस्य प्रतीयमानता वाच्यत्वं चेति चत्वारो भेदाः।

" **किंचिदिति**। तादृक् तुल्यम्। व्यपोहाय व्यवच्छेदाय। यत्किंचित्कथितं सत्स्वतुल्यस्यान्यस्य व्यवच्छेदाय यत्कल्पते सा परिसंख्या मतेति लक्षणम्। अन्यस्य कथनमन्यव्यपोहाय कथं कल्पत इति चेत्। प्रमाणान्तरेणावगतस्यैव वस्तुनः पुनः शब्देन प्रतिपादनस्य प्रयोजनान्तराभावात्। पृष्टमपृष्टं चेति तु विभागः। कथनं हि किंचित्प्रश्नपूर्वकं किंचिच्चातत्पूर्वकमिति द्वैविध्यमित्यर्थः। ते च द्वे अपि विधे व्यवच्छेद्यस्य प्रतीयमानत्ववाच्यत्वाभ्यां प्रत्येकं द्विविधे" [प्र०]।

क्रमेणोदाहरणम्—

किमासेव्यं पुंसां सविधमनवद्यं द्युसरितः
किमेकान्ते ध्येयं चरणयुगलं कौस्तुभभृतः।
किमाराध्यं पुण्यं किमभिलषणीयं च करुणा
यदासक्त्या चेतो निरवधिविमुक्त्यै प्रभवति॥ १३०॥

किं भूषणं सुदृढमत्र यशो न रत्नं

किं कार्यमार्यचरितं सुकृतं न दोषः ।
किं चक्षुरप्रतिहतं धिषणा न नेत्रं
जानाति कस्त्वदपरः सदसद्विवेकम् ॥ १३१ ॥
कौटिल्यं कचनिचये करचरणाधरदलेषु रागस्ते ।
काठिन्यं कुचयुगले तरलत्वं नयनयोर्वसति ॥ १३२ ॥
भक्तिर्भवे न विभवे व्यसनं शास्त्रे न युवतिकामास्त्रे ।
चिंता यशसि न वपुषि प्रायः परिदृश्यते महताम् ॥ १३३ ॥

" तत्र प्रश्नपूर्वके कथने व्यवच्छेद्यस्य प्रतीयमानता यथा " [प्र०] ।

" किमिति । अत्र किमासेव्यमिति प्रश्नः । अनिंद्यं गंगासमीपं नान्यनदीसविधं, नापि कान्तानितंबादि । विष्णोः पादयुगं नान्यदेवस्य, नाप्यङ्गनादि । पुण्यं न पापं । दया न हिंसादि । येषु गंगासमीपादिषु आसक्त्या । निरवधिर्या विमुक्तिः सायुज्यरूपा तदर्थं चेतः प्रभवति समर्थं भवति" [उ०]।

" अत्रान्यनदीसविधादि व्यवच्छेद्यं प्रतीयमानम् । तत्रैव वाच्यं व्यवच्छेद्यं यथा " [प्र०] । " किं भूषणमिति । आर्यचरितं शिष्टसेवितम् । सुकृतं पुण्यकर्म । दोषो व्यभिचारादिः । धिषणा बुद्धिः । अभिमतोत्तरदानादाह । जानातीति । सदसद्विवेकं उत्कृष्टनिकृष्टविभागं त्वदपरः त्वदन्यः कः जानाति न कोऽपीत्यर्थः " [उ०] ।

" अप्रश्नपूर्वके कथने व्यवच्छेद्यं प्रतीयमानं यथा " [प्र०] । "कौटिल्यमिति । कौटिल्यं वक्रता कपटं च । कचनिचये केशसमूहे, न तु हृदये । रागः रक्तिमा प्रीतिश्च । करादिषु, न परपुरुषादिषु । काठिन्यं दार्ढ्यं निर्दयत्वं च । कुचयुगले, न तु हृदये । तरलत्वं चंचलता अविचार्यकारित्वं च । नयनयोः, न मनसि । आर्या छन्दः । अत्र कौटिल्यादेरितराधिकरणकत्वं व्यवच्छेद्यं व्यंग्यम् । प्रश्नश्च नास्ति " [उ०] ।

" अप्रश्नपूर्वक एव कथने व्यवच्छेद्यं वाच्यं यथा " [प्र०] ।

"भक्तिरिति । युवतिरूपे कामास्त्रे । आर्या छन्दः । अत्र यत्र कविप्रतिभानिर्मिता इतरव्यावृत्तिस्तत्रालङ्कारता । यथा 'कौटिल्यं कचनिचये' इत्यत्र कौटिल्यादिकं कविप्रतिभया एकीकृतमिति तद्द्वारा तत्प्रतियोगिकवृत्तिस्तन्निर्मितेति बोध्यम् " [उ०]।

" श्लेषेणाप्येषा संभवति । यथा—' चित्रेषु वर्णसंकराः,' ' खलसंयोगः शालिषु ' इत्यादि " [प्र०]।

यथोत्तरं चेत्पूर्वस्य पूर्वस्याऽर्थस्य हेतुता ।

तदा कारणमाला स्यात्

उत्तरमुत्तरं प्रति यथोत्तरम् । उदाहरणम्–

जितेन्द्रियत्वं विनयस्य कारणं गुणप्रकर्षो विनयादवाप्यते ।
गुणप्रकर्षेण जनोऽनुरज्यते गुणानुरागप्रभवा हि संपदः ॥१३४॥

" हेतुमता सह हेतोरभिधानमभेदतो हेतुः "

इति हेत्वलंकारोऽत्र न लक्षितः । आयुर्घृतमित्यादिरूपो ह्येष न भूषणतां कदाचिदर्हति, वैचित्र्याभावात् ।

अविरलकमलविकासः सकलालिमदश्च कोकिलानंदः ।
रम्योऽयमेति संप्रति लोकोत्कंठाकरः कालः ॥ १३५ ॥

इत्यत्र काव्यरूपतां कोमलानुप्रासमहिम्नैव समाम्नासिषुर्न तु हेत्वङ्कारकल्पनयेति पूर्वोक्तं काव्यलिङ्गमेव हेतुः ।

" **यथोत्तरमिति** । यथोत्तरमिति वीप्सायां यथाशब्दः । तेनोत्तरोत्तरं प्रतीत्यर्थः । उदाहरणम्—**जितेन्द्रियत्वमिति** " [प्र०]।

" अत्र पदे भग्नप्रक्रमत्वं दोषः । जितेंद्रियत्वं विनयस्य कारणमित्युक्ते तत्कस्य कारणमित्युदिताकांक्षा यद्यपि उत्तरवाक्येन निवर्त्यते, तथापि न साक्षात् । एवमऽग्रेपि । अस्याः किमुपस्कारकतयाऽलङ्कारत्वं कया रीत्या चोपस्कारकत्वमिति चिंत्यम् । उत्तरोत्तरोत्तमवस्तुकारणत्वात्सर्वे एते उपादेया इति ज्ञानं चमत्कारकारणमिति वदन्ति " [उ०] ।

" नन्वत्र कार्यकारणभावालंकृतिप्रपञ्चनप्रसंगेन हेत्वलङ्कारोऽपि लक्षणार्हः । उक्तश्चायं भट्टोद्भटेन––' हेतुमता सह हेतोरभिधानमभेदतो हेतुः ' इति । तत्किं न लक्षित इति चेत्, आयुर्घृतमित्यादिरूपस्यास्य वैचित्र्याभावेनालङ्कारत्वस्यैवाभावात् ।

"नन्वेवम्—' अविरल ' इत्यादौ प्राचां काव्यरूपताऽभिधानं विरुध्येत अलङ्काराभावादिति चेत्, न । कोमलानुप्रासेनैव तत्संभवात् । तत्किं हेत्वलङ्कारो नास्त्येव । क एवमाह । कीदृशस्तर्ह्यसाविति चेत्, पूर्वोक्तं काव्यलिङ्गमेवेति" [प्र०]

उक्तश्चायं भट्टोद्भटेनेति । अत्र हि प्रदीपकारवचनं अज्ञानविजृंभितमात्रं प्रतिभाति । लक्षणमेतद्रुद्रटेन स्वीये काव्यालङ्कारे प्रोक्तम् । उद्भटादिभिस्तु हेत्वलङ्कारस्य नामापि न गृहीतम् । भामहेन चायं प्रत्याख्यात एव—' हेतुश्च सूक्ष्मो लेशोऽथ नालङ्कारतया मतः ' (भामह, २.८६) । रुद्रटस्तु—' हेतुमता सह हेतोरभिधानमभेदकृद्भवेद्यत्र । सोऽलङ्कारो हेतुः स्यादन्येभ्यः पृथग्भूतः ॥ ' (७. ८२) इति हेत्वलङ्कारं लक्षयित्वा अविरलकमलेत्याद्येवोदाहरणं दत्तवान् । नमिसाधुः स्वटिप्पणे प्राह—" अविरलानां कमलानां विकासहेतुत्वाद्वसन्तकाल एव तथोच्यते । एवं सकलालिमदश्चेत्यादावपि द्रष्टव्यम् । न त्वविरलानां कमलानां विकासो यत्रेत्यादि बहुव्रीहिः कर्तव्यः । तदा त्वभेदो न स्यात् । उदाहरणदिगियम् । इदं तूदाहरणं यथा—' आयुर्घृतं नदी पुण्यं भयं चौरः सुखं प्रिया । वैरं द्यूतं गुरुर्ज्ञानं श्रेयो ब्राह्मणपूजनम् । " इति । संकेतकृत्कथनमप्यत्र महत्त्वपूर्णम्—" अत्र वसन्तकालो हेतुः । शेषा हेतुमन्तः । कमलविकासहेतुत्वात्कालोऽपि विकासः । एवमग्रेऽपि । न तु विकासयति मदयत्यानन्दयति पोषार्थतया बिभर्तीति रुद्रटाशयेन व्युत्पत्तिः । हेतुहेतुमतोरभेदाभावप्रसङ्गात् । समाम्नासिपुरिति भामहोद्भटाद्याः । अव्यभिचारितया विकासादेर्नैरन्तर्येण करणमिहोपचारप्रयोजनं व्यङ्ग्यम् । तच्च गुणीभूतमिति महिम्नैवेत्यत्रैवकारेण प्रतिपाद्यते । अस्मन्मते काव्यलिङ्गमेव हेतुः । रुद्रटस्तु भिन्नमूचे " इति । अनेन हि कश्चिदन्यः (स्यात् भामहविवरणाख्यः) उद्भटग्रन्थो माणिक्यचन्द्रादीनां पुरत आसीदित्यादि लक्ष्यते । एतत्सर्वं विस्तरभयान्न प्रतिपाद्यते ।

क्रियया तु परस्परम् ॥ ३४ ॥

वस्तुनोर्जननेऽन्योन्यम्

अर्थयोरेकक्रियामुखेन परस्परं कारणत्वे सति अन्योन्यं नामालङ्कारः । उदाहरणम्—

हंसाण सरेहिँ सिरी सारिज्जइ अह सराण हंसेहिं ।
अण्णोण्णं विअ एए अप्पाणं णवार गरुअन्ति ॥ १३६ ॥

' हंसानां सरोभिः श्रीः सार्यतेऽथ सरसां हंसैः ।
अन्योन्यमेवैते आत्मानं केवलं गुरूकुर्वन्ति ' ॥

अत्रोभयेषामपि परस्परं जनकता, मिथः श्रीसारतासंपादनद्वारेण।

" क्रियेति। वस्तुनोः परस्परं जन्यजनकभावोऽसंभवी। तस्य तं प्रत्येव पौर्वापर्ययोर्द्वयोरसंभवादित्यत उक्तं क्रियेति। एकक्रियाजननद्वारेणेत्यर्थः। अविशिष्टं वस्तु तावदजातकल्पम्। तेन वैशिष्ट्यप्रयोजकक्रियाजनके जनकत्वोपचारः। तथा च मिथस्तादृशैकक्रियाजनकत्वमन्योन्यालङ्कार इति सारम्।" [प्र०]।

" हंसाणेति। सार्यते सारीक्रियते। प्रकृते शोभाविशेषविशिष्टान्हंसान्प्रति सरसां कारणत्वम्, शोभाविशेषविशिष्टसरांसि प्रति हंसानां कारणत्वम्, परस्परशोभाजननद्वारेणैवेतिभावः। परस्परक्रियया परस्परमुपकारजननज्ञानकृतोऽत्र चमत्कारः" [उ०]।

उत्तरश्रुतिमात्रतः।

प्रश्नस्योन्नयनं यत्र क्रियते तत्र वा सति ॥ ३५ ॥

असकृद्यदसंभाव्यमुत्तरं स्यात्तदुत्तरम्।

प्रतिवचनोपलम्भादेव पूर्ववाक्यं यत्र कल्प्यते, तदेकं तावदुत्तरम्। उदाहरणम्—

वाणिअअ हत्थिदन्ता कुत्तो अम्हाण वग्घकित्ती अ।
जाव लुलिआलअमुही घरम्मि परिसक्कए सोह्णा ॥ १३७ ॥

ध्व. पृ. १२८

वाणिजक हस्तिदन्ताः कुतोऽस्माकं व्याघ्रकृत्तयश्च।
यावल्लुलितालकमुखी गृहे परिसंक्रामति स्नुषा ॥

" उत्तरेति। यत्रोत्तरश्रवणमात्रेणानुपात्तमपि प्रश्नवाक्यं परिकल्प्यते तदेकमुत्तरम्। प्रश्ने सति लोकातिक्रान्तगोचरतयाऽसंभाव्यं यदसकृत्प्रतिवचनं तत्पुनरपरम्। अत्र प्रश्नोत्तरयोः सकृदुपादानं न चमत्करोतीत्यसकृदित्युक्तम्। असंभाव्यं तु चमत्कारित्वमिति मान्याः। अप्रसिद्धत्वमिति तु वयम्। तच्च प्रमाणान्तरागोचरविषयत्वात्। अत एव प्रश्नपरिसंख्यातो भेदः। तत्र हि लोकप्रसिद्धविषयस्योत्तरस्य प्रयोजनान्तराभावेनान्यव्यपोहे तात्पर्यम्। अत्र तु निगूढविषयतया वाच्य एव तात्पर्यविश्रामः। तत्राद्यं यथा—वाणिअअेति" [प्र०]।

" ललिताः चंचलाः अलकाः केशा यत्र तादृशं मुखं यस्याः एतादृशी स्नुषा परिसंक्रामति परिभ्रमति । गाथा छन्दः । अस्यामासक्तो मत्सुतो मृगयां न करोतीत्युत्तरं व्यंग्यम् । क्रेतारं वणिजं प्रति वृद्धव्याधोक्तिरियम् " [उ०] ।

हस्तिदन्तव्याघ्रकृत्तीनामहमर्थी, ताः मूल्येन प्रयच्छेति क्रेतुर्वचनं अमुना वाक्येन समुन्नीयते । न चैतत् काव्यलिङ्गम् । उत्तरस्य तादृूप्यानुपपत्तेः । न हि प्रश्नस्य प्रतिवचनं जनको हेतुः । नापीदमनुमानम् । एकधर्मिनिष्ठतया साध्यसाधनयोरनिर्देशादित्यलङ्कारान्तरमेवोत्तरं साधीयः । प्रश्नादनन्तरं लोकातिक्रान्तगोचरतया यत् असंभाव्यरूपं प्रतिवचनं स्यात्, तत् अपरमुत्तरम् । अनयोश्च सकृदुपादाने न चारुताप्रतीतिरित्यसकृदित्युक्तम् । उदाहरणम्––

का विसमा देवगई किं दुल्लहं जं जणो गुणग्गाही ।
किं सोक्खं सुकलत्तं किं दुक्खं जं खलो लोओ ॥ १३८ ॥

' का विषमा दैवगतिः किं दुर्लभं यज्जनो गुणग्राही ।
किं सौख्यं सुकलत्रं किं दुःखं यत् खलो लोकः '

प्रश्नपरिसंख्यायामन्यव्यपोहे एव तात्पर्यम्, इह तु वाच्ये एव विश्रान्तिरित्यनयोर्विवेकः ।

"हस्तिदन्तव्याघ्रकृत्तीनामहमर्थी, मूल्येन ताः प्रयच्छेति क्रेतृवचनमनेनोत्तरवाक्येनानुमीयते । सूत्रे च प्रश्नपदं पूर्ववाक्यमात्रपरमिति प्रश्नाभावेऽप्यदोषः । यद्वा हस्तिदन्तव्याघ्रकृत्तयस्तव सन्तीति प्रश्नवाक्यमिहोन्नेयम् । न च वाच्यमिदं काव्यलिङ्गविशेष एव । उत्तरस्य प्रश्नं प्रति हेतुत्वाभावात् उत्तरस्य तदनुत्पादकत्वात् । काव्यलिङ्गस्य तदात्मकत्वात् । तर्हि ज्ञापकतयाऽनुमानमेवेति चेत्, न । एकधर्मिगतत्वेन साध्यसाधननिर्देशो हि तत् । न चात्र तथा । तस्मादलङ्कारान्तरमेवोत्तरम् ।

"द्वितीयं यथा—का विसमेति ॥ अत्र दैवगत्यादेर्वैषम्यादि लोकाप्रसिद्धमेव प्रकाश्यते । ' किमासेव्यं पुंसाम् ' इत्यादिप्रश्नपरिसंख्यायामन्यव्यवच्छेदे तात्पर्यम् । अत्र तु वाच्य एवेति ततो भेदः " [प्र०] ।

" एकधर्मी । पक्षः । न च स्नुषागृहनिवासस्य हस्तिदन्ताद्यभावे निमित्तत्वेन काव्यलिङ्गमेवास्तु । तत्संभवेऽपि प्रश्नोन्नयनद्वारेणैव चमत्कारा-

दित्याशयः । केति । प्रश्नस्य सकृदुपादाने उत्तरस्यानेकत्वेऽप्ययम् । 'किं स्वर्गादधिकसुखं बंधुसुहृत्पंडितैःसमं गोष्ठी। सौराज्यशुद्धवृत्ति सत्काव्यरसामृतं स्वादु ॥' इति । एवं प्रश्नोत्तरयोरभिन्नत्वेऽप्ययम् । 'केदारपोषणरता' इत्यादौ एवं प्रश्नद्वयस्यैकोत्तरत्वादावपि । यथा 'के खेऽटाः किं चलं वयः' इत्यादौ " [उ०] ।

कुतोऽपि लक्षितः सूक्ष्मोऽप्यर्थोऽन्यस्मै प्रकाश्यते ॥३६॥
धर्मेण केनचिद्यत्र तत्सूक्ष्मं परिचक्षते ।

कुतोऽपि आकारादिङ्गिताद्वा । सूक्ष्मस्तीक्ष्णमतिसंवेद्यः । उदाहरणम्—

वक्त्रस्यन्दिस्वेदबिन्दुप्रबन्धैर्दृष्ट्वा भिन्नं कुङ्कुमं काऽपि कण्ठे ।
पुंस्त्वं तन्व्या व्यञ्जयन्ती वयस्या स्मित्वा पाणौ खड्गलेखां लिलेख ॥१३९॥

अत्र आकृतिमालोक्य कयाऽपि वितर्कितं पुरुषायितम् असिलतालेखनेन वैदग्ध्यादभिव्यक्तिमुपनीतम् । पुंसामेव कृपाणपाणिता, योग्यत्वात् । यथा वा—

संकेतकालमनसं विटं ज्ञात्वा विदग्धया ।
हसन्नेत्रार्पिताकूतं लीलापद्मं निमीलितम् ॥१४०॥ ध्व. २. १०३.

अत्र जिज्ञासितः संकेतकालः कयाचिदिंगितमात्रेण विदितो निशासमयशंसिना कमलनिमीलनेन लीलया प्रतिपादितः ।

कुतोऽपीति । तत्र रूपादेरन्यथात्वमाकार इति प्रदीपः । "**वक्त्रेति** । कण्ठे स्थितं कुङ्कुमं वक्त्रात् स्यन्दिभिर्गलद्भिः स्वेदबिन्दूनां प्रबन्धैः पङ्क्तिभिर्भिन्नं संभिन्नं दृष्ट्वा कापि वयस्या सखी स्मित्वा हसित्वा तन्व्याः पुंस्त्वं पुरुषायितं व्यञ्जयन्ती सती पाणौ खड्गलेखां लिखितवती । पुंसामेव पाणौ तस्या उचितत्वात् । अत्राकारेण लक्षितं सुबुद्धिवेद्यतया सूक्ष्मं पुरुषायितं पाणौ खड्गलेखनेन प्रकाशितमिति सूक्ष्मालङ्कारः" [चं०] ।

चेष्टाविशेष इङ्गितमिति प्रदीपः । "**संकेतेति** । विटं जारम् । संकेतकाले मनो यस्य । तं जिज्ञासुमित्यर्थः । अत एव हसद्भ्यां नेत्राभ्यामर्पितं सूचितमाकूतं रहस्यं येन तादृशं ज्ञात्वा विदग्धया नायिकया लीलासम्बन्धि पद्मं निमीलितमित्यन्वयः । अत्र नेत्रेङ्गितेन लक्षितः सूक्ष्मोऽभिप्रायः कामिन्या निशासूचकेन पद्मनिमीलनेन प्रकाशितः" [चं०] । "अमुं भावालङ्कारमाह रुद्रटः । नव्योक्तपिहितालंकारोऽप्यत्रैवान्तर्भूतः" [उ०] ।

उत्तरोत्तरमुत्कर्षो भवेत्सारः परावधिः ॥ ३७ ॥

परः पर्यन्तभागः अवधिर्यस्य धाराधिरोहितया तत्रैवोत्कर्षस्य विश्रान्तेः । उदाहरणम्––

राज्ये सारं वसुधा वसुंधरायां पुरं पुरे सौधम् ।
सौधे तल्पं तल्पे वराङ्गनाऽनङ्गसर्वस्वम् ॥ १४१ ॥ रु. ७.९७.

" **उत्तरोत्तरमिति** । परावधिरिति परः पर्यन्तभागो गद्यस्य पद्यस्य वा अवधिरुत्कर्षसीमा यस्य तेन पर्यन्तभागो यत्र सर्वोत्कृष्ट इत्यर्थः । धाराधिरोहितया तत्रैवोत्कर्षविश्रान्तेः । उदाहरणम्—राज्ये इति " [प्र०] ।

" उत्कर्षः श्लाघ्यगुणानामश्लाघ्यगुणानां च । तत्राद्य उदाहृतः । अंत्यो यथा—

तृणाल्लघुतरस्तूलस्तूलादपि च याचकः ।
वायुना किं न नीतोऽसौ मामयं याचयिष्यति " [उ०] ॥

भिन्नदेशतयाऽत्यन्तं कार्यकारणभूतयोः ।
युगपद्धर्मयोर्यत्र ख्यातिः सा स्यादसंगतिः ॥ ३८ ॥

इह यद्देशं कारणम्, तद्देशमेव कार्यमुत्पद्यमानं दृष्टम्, यथा धूमादि । यत्र तु हेतुफलरूपयोरपि धर्मयोः केनाप्यतिशयेन नानादेशतया युगपदवभासनम्, सा तयोः स्वभावोत्पन्नपरस्परसंगतित्यागात् असंगतिः । उदाहरणम्–

जस्सेअ वणो तस्सेअ वेअणा भणइ तं जणो अलिअम् ।
दन्तक्खअं कवोले वहूए वेअणा सवत्तीणम् ॥ १४२ ॥

' यस्यैव व्रणस्तस्यैव वेदना भणति जनस्तदलीकम् ।
दंतक्षतं कपोले वध्वा वेदना सपत्नीनाम् ' ॥

एषा च विरोधबाधिनी न विरोधः । भिन्नाधारतयैव द्वयोरिह विरोधितायाः प्रतिभासात् । विरोधे तु विरोधित्वम् एकाश्रयनिष्ठमनुक्तमपि पर्यवसितम् । अपवादविषयपरिहारेणोत्सर्गस्य व्यवस्थितेः । तथा चैवं निदर्शितम् ।

" **भिन्नेति** । अत्रात्यन्तमिति देशभेदस्यैवोपकारकं, न तु पृथगपि विवक्षितार्थम् । युगपदिति स्वरूपनिर्वचनम्, न तु व्यावर्तकम् । तेन कार्य-

कारणभूतयोर्धर्मयोर्यत्र भिन्नदेशतया संप्रतिपादनं सा असंगतिः । हेतुफलयोरग्निधूमाद्योरिव प्रसिद्धायाः समानदेशत्वरूपायाः संगतेः परित्यागात् । तथा प्रतिपादनं च कारणान्तरेभ्यो वैलक्षण्यात् । उदाहरणम्—

“ **जस्से इति** । स्पष्टम् । नन्वयं विरोधालङ्कार एव । हेतुफलयोर्वैयधिकरण्यस्य विरोधरूपत्वादिति चेत्, न । वैयधिकरण्यं ह्यसंगतिः । न च सैव विरोधः । किं तु तद्बोधिका । वैयधिकरण्येन तयोर्विरोधप्रतिभासनात् । नन्वेवमपि प्रतीयमानो विरोध एवालङ्कारोऽस्तु, न तु तद्बोधिकाऽसंगतिरपि साक्षात् । न च वाच्यं समानाधिकरण एव विरोधो विरोधालंकारनिर्वाहको न तु व्यधिकरणोऽपीति । लक्षणे सामान्यत एव विरोधस्योक्तत्वादिति । मैवम् । सामान्येनोक्तस्यापि विशेष एव पर्यवसानात् । अपवादविनिर्मुक्त एव हि देशे उत्सर्गः प्रवर्तते । विरोधालङ्कारस्य चासंगत्यलङ्कारोऽपवाद इति व्यधिकरणविरोधस्यापवादाक्रान्ततया तद्भिन्नविरोधे विरोधालङ्कार इति । अत एव तथैवोदाहृतम् ” [प्र०] ।

“ **स्वरूपनिर्वचनमिति** । ‘उद्भिन्नमात्रे वयसि दृष्ट्वा प्रियतमाधरम् । भावी लाक्षारसोऽत्रेति कामिनो रज्यते मनः॥’ इत्यत्र कालभेदेऽपि असंगतेरिष्टत्वात् । कार्यकारणयोः पौर्वापर्यविपर्ययरूपातिशयोक्तेश्च पृथक् वैचित्र्यकारित्वेन समावेश एव युक्त इति भावः । **प्रसिद्धायाः** । कार्यकारणस्वभावसिद्धायाः । **वैलक्षण्यादिति** । कारणगतं कमप्यतिशयमभिसंधायेत्यर्थः । (**जस्से इति** ।) व्रणक्षतपदयोः प्रक्रमभेदश्चिन्त्यः । **विरोधरूपत्वादिति** । विरोधोऽनुपपत्तिः । सा च सहानवस्थितयोः सहावस्थान इव सहस्थितयोः सहानवस्थानेऽपि तुल्या । तस्याश्च प्ररोहे दोष एवेत्याभासता वाच्या । तथा च विरोधाभास एवेत्यर्थः ” [उ०] ।

समाधिः सुकरं कार्यं कारणान्तरयोगतः ।

साधनान्तरोपकृतेन कर्त्रा यद् अक्लेशेन कार्यमारब्धमाधीयते, स समाधिर्नाम । उदाहरणम्—

मानमस्या निराकर्तुं पादयोर्मे पतिष्यतः ।
उपकाराय दिष्ट्येदमुदीर्णं घनगर्जितम् ॥ १४३ ॥ का. द. २. २९९.

“ **समाधिरिति** । इष्टात्कारणादन्येन कारणेनोपकृतः कर्ता यदक्लेशेन

कार्यं करोति स समाधिः । सम्यगाधिः समाधिरिति व्युत्पत्तेः । उदाहरणम्—**मानामिति** " [प्र०] ।

" अत्र मानापनयनं कार्यम् । पादपातो हेतुः । घनगर्जितं हेत्वन्तरम् । यस्मादक्लेशेन कार्यं सुकरं स्यादित्यर्थः " [सं०] ।

समं योग्यतया योगो यदि संभावितः क्वचित् ॥ ३९ ॥

इदमनयोः श्लाघ्यमिति योग्यतया संबन्धस्य नियतविषयमध्यवसानं चेत्तदा समम् । तत् सद्योगेऽसद्योगे च । उदाहरणम्—

धातुः शिल्पातिशयनिकषस्थानमेषा मृगाक्षी
रूपे देवोऽप्ययमनुपमो दत्तपत्रः स्मरस्य ।
जातं दैवात्सदृशमनयोः संगतं यत्तदेत-
च्छृङ्गारस्योपनतमधुना राज्यमेकातपत्रम् ॥ १४४ ॥

यथा वा—

चित्रं चित्रं बत बत महच्चित्रमेतद्विचित्रं
जातो दैवादुचितरचनासंविधाता विधाता ।
यन्निम्बानां परिणतफलस्फीतिरास्वादनीया
यच्चैतस्याः कवलनकलाकोविदः काकलोकः ॥ १४५ ॥

"**सममिति** । योग्यता आनुरूप्यम् । संभावितः सर्वसम्मतः । तेनेदमनयोः समुचितमिति योग्यतया संबन्धस्य नियतविषयमध्यवसानं चेत्तदा समं नामालंकारः । योग्यता च प्रकर्षनिकर्षाभ्याम् । तत्र प्रकर्षेण यथा—**धातुरिति**" [प्र०] ।

"**योगः** । संयोगादिरूपः कार्यकारणभावश्च । **आनुरूप्यमिति** । तेन सता सतो योगोऽसता चासतो योग इति लब्धम् । तेन सदसतोर्योगे नायम् । अनौचित्यात् । समुच्चये सतोरसतोर्वा कारणयोः समुच्चयः, अत्र त्वकारणयोरपि तयोर्योगस्यौचित्याभिधानमिति विशेषः " [उ०] ।

धातुरिति । एषा मृगाक्षी धातुः ब्रह्मणः शिल्पातिशयस्य कौशलातिशयस्य निकषस्थानं परीक्ष्योपलरूपा । अनुपमः । अयं देवः राजा अपि स्मरस्य कामदेवस्य रूपे सौन्दर्ये दत्तपत्रः दत्तावलम्बनः ततोऽप्यधिकरूपवानित्यर्थः । यत् दैवात् अनयोः एतत् सदृशमुचितं संगतं समागमः जातं जातः तत् अधुना शृङ्गारस्य एकातपत्रं एकच्छत्रं राज्यं उपनतं प्राप्तम् ।

निकर्षेण यथा—"चित्रमिति। अत्र चित्रबतशब्दयोर्वीप्सा विस्मयातिशयद्योतनाय। परिणतं पक्वं स्फीतिः समृद्धिः। एतस्याः फलसमृद्धेः कवलनकला भक्षणचातुरी तत्र कोविदः पण्डितः। अत्र द्वयोरपि निकृष्टतयोचितयोर्योगः" [चं०]।

"कार्यकारणभावसंसर्गस्यानुरूपत्वं कारणात्स्वसमानगुणकार्योत्पत्त्या। यथा 'मंत्रार्पितहविर्दीप्तहुताशनतनूभुवः। शिखास्पर्शेन पांचाल्याः स्थाने दग्धः सुयोधनः॥' इति। यादृशगुणकवस्तुसंसर्गस्तादृशगुणोत्पत्त्याऽपि समम्। 'वडवानलकालकूटलक्ष्मीगरलव्यालगणैः सहैधितः। रजनीरमणो भवेन्नृणां न कथं प्राणवियोगकारणम्॥' क्वचिदिष्टप्राप्त्यर्थं प्रयुक्तात्कारणात्तत्प्राप्त्या च। यथा 'उच्चैर्गजैरटनमर्थयमान एव त्वामाश्रयन्निह चिरादुषितोऽस्मि राजन्। उच्चाटनं त्वमपि लंभयसे तदेव मामद्य नैव विफला महतां हि सेवा॥' इत्यत्र" [उ०]।

क्वचिद्यदतिवैधर्म्यान्न श्लेषो घटनामियात्।
कर्तुः क्रियाफलावाप्तिर्नैवानर्थश्च यद्भवेत्॥ ४०॥
गुणक्रियाभ्यां कार्यस्य कारणस्य गुणक्रिये।
क्रमेण च विरुद्धे यत्स एष विषमो मतः॥ ४१॥

द्वयोरत्यन्तविलक्षणतया यत् अनुपपद्यमानतयैव योगः प्रतीयते (१), यच्च किंचिदारभमाणः कर्ता क्रियायाः प्रणाशात् न केवलमभीष्टं तत्फलं न लभेत, यावदप्रार्थितमप्यनर्थं विषयमासादयेत् (२), तथा सत्यपि कार्यस्य कारणरूपानुकारे यत् तयोर्गुणौ क्रिये च परस्परविरुद्धतां व्रजतः (३।४), स समविपर्ययात्मा चतूरूपो विषमः। क्रमेणोदाहरणम्—

शिरीषादपि मृद्वङ्गी क्वेयमायतलोचना।
अयं क्व च कुकूलाग्निकर्कशो मदनानलः॥ १४६॥
न. सा. १६, २८

सिंहिकासुतसंत्रस्तः शशः शीतांशुमाश्रितः।
जग्रसे साश्रयं तत्र तमन्यः सिंहिकासुतः॥ १४७॥

सद्यः करस्पर्शमवाप्य चित्रं रणे रणे यस्य कृपाणलेखा ।
तमालनीला शरदिन्दुपाण्डु यशस्त्रिलोक्याभरणं प्रसूते ॥ १४८ ॥
न. सा. १, ६२

" क्वचिदिति । द्वयोरत्यन्तविलक्षणतया यत्क्वचिद्योगो घटनां नोपैति, किं त्वनुपपद्यमानतयैव प्रतीयते स एको विषमः । यच्च क्वचित्कार्यमारभमाणः कर्ता बलवत्कारणान्तरेण विष्टम्भात्तत्क्रियाफलं नाप्नोति, प्रत्युतानिष्टं विषयमासादयेत्स द्वितीयः । यच्च क्रियाफललाभेऽपि कार्यकारणयोर्गुणौ क्रिये वा विरुद्धे भवतस्तौ तृतीयचतुर्थौ विषमौ । सर्वत्र समताया विपर्ययात् । तत्र प्रथमो यथा " [प्र०] ।

" शिरीषादिति । शिरीषात् अपि मृद्वङ्गी कोमलाङ्गी इयं आयतलोचना नायिका क्व । कुकूलाग्निः तुषाग्निरिव कर्कशो दुःसहो मदनानलः क्व । अत्र नायिकामदनानलयोरत्यन्तवैलक्षण्यात्तयोः सम्बन्धोऽनुपपद्यमानतयैव क्व शब्दद्वयेन प्रतीयते " [झ०] । तत्र द्वितीयो विषमो यथा—

सिंहिकेति । सिंहिकायाः सिंह्याः सुतः तस्मात् संत्रस्तः भीतः शशः मृगविशेषः शीतांशुं चन्द्रं आश्रितः । किंतु न तत्र त्राणमभूत् । प्रत्युत साश्रयं सचन्द्रं तं अन्यः सिंहिकासुतः राहुः (सिंहिका राहुमाता) जग्रसे । " अत्र त्राणरूपफलाभावेऽन्येन ग्रासरूपोऽनर्थः " [प्र०]। तृतीयो विषमो यथा—

सद्य इति । " तमालवन्नीला कृपाणलेखा यस्य राज्ञः करस्पर्शमवाप्य सद्यस्तत्कालं रणे रणे प्रतिसंग्रामं शरदिन्दुवत्पाण्डु शुभ्रं यशः प्रसूते एतच्चित्रमित्यन्वयः । अत्र कार्यकारणयोर्विरुद्धगुणत्वरूपो विषमः " [चं०] ।

आनन्दममन्दमिमं कुवलयदललोचने ददासि त्वम् ।
विरहस्त्वयैव जनितस्तापयतितरां शरीरं मे ॥ १४९ ॥

अत्रानन्ददानं शरीरतापेन विरुध्यते । एवम्—

विपुलेन सागरशयस्य कुक्षिणा भुवनानि यस्य पपिरे युगक्षये ।
मदविभ्रमासकलया पपे पुनः स पुरस्त्रियैकतमयैकया दृशा ॥ १५० ॥
शि. व. १३. ४०

इत्यादावपि विषमत्वं यथायोगमवगन्तव्यम् ।

चतुर्थो यथा—आनन्दमिति । स्पष्टम् । आर्येयं रुद्रटालंकारे लभ्यते (९.४७) । " अत्र नायिकाविरहयोर्जन्यजनकयोरानंदजननतापक्रिययोः-

विरोधः । न चात्रासंगतिर्विरोधो वा । विरोधे विरोधिनोः सामानाधिकरण्यस्यासंगतौ कार्यकारणयोर्वैयधिकरण्यस्य चमत्कारप्रयोजकता, अत्र तु कार्यकारणवृत्तिविजातीयक्रियागुणयोगस्य चमत्कारितेति विशेषात् " [उ०] ।

" अत्रानन्ददानशरीरतापक्रिये विरुद्धे । सूत्रे विभाग उपलक्षणपरः । तेन संबन्धिनोरानुरूप्याभावात्मकस्य विषमस्यान्येऽपि भेदा भवन्ति । तत्रावयवावयविनोर्वैषम्ये यथा " [प्र०] । " विपुलेनेति । सागरे शेते इति सागरशयः तादृशस्य । यस्य श्रीकृष्णस्य । कुक्षिणा उदरेण । युगक्षये प्रलये । पपिरे जग्रसिरे । मदविभ्रमापूर्णया चक्षुःकोणमात्रेणैव । पपे । सादरमवलोकनमत्र पानम् । पानपदार्थयोर्भेदेऽप्यभेदवर्णनादुदाहरणमिदम् । अत्र सागरशयत्वं ससागरसकलभुवनग्रासश्चेत्येकं विषमम् । एवं यस्य कुक्षिरेव सकलभुवनपानसमर्था तस्य संपूर्णस्यावयविनः स्त्रिया एकदृशा पानं चापरं विषमम् । योगवैषम्यादेव चमत्कारान्न विरोधाऽऽशंका " [उ०] ।

महतोर्यन्महीयांसावाश्रिताश्रययोः क्रमात् ।
आश्रयाश्रयिणौ स्यातां तनुत्वेऽप्यधिकं तु तत् ॥ ४२ ॥

आश्रितम् आधेयम्, आश्रयस्तदाधारः, तयोर्महतोरपि विषये तदपेक्षया तनू अप्याश्रयाश्रयिणौ प्रस्तुतवस्तुप्रकर्षविवक्षया यथाक्रमं यत् अधिकतरतां व्रजतः तदिदं द्विविधम् अधिकं नाम । क्रमेणोदाहरणम्--

अहो विशालं भूपाल भुवनत्रितयोदरम् ।
माति मातुमशक्योऽपि यशोराशिर्यदत्र ते ॥ १५१ ॥
का. द. २ २१९

युगान्तकालप्रतिसंहृतात्मनो जगन्ति यस्यां सविकाशमासत ।
तनौ ममुस्तत्र न कैटभद्विषस्तपोधनाभ्यागमसंभवा मुदः ।१५२।
शि. व. १. २३

" महतोरिति । वर्णनीयोत्कर्षापेक्षया यन्महत्याश्रिते विषये तदपेक्षया तनुरप्याश्रयो महीयान् स्यात् महीयस्तया वर्ण्यते, महत्याश्रये वा विषये आधेय एव तथा वर्ण्यते तदुभयमधिकालङ्कारः । तत्राद्यं यथा—अहो इति स्पष्टम् । अत्राश्रयस्य भुवनत्रितयस्य महत्तया वर्णनम् । द्वितीयं यथा—युगांतेति " [प्र०] । युगांतकाले प्रतिसंहृतः आत्मा स्वात्मभूतः प्रपंचो

येन तस्य कैटभद्विषः श्रीविष्णोः यस्यां तनौ जगंति भुवनानि सविकाशं सावकाशं आसत उपविशन्ति स्म, तत्र तस्यां तनौ तपोधनस्य नारदस्य अभ्यागमः आगमनं तत्संभवाः तज्जन्याः मुदः प्रीतयः न ममुः न अवकाशं प्रापुः। वंशस्थं वृत्तम्। अत्र जगदाश्रयतया महत्त्वेन विवक्षितस्य भगवच्छरीररूपाश्रयस्य मानाभावरूपसंबंधात्ततोऽल्पस्याऽपि तपोधनागमजन्यहर्षस्य वर्णनीयस्याधिक्यं चारुताहेतुः " [उ०]।

प्रतिपक्षमशक्तेन प्रतिकर्तुं तिरस्क्रिया।
या तदीयस्य तत्स्तुत्यै प्रत्यनीकं तदुच्यते ॥ ४३ ॥

न्यक्कृतिपरमपि विपक्षं साक्षान्निरसितुमशक्तेन केनापि यत् तमेव प्रतिपक्षमुत्कर्षयितुं तदाश्रितस्य तिरस्करणम्, तत् अनीकप्रतिधिनीतुल्यत्वात् प्रत्यनीकमभिधीयते। यथाऽनीके अभियोज्ये तत्प्रतिनिधीभूतमपरं मूढतया केनचिदभियुज्यते, तथेह प्रातियोगिनि विजेये तदीयोऽन्यो विजीयते इत्यर्थः। उदाहरणम्—

त्वं विनिर्जितमनोभवरूपः सा च सुन्दर भवत्यनुरक्ता।
पञ्चभिर्युगपदेव शरैस्तां तापयत्यनुशयादिव कामः ॥ १५३ ॥

यथा वा—

यस्य किंचिदपकर्तुमक्षमः कायनिग्रहगृहीतविग्रहः।
कान्तवक्त्रसदृशाकृतिं कृती राहुरिन्दुमधुनाऽपि बाधते ॥ १५४॥
शि. व. १४. ७८

इन्दोरत्र तदीयता संबन्धिमुखसंबन्धात्।

" **प्रतिपक्षमिति**। अपकारिणमपि विपक्षं साक्षादपकर्तुमक्षमेण केनापि तदीयस्य तिरस्करणं तमेवोत्कर्षयितुं यदुच्यते तत्प्रत्यनीकम्। प्रतिनिधितुल्यत्वात्। यथाऽनीकेऽभियोज्येऽशक्तेन तत्प्रतिनिधीभूतः कश्चिन्निगूढमभियुज्यते तथेहापि प्रतियोगिनि विजेयेऽशक्तेन तदीयोऽन्यो विजीयत इत्यर्थः। तदीयत्वं च साक्षात्संबन्धेन परम्परासंबन्धेन चेति द्विविधमेतत्। तत्राद्यं यथा— **त्वमिति**। " [प्र०]। स्पष्टम्।

" अत्र तां तव रक्तां कामः शरैर्हन्तीति वास्तवोऽर्थः पश्चादुत्प्रेक्ष्यते। निर्जितत्वोत्थादनुशयादिवेति व्यंग्योत्प्रेक्षाऽपि। त्वं भवतीति च प्रक्रमभङ्गः " [सं०]।

"अत्र कामिन्याः कामिनश्च साक्षादेव स्वस्वामिभावः सम्बन्धः" [प्र०]।

द्वितीयं यथा—यस्येति । " कायनिग्रहेण अमृतविभागकाले देहच्छेदेन गृहीतविग्रहो बद्धवैरः कृती कुशलो राहुर्यस्य हरेः किंचिदपकर्तुमक्षमः सन् कान्तं रम्यं यद्वक्त्रं हरिमुखं तेन सदृशी आकृतिर्यस्य तम् । तत्सुहृदमित्यर्थः । इन्दुमधुनापि बाधते पीडयति । उपरागमिषेणेति भावः । अत्र साक्षात्प्रतिपक्ष-हरिनिग्रहाशक्त्या राहोस्तदीयेन्दुनिग्रहोक्त्या प्रत्यनीकालङ्कारः" (मल्लिनाथः) ।

" अत्र यत्पदार्थेन मुखस्यावयवावयविभावः संबन्धस्तेन चन्द्रस्य सादृश्य-लक्षण इति परम्परासंबन्धः " [प्र०]।

समेन लक्ष्मणा वस्तु वस्तुना यन्निगूह्यते ।
निजेनागन्तुना वापि तन्मीलितमिति स्मृतम् ॥ ४४ ॥

सहजं आगन्तुकं वा किमपि साधारणं यत् लक्षणम्, तद्द्वारेण, यत् किंचित् केनचित् वस्तुस्थित्यैव बलीयस्तया तिरोधीयते, तत् मीलितमिति द्विधा स्मरन्ति । क्रमेणोदाहरणम्–

अपाङ्गतरले दृशौ मधुरवक्रवर्णा गिरो
विलासभरमन्थरा गतिरतीव कान्तं मुखम् ।
इति स्फुरितमङ्गके मृगदृशां स्वतो लीलया
तदत्र न मदोदयः कृतपदोऽपि संलक्ष्यते ॥ १५५ ॥

अत्र दृक्तरलतादिकमङ्गस्य लिङ्गं स्वाभाविकम्, साधारणं च मदोदयेन, तत्राप्येतस्य दर्शनात् ।

"निजं स्वाभाविकं लक्ष्म निगूहनीयसाधारणं चिह्नं तद्द्वारेण केनचिद्वस्तुना बलवत्तया यत्किंचिद्वस्तु वस्तुगत्यैव तिरोधीयते तन्मीलितालङ्कारः । तच्च द्विधा—लक्ष्मणः क्वचित्स्वाभाविकत्वात्क्वचिदागन्तुकत्वाच्चेत्यर्थः । " [प्र०] ।

" वस्तुना वस्त्वन्तरस्य तिरोधाने मीलितमिति सान्वयं नाम । बलीयस्तयेति वचनान्न सामान्यालङ्कारता । तत्र हि साधारणगुणाश्रयेण भेदानुपलक्षणं न तूत्कृष्टगुणेन निकृष्टस्य तिरोधानम् " [सं] ।

तत्र स्वाभाविकेन लक्ष्मणा मीलितं यथा—" अपाङ्गेति । अपाङ्गः तरलः ययोस्ते, अपांगयोः तरले चंचले इति वा । मधुराः वक्राः वक्रोक्तिसमर्पकाः वर्णाः यासु । मृगदृशः अङ्गके कोमलशरीरे लीलया स्वतः स्वभावतः

स्फुरितम् । मदोदयः मधुपानजन्यमदस्य उदयः । कृतपदोऽपि कृतस्थानोऽपि । पृथ्वी छन्दः । अत्र स्वाभाविकेन दृक्तरलतादिना निगूहनीयमदसमानधर्मेण बलवता मदोऽभिभूयते " [उ०] ।

" अत्र दृक्तरलतादि अङ्गस्य स्वाभाविकं लिङ्गं, समानं च तिरोधेयेन मदेन । तत्राऽप्येतदुपलम्भात् । " [प्र०]

ये कंदरासु निवसन्ति सदा हिमाद्रे-
स्त्वत्पातशङ्कितधियो विवशा द्विषस्ते ।
अप्यङ्गमुत्पुलकमुद्वहतां सकम्पं
तेषामहो बत भियां न बुधोऽप्यभिज्ञः ॥ १५६ ॥

अत्र तु सामर्थ्यादवसितस्य शैत्यस्य आगन्तुकत्वात्तत्प्रभवयोरपि कम्पपुलकयोस्ताद्रूप्यं समानता च, भयेष्वपि तयोरुपलाक्षितत्वात् ।

आगन्तुकेन लक्ष्मणा यथा । " ते तव ये द्विषस्त्वत्पाते त्वदागमने शङ्किता धीर्येषां तादृशाः सन्तो हिमाद्रेःकन्दरासु निवसन्ति उद्गतरोमाञ्चं कम्पसहितं अङ्गं उद्वहतामपि तेषां भयानां बुधः पण्डितोऽपि नाभिज्ञ इत्यन्वयः । अत्र रोमाञ्चकम्पयोः आगन्तुकयोः भयशीतसाधारणचिह्नयोः भयतिरोधायकत्वम् " [सं०] ।

" अत्र कम्पपुलके अङ्गस्य लिङ्गे, हिमाद्रिकंदरानिवाससामर्थ्याधिगतशीत-रूपकारणस्यागन्तुकत्वेन तत्कार्यभूतयोस्तयोरप्यागन्तुकत्वं भयैः समानता च । तेष्वपि तयोरुपलम्भात् " [प्र०] ।

स्थाप्यतेऽपोह्यते वाऽपि यथापूर्वं परं परम् ।
विशेषणतया यत्र वस्तु सैकावली द्विधा ॥ ४५ ॥

पूर्वं पूर्वं प्रति यत्रोत्तरोत्तरस्य वस्तुनो वीप्सया विशेषणभावेन यत् स्थापनं निषेधो वा संभवति, सा द्विधा बुधैरेकावली भण्यते । क्रमेणोदाहरणम्—

पुराणि यस्यां सवराङ्गनानि वराङ्गना रूपपुरस्कृताङ्ग्यः ।
रूपं समुन्मीलितसद्विलासमस्त्रं विलासाः कुसुमायुधस्य ॥१५७॥

न तज्जलं यन्न सुचारुपङ्कजं न पङ्कजं तद्यदलीनषट्पदम् ।
न षट्पदोऽसौ कलगुञ्जितो न यो न गुञ्जितं तन्न जहार यन्मनः ॥१५८॥

पूर्वत्र पुराणां वराङ्गनाः, तासामङ्गविशेषणमुखेन रूपम्, तस्य विलासाः, तेषामप्यस्त्रमित्यमुना क्रमेण विशेषणं विधीयते। उत्तरत्र प्रतिषेधेऽप्येवं योज्यम्।

" स्थाप्यत इति। स्थापनं विधिः। अपोहो निषेधः। यथापूर्वमिति वीप्सायामव्ययीभावः। तेन पूर्वं पूर्वं वस्तु प्रति उत्तरस्य वस्तुनो यत्र विशेषणतया बाहुल्येन विधिः, यत्र वा तथा निषेधः, सा द्विधैकावली। विशेषणतया विधिरित्यस्य विधेर्विशेषणत्वमित्यर्थः। एवं विशेषणतया निषेधोऽपि। कश्चित्तु 'पूर्वकालविशेषणतया स्थितं वस्तु परं विशेष्यं कृत्वा यत्र स्थाप्यतेऽपोह्यते वा सैकावलीति सूत्रार्थः' इत्याह। तत्तु पूर्वं प्रति यथोत्तरस्य वस्तुन इत्यादिप्रकाशविरुद्धम्। तत्र विधौ यथा—**पुराणीति** " [प्र०]। " विक्रमादित्यस्य नगर्याः उज्जयिन्याः वर्णनमिदम्। यस्यां उज्जयिन्यां नगर्यां पुराणि गृहोपरिगृहाणि सवराङ्गनानि वराङ्गनासहितानि। वराङ्गनाः रूपेण पुरस्कृतं भूषितं अङ्गं यासां तथाभूताः। रूपं समुन्मीलिताः उत्फुल्लाः सद्विलासाः यस्मिंस्तादृशम्। विलासाः कुसुमायुधस्य कामस्य अस्त्रं अस्त्रभूता इत्यर्थः" [झ०]।

" अत्र पुराणामङ्गनास्तासामङ्गविशेषणक्रियामुखेन रूपं तस्य विलासास्तेषामस्त्रमिति क्रमेण विशेषणतया विधिः। निषेधे यथा—**न तदिति** " (भट्टिकाव्य–२, १९]। स्पष्टम्।

" अत्र जले पङ्कजस्य, तत्र षट्पदानां, तत्र गुञ्जितस्य, तत्रापि मनोहारिताया विशेषणतया निषेधः " [प्र०]।

यथाऽनुभवमर्थस्य दृष्टे तत्सदृशे स्मृतिः।

स्मरणम्

यः पदार्थः केनचिदाकारेण नियतः यदा कदाचित् अनुभूतोऽभूत्, स कालान्तरे स्मृतिप्रतिबोधाधायिनि तत्समाने वस्तुनि दृष्टे सति, यत् तथैव स्मर्यते, तत् भवेत् स्मरणम्। उदाहरणम्—

निम्ननाभिकुहरेषु यदम्भः प्लावितं चलदृशां लहरीभिः।
तद्भवैः कुहरुतैः सुरनार्यः स्मारिताः सुरतकण्ठरुतानाम् ॥१५९॥

" **यथेति**। अत्रार्थस्य स्मृतिः स्मरणालङ्कार इति लक्षणम्। यथाऽनुभवमिति स्मृत्याकारदर्शनम्। दृष्टे तत्सदृश इति तद्धेतुसंस्कारोद्बोधे हेतुनिर्देशः। अदृष्टादेरप्युपलक्षणात्। यद्वा अन्यादृशस्मृतेश्चारुत्वाभावेनालङ्कारत्वाभावाद्-

व्यवच्छेदकतया लक्षणान्तर्गतमेवैतत्। तदयं वाक्यार्थः—केनचिदाकारेण नियतो यदा कदाचित्केनचित्प्रमाणेनानुभूतः स कालान्तरे संस्कारोद्बोधहेतौ तत्समानधर्मदर्शने सति यदनुभूतेन प्रकारेण स्मर्यते तत्स्मरणालङ्कारः। स द्विधा— एतज्जन्मनि जन्मान्तरे वाऽनुभूतस्य स्मृतेः। क्रमेणोदाहरणे। निम्नेति" [प्र०]।

"अप्सरसां जलक्रीडावर्णनम्। लहरीभिस्तरंगैश्चलदृशां नायिकानां निम्न नाभिकुहरेषु यदंभः प्लावितं तद्रवैः सुरतकालिककंठध्वनिसदृशैः कुहकुहेति ध्वनिविशेषैरित्यन्वयः। कंठो योनिरूपो गर्तः। 'कंठावटश्वभ्रगर्ताः' इति कोशात्। रुतानामिति कर्मणि षष्ठी। स्मारिताः" [उ०]।

यथा वा—

करजुअगहिअजसोआथणमुहविणिवेसिआहरउडस्स।
संभरिअपञ्चअण्णस्स णमह कण्हस्स रोमञ्चम्॥ १६०॥

"करयुगगृहीतयशोदास्तनमुखविनिवेशिताधरपुटस्य।
संस्मृतपांचजन्यस्य नमतः कृष्णस्य रोमांचम्।"

भ्रान्तिमानन्यसंवित्तत्तुल्यदर्शने॥ ४६॥

तदिति अन्यत् अप्राकरणिकं निर्दिश्यते, तेन समानम् अर्थादिह प्राकरणिकम् आश्रीयते, तस्य तथाविधस्य दृष्टौ सत्यां, यत् अप्राकरणिकतया संवेदनम्, स भ्रान्तिमान्। न चैष रूपकं प्रथमातिशयोक्तिर्वा। तत्र वस्तुतो भ्रमस्याभावात्। इह च अर्थानुगमनेन संज्ञायाः प्रवृत्तेः तस्य स्पष्टमेव प्रतिपन्नत्वात्।

उदाहरणम्—

कपाले मार्जारः पय इति कराँल्लेढि शशिन-
स्तरुच्छिद्रप्रोतान्बिसमिति करी संकलयति।
रतान्ते तल्पस्थान्हरति वनिताऽप्यंशुकमिति
प्रभामत्तश्चन्द्रो जगदिदमहो विप्लवयति॥ १६१॥

"भ्रान्तिमानिति। अत्राप्यन्यसंविदिति लक्षणम्। तत्तुल्यदर्शन इति हेतुनिर्देशः। अन्येति पदार्थं परामृशता तदित्यनेनाप्राकरणिकं निर्दिश्यते। तथा च तेन तुल्यमर्थादिह प्राकरणिकं लभ्यते। तेन प्राकरणिकस्याप्राकरणिक-

तुल्यस्य दर्शने सति यदप्राकरणिकत्वेन ज्ञानं स भ्रान्तिमानित्यर्थः । न च रूपके निगीर्याध्यवसानरूपायामतिशयोक्तौ चातिव्याप्तिः । तत्र वस्तुतो भ्रमाभावेऽप्यध्यवसानमात्रस्वीकारात् । इह त्वर्थानुगमेन संज्ञाप्रवृत्तेर्भ्रमोपगमस्य स्पष्टमेवोपगमात् " [प्र०] ।

" ज्ञानम् । निश्चयात्मकम् । तेन 'कांते तव मुखं पद्मं चंद्रो वेति न निर्णयः ।' इति संदेहे नातिव्याप्तिः । तत्र सत्यन्तेनानुभूयमानारोपस्य चिन्तादिजन्यस्मृतिजन्यारोपस्य च व्युदासः । अप्राकरणिकतादात्म्येनेत्युक्तेर्मीलितसामान्यतद्गुणवारणम् । भ्रांतिमानत्रालङ्कारः । सा च कविप्रतिभानिर्मितैव । तेन रंगे रजतमिति बुद्धेर्नालङ्कारत्वम् " [उ०]

कपाले इति । राजशेखरकवेः पद्यमिदमिति सदुक्तिकर्णामृते (१. ७७. २) भासकवेरिति तु सभ्यालङ्करणे-(४. ७९) सुभाषितावल्याम्-(१९९४) शार्ङ्गधरपद्धतौ (३६४०) च । अहो प्रभामत्तः कान्तिगर्वोन्मत्तः चन्द्रः तदतिशयशालीत्यर्थः इदं जगत् विप्लवयति विभ्रमयति । मत्तो हि स्वत एव भ्रमति न तु परस्य भ्रममुत्पादयति इत्याश्चर्यं अहोशब्देन बोध्यते—इत्युद्योतः । मार्जारः कपाले पयः दुग्धं इति बुद्ध्वा शशिनः करान् लेढि आस्वादयति । तरुच्छिद्रप्रोतान् वृक्षविवरेभ्यो निर्गतान् बिसं मृणालं इति बुद्ध्वा करी संकलयति गृह्णाति । तल्पस्थान् शय्यास्थान् वनिता रतान्ते अंशुकं वसनं इति बुद्ध्वा हरति गृह्णाति ।

आक्षेप उपमानस्य प्रतीपमुपमेयता ।
तस्यैव यदि वा कल्प्या तिरस्कारनिबन्धना ॥ ४७ ॥

अस्य धुरं सुतरामुपमेयमेव वोढुं प्रौढमिति कैमर्थ्येन यत् उपमानमाक्षिप्यते, यदपि तस्यैवोपमानतया प्रसिद्धस्य उपमानान्तरविवक्षयाऽनादरार्थमुपमेयभावः कल्प्यते, तत् (उपमेयस्योपमानप्रतिकूलवर्तित्वात्) उभयरूपं प्रतीपम् । क्रमेणोदाहरणम्–

लावण्यौकसि सप्रतापगरिमण्यग्रेसरे त्यागिनां
देव त्वय्यवनीभरक्षमभुजे निष्पादिते वेधसा ।
इन्दुः किं घटितः किमेष विहितः पूषा किमुत्पादितं
चिन्तारत्नमहो मुधैव किममी सृष्टाः कुलक्ष्माभृतः ॥ १६२ ॥

ए एहि दाव सुन्दरि कण्णं दाऊण सुणसु वअणिज्जम् ।
तुज्झ मुहेण किसोअरि चन्दो उअमिज्जइ जणेण ॥ १६३ ॥

' अयि एहि तावत् सुंदरि कर्णं दत्त्वा शृणुष्व वचनीयम् ।
तव मुखेन कृशोदरि चंद्र उपमीयते जनेन ॥'

अत्र मुखेनोपमीयमानस्य शशिनः स्वल्पतरगुणत्वात् उपमित्यनिष्पत्त्या ' वअणिज्जम् ' -इति वचनीयपदाभिव्यङ्ग्यस्तिरस्कारः । क्वचित्तु निष्पन्नैवोपमितिक्रिया अनादरनिबन्धनम् । यथा-

गर्वमसंवाह्यमिमं लोचनयुगलेन किं वहसि मुग्धे ।
सन्तीदृशानि दिशि दिशि सरःसु ननु नीलनलिनानि ॥१६४॥

इहोपमेयीकरणमेवोत्पलानामनादरः ।

अनयैव रीत्या यत् असामान्यगुणयोगात् नोपमानभावमपि अनुभूतपूर्वि, तस्य तत्कल्पनायामपि भवति प्रतीपमिति प्रत्येतव्यम् । यथा

अहमेव गुरुः सुदारुणानामिति हालाहल मा स्म तात दृप्यः ।
ननु सन्ति भवादृशानि भूयो भुवनेऽस्मिन्वचनानि दुर्जनानाम् ॥ १६५

अत्र हालाहलस्योपमानत्वमसंभाव्यमेवोपनिबद्धम् ।

" आक्षेप इति । अस्य प्रयोजनं निर्वाहयितुमुपमेयमेवालमित्यप्रयोजकतयोपमानं यदाक्षिप्यते, यच्चोपमानतया प्रसिद्धस्योपमेये तस्माद्विशेषविवक्षया अनादरार्थमुपमेयभावः कल्प्यते, तदुभयरूपं प्रतीपम् । उपमेयस्योपमाने प्रतिकूलवर्तित्वात् । तत्राद्यं यथा—लावण्येति " [प्र०] । हे देव लावण्यौकसि लावण्याश्रये प्रतापगरिमणि प्रतापातिशयसहिते त्यागिनां अग्रेसरे दातृमुख्ये अवनीभरक्षमभुजे भूभरणसमर्थभुजे त्वयि वेधसा ब्रह्मणा निष्पादिते सृष्टे सति । इन्दुः किं घटितः निर्मितः । एष पूषा सूर्यः किं विहितः। चिन्तारत्नं (चिन्तामणिः) किं उत्पादितम् । अमी कुलक्ष्माभृतः कुलपर्वताः मुधैव वृथैव किं सृष्टाः ।

" अत्र यथासंख्यसत्त्वेऽपि आक्षेप एव चमत्कारकारीत्याक्षेपोदाहरणता । द्वितीये तु क्वचिदुपमित्यनिष्पत्त्या तिरस्कारः, क्वचित्तु निष्पन्ना सैव तद्धेतुः । क्रमेणोदाहरणम्-ए एहीति " [प्र०] ।

" अत्र मुखोपमानस्य शशिनः स्वल्पगुणत्वादुपमित्यनिष्पत्तिर्वअणिज्ज-मिति पदेन द्योत्यते। सैव तिरस्कारहेतुः। गर्वमिति " [प्र०]। असंवाह्यं संवहनायोग्यम्। अपरिमितमिति यावदित्युद्योतः।

" अत्र नलिनानां लोचनोपमेयीकरणमेवानादरहेतुः। उपमेयस्य न्यूनगुण-त्वस्थितेः। अनयैव रीत्या तदपि प्रतीपं द्रष्टव्यं यत्सामान्यगुणयोगाभावेनोप-मानत्वाननुभवेऽप्यर्थस्योपमानत्वकल्पना। कथमिति चेत्। उपमानतिरस्कार-स्यालङ्कारताबीजत्वात्। तच्च द्विधा संभवति। उपमानत्वेनैव प्रसिद्धस्योपमे-यत्वकल्पनया, असदृशत्वेन प्रसिद्धस्योपमानत्वकल्पनया वा। सूत्रं चोपलक्षण-तया योज्यम्। उदाहरणम्—अहमेवेति। स्पष्टम्। अत्र हालाहलस्य खलवचनोपमानत्वमसंभाव्यमानमेवोपनिबद्धं तिरस्कारहेतुः [प्र०]।

प्रस्तुतस्य यदन्येन गुणसाम्यविवक्षया।
ऐकात्म्यं बध्यते योगात्तत्सामान्यमिति स्मृतम् ॥४८॥

अतादृशमपि तादृशतया विवक्षितुं यत् अप्रस्तुतार्थेन संपृक्तमपरि-त्यक्तनिजगुणमेव तदेकात्मतया निबध्यते, तत् (समानगुणनिबन्धनात्) सामान्यम्, उदाहरणम्–

मलयजरसविलिप्ततनवो नवहारलताविभूषिताः
सिततरदन्तपत्रकृतवक्त्ररुचो रुचिरामलांशुकाः।
शशभृति विततधाम्नि धवलयति धरामविभाव्यतां गताः
प्रियवसतिं प्रयांति सुखमेव निरस्तभियोऽभिसारिकाः ॥१६६॥

वा. का. लं. ४-३-१०

अत्र प्रस्तुततदन्ययोरन्यूनानतिरिक्ततया निबद्धं धवलत्वमेकात्मता-हेतुः, अत एव पृथग्भावेन न तयोरुपलक्षणम्।

यथा वा–

वेत्रत्वचा तुल्यरुचां वधूनां कर्णाग्रतो गण्डतलागतानि।
भृङ्गाः सहेलं यदि नापतिष्यन्कोऽवेदयिष्यन्नवचम्पकानि॥१६७॥

अत्र निमित्तान्तरजनिताऽपि नानात्वप्रतीतिः प्रथमप्रतिपन्नमभेदं न व्युदसितुमुत्सहते, प्रतीतत्वात्तस्य। प्रतीतेश्च बाधायोगात्।

" **प्रस्तुतेति** । अतादृशत्वेऽपि विवक्षितगुणसाम्यस्य प्रस्तुतस्यान्येनाप्रस्तुतेन गुणसाम्यविवक्षया ऐकात्म्यं बध्यते तत्सामान्यम् । समानगुणयोगात् । अत्रापरित्यक्तनिजगुणस्येत्यपि विशेषणं विवक्षितम् । अन्यथा तद्गुणालङ्कारेऽतिव्याप्तेः । 'बध्यते' इत्यस्य प्रत्यायनमात्रमर्थो न तु शाब्दं प्रतिपादनम् । उदहारणे ' अविभाव्यतां गताः ' इत्यादावैकात्म्यस्याशाब्दत्वात् । उदाहरणम्—" [प्र०] । **मलयजेति** । पद्यमिदं वामनेन अतिशयोक्तेरुदाहरणत्वेन पठितम् । मलयजरसविलिप्ततनवः चन्दनरसलिप्तशरीराः । नवहारलताभिः विभूषिताः । सिततरं श्वेततरं दन्तपत्रं हस्तिदन्तनिर्मितं ताटङ्कं तेन कृता वक्त्रे रुग्दीप्तिर्यासां ताः । रुचिरं अमलं निर्मलं अंशुकं वस्त्रं यासां ताः । अभिसारिकाः विततधाम्नि विस्तृतं तेजो यस्य तस्मिन् शशभृति चन्द्रे धरां धवलयति सति अविभाव्यतां अलक्ष्यतां गताः अभिसारिकाः निरस्तभियः भयरहिताः सुखमक्लेशेन प्रियवसतिं प्रयांति गच्छन्ति । " अत्राभिसारिकाचन्द्रिकयोरेकात्मत्वप्रतीतिः। क्वचित्प्रस्तुताप्रस्तुतयोरुत्तरकालीनविवेकादिना तदुन्नयनम् । यथा—वेत्रेति " [प्र०] । "वेत्रस्य त्वचा तुल्या रुक् यासाम् । गौरवर्णानामिति यावत् । कर्णाग्रतः कर्णाग्रात् । गंडतले आगतानि । यदि भृंगाः सहेलं नापतिष्यन् तदा नवचंपकानि कोऽवेदयिष्यदित्यन्वयः । इन्द्रवज्रा छन्दः । अत्र गंडचम्पकयोर्गौरत्वाद्भेदाप्रतीतिः । [उ०] ।

" अत्र भृङ्गपातानन्तरं भेदप्रत्ययो न तु पूर्वमेव प्रतीतिः । ननु भृङ्गपातेन भेदप्रत्ययात्कथमेकात्मत्वप्रतीतिरिति चेत् । अग्रे तथात्वेऽपि प्राथमिकाभेदप्रत्ययस्यानिरासात् तस्य वृत्तत्वात् " [प्र०]

" ऐकात्म्यमिति मीलिताद्भेदः । तत्र बलवत्सजातीयग्रहणकृताग्रहणम्, अत्र तु पृथक्त्वेनाग्रहणमिति विशेषात् । न च भ्रांतिमता संकरः । तत्र स्मर्यमाणस्यारोपोऽत्रानुभूयमानस्येति विशेषात् । नापि रूपकप्रथमातिशयोक्तिभ्याम् । उपमेये उपमानतादात्म्यस्य शब्दादप्रतीते रूपकाभावात् । उपमानतावच्छेदकरूपेण अप्रतीयमानत्वान्नातिशयोक्तिः " [उ०] ।

विना प्रसिद्धमाधारमाधेयस्य व्यवस्थितिः ।
एकात्मा युगपद्वृत्तिरेकस्यानेकगोचरा ॥ ४९ ॥

अन्यत्प्रकुर्वतः कार्यमशक्यस्यान्यवस्तुनः ।
तथैव करणं चेति विशेषस्त्रिविधः स्मृतः ॥ ५० ॥

प्रसिद्धाधारपरिहारेण यत् आधेयस्य विशिष्टा स्थितिरभिधीयते, स प्रथमो विशेषः । उदाहरणम्--

दिवमप्युपयातानामाकल्पमनल्पगुणगणा येषाम् ।
रमयन्ति जगन्ति गिरः कथमिव कवयो न ते वन्द्याः ॥ १६८ ॥

एकमपि वस्तु यत् एकेनैव स्वभावेन युगपदनेकत्र वर्तते, स द्वितीयः । उदाहरणम्—

सा वसइ तुज्झ हिअए सा च्चिअ अच्छीसु सा अ वअणेसु ।
अह्मारिसाण सुन्दर ओआसो णत्थि पावाणम् ॥ १६९ ॥

[सा वसति तव हृदये सैवाक्ष्णोः सैव वचनेषु ।
अस्मादृशीनां सुन्दर अवकाशो नास्ति पापानाम् ॥]

यदपि किंचिद्रभसेन आरभमाणस्तेनैव यत्नेनाशक्यमपि कार्यान्तरमारभते, सोऽपरो विशेषः । उदाहरणम्—

स्फुरदद्भुतरूपमुत्प्रतापज्वलनं त्वां सृजतानवद्यविद्यम् ।
विधिना ससृजे नवो मनोभूर्भुवि सत्यं सविता बृहस्पतिश्च॥१७०॥

" विनेति । स एष त्रिधा । तत्र प्रसिद्धमाधारं विनाऽऽधेयस्य विशिष्टावस्थितिर्यदभिधीयते स एको विशेषः । तत्र प्रसिद्धमित्यनेनेदमुक्तं यदत्र वास्तवमाधारत्वं न विवक्षितं किं तु कविप्रसिद्धिमात्रसिद्धमिति । अत एव तथैवोदाहरणम्—दिवमपीति " [प्र०] । " दिवं स्वर्गं आकल्पं प्रलयपर्यन्तं अनल्पेति गिरां विशेषणम् । येषां गिरो जगन्ति रमयन्तीति सम्बन्धः " [चं०] । " अत्र कविरूपं प्रसिद्धमाधारं विना गिरां विशिष्टस्थितिरुक्ता " [प्र०] । " विशिष्टावस्थितिरिति । निराधारैव । एवमाधारान्तरगतत्वेनाधेयवर्णनेऽप्ययम् । यथा ' गतेऽपि सूर्ये दीपस्थास्तमश्छिन्दन्ति तस्कराः" [उ०] ।

" एकस्य वस्तुनो युगपद्या एकात्मा अनेकवृत्तिः स द्वितीयो विशेषः । एकात्मेत्येकेन स्वभावेनेत्यर्थः । एतच्च विशेषणं ' एकस्त्रिधा वससि-' इत्यादि-

यथासंख्यव्यावर्तनाय । युगपदिति पर्यायनिवारणाय । उदाहरणम्—**सा वसइ इति** " [प्र०] ।

" रभसेनान्यत्कार्यं कुर्वतः कर्तुर्यदशक्यस्यान्यस्यापि कार्यस्य तथैव करणं स तृतीयो विशेषः । अत्र तथैवेति तेनैव प्रकारेणेत्यर्थः । एतच्च 'धुनोति चासिं तनुते च कीर्तिम्' इत्यादिसमुच्चयव्यावर्तनाय । उदाहरणम्–स्फुरदिति । " [प्र०] । हे राजन् त्वां सृजता विधिना भुवि नवः मनोभूः कामः सविता बृहस्पतिश्च ससृजे । कीदृशं त्वामिति पूर्वोक्तमुपपादयितुं विशिनष्टि—स्फुरत् प्रकाशमानं अद्भुतं रूपं यस्य । उद्गतः प्रतापाग्निर्यस्य । अनवद्या शुद्धा विद्या यस्य । " अत्र येनैव यत्नेन स्फुरदद्भुतरूपेत्यादिविशेषणवांस्त्वं सृष्टस्तेनैवाशक्यं कामार्कगुरुरूपं कार्यान्तरमपि कृतम् " [सं०]

यथा वा—

गृहिणी सचिवः सखी मिथः प्रियशिष्या ललिते कलाविधौ ।
करुणाविमुखेन मृत्युना हरता त्वां वद किं न मे हृतम् ॥१७१॥

र. ८-६७

सर्वत्र एवंविधविषयेऽतिशयोक्तिरेव प्राणत्वेनावतिष्ठते, तां विना प्रायेणालङ्कारत्वायोगात् । अत एवोक्तम्-

सैषा सर्वत्र वक्रोक्तिरनयाऽर्थो विभाव्यते ।
यत्नोऽस्यां कविभिः कार्यः कोऽलङ्कारोऽनया विना ॥ इति ॥

भा. का. लं. २-८.

अन्यस्य करणं व्यङ्ग्यं यथा—**गृहिणीति** । इन्दुमतीं शोचतः अजस्योक्तिः । स्पष्टोऽर्थः । " अत्र किं न मे हृतमिति सचिवादिसर्वहरणरूपकार्यकरणं व्यज्यते । नन्वाधारं विना वास्तवस्याधेयस्य व्यवस्थितिरनुपपन्नैव, एवमन्ययोरप्यनुपपत्तिरिति चेत्, न । अतिशयोक्तिमालम्ब्य तथाभिधानात् । सर्वत्रैवंविधे विषयेऽतिशयोक्तिरेव प्राणायिता । तां विना प्रायशोऽलङ्कारत्वाभावात् । अत एवाहुः— " [प्र०]

सैषेति । श्लोकोऽयमानन्दवर्धनाचार्येण ध्वन्यालोक उद्धृतः तत्रस्थे लोचने चाभिनवगुप्तेनेत्थं व्याख्यातः– " यातिशयोक्तिर्लक्षिता सैव सर्वा वक्रोक्तिरलङ्कारप्रकारः सर्वः । ' वक्राभिधेयशब्दोक्तिरिष्टा वाचामलङ्कृतिः '

इति वचनात् । शब्दस्य हि वक्रता अभिधेयस्य च वक्रता लोकोत्तीर्णेन रूपेणावस्थानमित्ययमेवासावलङ्कारस्यालङ्कारान्तरभावः । लोकोत्तरेण चैवातिशयः । तेनातिशयोक्तिः सर्वालङ्कारसामान्यम् । तथा ह्यनयातिशयोक्त्यार्थः सकलजनोपभोगपुराणीकृतोऽपि विचित्रतया भाव्यते । तथा प्रमदोद्यानादिर्विभावतां नीयते विशेषेण च भाव्यते रसमयीक्रियत इति" (पृ० २०८) ।

स्वमुत्सृज्य गुणं योगादत्युज्ज्वलगुणस्य यत् ।
वस्तु तद्गुणतामेति भण्यते स तु तद्गुणः ॥ ५१ ॥

वस्तु तिरस्कृतनिजरूपं केनापि समीपगतेन प्रगुणतया स्वगुणसंपदोपरक्तं तत्प्रतिभासमेव यत्समासादयति स तद्गुणः तस्याप्रकृतस्य गुणोऽत्राऽस्तीति ॥

"**स्वमिति** । अत्युत्कृष्टगुणस्याप्रस्तुतस्य योगात्तद्गुणसंपदुपरागात्स्वकीयं रूपं तिरस्कृत्य प्रस्तुतं वस्तु यत्तदनुकारमेवासादयति स तद्गुणो भण्यते । तस्याप्रस्तुतस्य गुणोऽत्रेति व्युत्पत्तेः । मीलिते वस्त्वन्तरेणाच्छादितस्य तस्यैव वस्तुनः प्रतीतिः, अत्र त्वनाच्छादितस्वरूपस्यैव वस्त्वन्तरगुणाप्तिरिति ततो भेदः" [प्र०] ।

"**तिरस्कृत्येति** । अभिभवे वस्तुतः स्वगुणत्यागाभावादिति भावः । **ततो भेद इति** । मीलिते धर्मिण एवाग्रहः, सामान्येऽपरित्यक्तगुणस्यैव अपृथक्प्रतिभासः, इह तु गुणमात्रस्यैवाभिभवः धर्मिणः पृथक् भासश्चेति भेद इत्यर्थः । भ्रान्तिमति स्मर्यमाणस्यारोपोऽत्र गृह्यमाणस्येति भेदः । भ्रान्तेर्निबद्धत्वाभावाच्च" [उ०] ।

उदाहरणम्—

विभिन्नवर्णा गरुडाग्रजेन सूर्यस्य रथ्याः परितः स्फुरन्त्या ।
रत्नैः पुनर्यत्र रुचा रुचं स्वामानिन्यिरे वंशकरीरनीलैः ॥१७२॥

शि. व. ४-१४

अत्र रवितुरगापेक्षया गरुडाग्रजस्य, तदपेक्षया च हारिन्मणीनां प्रगुणवर्णता ।

विभिन्नेति । रैवतकपर्वतवर्णनमिदम् । "गरुडाग्रजेनारुणेन विभिन्नवर्णा अन्यथाकृतवर्णाः । अरुणिमानमापादिता इत्यर्थः । सूर्यस्य रथ्या

अश्वाः । यत्र शैले वंशकरीरनीलैर्वंशांकुरश्यामै रत्नैः । मरकतैरित्यर्थः । परितः स्फुरन्त्या रुचा स्वप्रभया करणेन पुनः स्वां रुचं निजहरितवर्णमेवानिन्यिरे आनीताः ” [मल्लिनाथ] । “ अत्र तद्गुणद्वयम् । रवितुरगापेक्षया गरुडाग्रजस्य तदपेक्षया च हरिन्मणीनां प्रकृष्टगुणत्वात्तद्रूपतया प्रतीतेः । एतेन यत्केनचिद्व्याख्यातम् ‘ स्वगुणत्यागानन्तरं पुनस्तत्प्राप्तिस्तद्गुणः ’ इति, तदनादेयम् । तस्याप्रस्तुतस्य गुणोऽत्रास्तीति व्युत्पत्तिकथनपरप्रकाशविरोधात् । तत्र गुणद्वयकथनेन च तद्गुणद्वयव्युत्पादनात् । ‘ आत्ते सीमन्तरत्ने–’ इत्यादौ वक्ष्यमाणे संकरोदाहरणे तद्गुणत्वाभावप्रसंगाच्च। न हि तत्र त्यक्तस्य स्वकीयरूपस्यावाप्तिः ” [प्र०] ।

तद्रूपाननुहारश्चेदस्य तत्स्यादतद्गुणः ।

यदि तु तदीयं वर्णं संभवन्त्यामपि योग्यतायाम् इदं न्यूनगुणं न गृह्णीयात्, तदा भवेदतद्गुणो नाम । उदाहरणम्–

धवलोऽसि जहवि सुन्दर तहवि तुए मज्झ रञ्जिअं हिअअम् ।
राअभरिए वि हिअए सुअह णिहित्तो ण रत्तोऽसि ॥ १७३ ॥

‘ धवलोऽसि यद्यपि सुन्दर तथापि त्वया मम रंजितं हृदयम् ।
रागभरितेऽपि हृदये सुभग निहितो न रक्तोऽसि ॥’

गाथासप्तशती, ७. ६५

अत्रातिरक्तेनापि मनसा संयुक्तो न रक्ततामुपगत इत्यतद्गुणः । किं च तदिति अप्रकृतं अस्येति च प्रकृतमत्र निर्दिश्यते । तेन यत् अप्रकृतस्य रूपं प्रकृतेन कुतोऽपि निमित्तात् नानुविधीयते, सोऽतद्गुण इत्यपि प्रतिपत्तव्यम् । यथा—

गाङ्गमम्बु सितमम्बु यामुनं कज्जलाभमुभयत्र मज्जतः ।
राजहंस तव सैव शुभ्रता चीयते न च न चापचीयते । १७४।

“ तद्रूपेति । तदिति प्रकृतेत्यर्थः । अस्याप्रस्तुतस्य । अत्युज्ज्वलगुणयोगेऽपि यदि न्यूनगुणोऽप्रकृतः प्रकृतस्य गुणं नानुहरति तदा अतद्गुणः । उदाहरणम्—धवलोऽसीति ” [प्र०] ।

“ अत्रातिरक्ते मनसि धृतस्याप्यरक्तत्ववचनादुत्तरार्धमेवोदाहरणम् । तत्र प्रकृतं हृदयम्, संबोध्यस्त्वप्रकृतः। स्वहृदयवृत्तान्तनिवेदनस्यैव विवक्षितत्वात् ।

किं चात्र सूत्रे तत्पदेन प्रकृतमिवाप्रकृतमप्युच्यते । तथाऽस्येत्यनेनाप्रकृत- मिव प्रकृतमप्युपस्थाप्यते । सामान्यमुखप्रवृत्तत्वात् । तथा चाप्रस्तुतेन प्रस्तुत- रूपाननुहरणवत्प्रस्तुतेनाप्रस्तुतरूपाननुहारोऽन्यः प्रकारः । यथा—गांगमिति । (स्पष्टम्)

"अत्रान्यापदेशपक्षे राजहंसस्य प्राकरणिकत्वं प्राकरणिकसत्पुरुषोपमानतयोप- पादनीयम् । वाच्यमात्रविश्रान्तौ तु न काचिदनुपपत्तिः " [प्र०] ।

यद्यथा साधितं केनाप्यपरेण तदन्यथा ॥ ५२ ॥
तथैव यद्विधीयेत स व्याघात इति स्मृतः ।

येनोपायेन यत् एकेनोपकल्पितम् , तस्यान्येन जिगीषुतया तदुपाय- कमेव यत् अन्यथाकरणम्, स साधितवस्तुव्याहतिहेतुत्वात् व्याघातः । उदाहरणम्—

दृशा दग्धं मनसिजं जीवयन्ति दृशैव याः ।
विरूपाक्षस्य जयिनीस्ताः स्तुवे वामलोचनाः ॥ १७५ ॥

" यद्यथेति । यथा येनोपायेन तथा तेनोपायेनेत्यर्थः । तथा च केनापि कर्त्रा यद्वस्तु येनोपायेन यथा साधितं तदन्येन कर्त्रा जिगीषुतया तद्वस्तु तेनैवो- पायेन ततोऽन्यथा चेत्साध्यते स व्याघात इत्यर्थः । प्रथमसाधितस्य वस्तुनो व्याहतिहेतुत्वात् । उदाहरणम्—दृशेति" [प्र०] राजशेखरकविकृतायां विद्ध- शालभञ्जिकायां प्रथमाङ्के मङ्गलाचरणम् । स्पष्टोऽर्थः । " अत्र हरेण दृशा दग्ध- स्य कामस्य हरजिगीषुभिः कामिनीभिर्दाहहेतुभूतया दृशैव तद्विपरीतजीवन- संपादनाद् व्याघातोऽलङ्कारः " [चं०] ।

" अन्यकारणत्वेन प्रसिद्धात्तदन्यकर्यनिष्पादनेऽप्ययम् । ' यैर्जगत्प्रीयते हन्ति तैरेव कुसुमायुधः ' इत्यत्र योगार्थसत्त्वात् । अत्र सर्वत्र कारणयोरेकत्वाध्य- वसानात्पुरःस्फुरन्विरोधः प्रातिस्विकरूपेण (असाधारणस्वरूपेण) तत्तत्कार्यहेतु- ताविमर्शनान्निवर्तते इति बोध्यम् । यदा त्वाश्रयभेदेनैकस्यैव कारणस्य विरुद्ध- कार्यद्वयजनकत्वं निबध्यते तत्र नायम् । व्याहतेर्विरोधगर्भाया अभावात् । यथा (पाण्डित्येन प्रचण्डेन येन माद्यन्ति दुर्जनाः । तेनैव सज्जना रूढां यान्ति शान्तिमनुत्तमाम्॥रसगंगाधर, पृ०४५९इत्यत्र) एकस्यैव पाण्डित्यस्य खलवृत्ति- मदजनकत्वं सुजनवृत्तिशान्तिजनकत्वं च । एवमेकेन कर्त्रा येन कारणेन यत्कार्यं

निष्पिपादयिषितं तदन्येन कर्त्रा तेनैव कारणेन तद्विरुद्धं कार्यं निष्पिपादयिषितं चेत्तदाऽप्ययम्। यथा 'विमुञ्चसि यदि प्रियां प्रियतमेति मां मन्दिरे, तदा सह नयस्व मां प्रणययंत्रणायंत्रितः। अथ प्रकृतिभीरुरित्यखिल-भीतिरक्षाक्षमान्, न जातु भुजमंडलाद्बहितो बहिर्भावय ॥'' इति वनं प्रति प्रस्थितं रामं प्रति जानक्या वाक्यमिदम्'' [उ०]।

सेष्टा संसृष्टिरेतेषां भेदेन यदिह स्थितिः ॥ ५३ ॥

एतेषां समनन्तरमेवोक्तस्वरूपाणामलङ्काराणां यथासंभवमन्योन्यनि-रपेक्षतया यत् एकत्र (शब्दभागे एव, अर्थविषये एव, उभयत्रापि वा) अवस्थानम्, सा एकार्थसमवायस्वभावा संसृष्टिः।

तत्र शब्दालङ्कारसंसृष्टिर्यथा—

वदनसौरभलोभपरिभ्रमद्भ्रमरसंभ्रमसंभृतशोभया।
चलितया विदधे कलमेखलाकलकलोऽलकलोलदृशाऽन्यया ॥१७६॥

अर्थालङ्कारसंसृष्टिस्तु—   शि. व. ६. १४

लिम्पतीव तमोऽङ्गानि वर्षतीवाञ्जनं नभः।   { मृ. १. ३४
असत्पुरुषसेवेव दृष्टिर्विफलतां गता ॥ १७७॥   { बा. च. १. १५

पूर्वत्र परस्परनिरपेक्षौ यमकानुप्रासौ संसृष्टिं प्रयोजयतः। उत्तरत्र तु तथाविधे उपमोत्प्रेक्षे। शब्दार्थालङ्कारयोस्तु संसृष्टिः—

सो णत्थि एत्थ गामे जो एअं महमहन्तलाअण्णम्।
तरुणाण हिअअलूडिं परिसप्पन्तिं णिवारेइ ॥ १७८ ॥

'स नास्त्यत्र ग्रामे य एनां महमहल्लावण्याम् ॥
तरुणानां हृदयलुण्ठाकीं परिष्वक्कंतीं निवारयति'॥

अत्रानुप्रासो रूपकं चान्योन्यानपेक्षे। संसर्गश्च तयोरेकत्र वाक्ये छन्दसि वा समवेतत्वात्।

''एवं शुद्धालङ्कारा दर्शिताः। अस्ति पुनः कश्चिद्विषयो यत्राङ्गदादिसंबद्ध-पद्मरागप्रमुखमणिमेलकवत्प्रोक्तानामलङ्काराणां संवलन एव चमत्कारः। तस्मात्सोऽप्यलङ्कारः। तत्र द्वयी गतिः। परस्परमनपेक्ष्य व्यवस्थिते-स्तदभावाच्च। तत्र प्रथमा संसृष्टिरुच्यते, द्वितीया तु संकरः। स च त्रिधेति प्रकारचतुष्टयं लक्षयति—सेष्टेति। भेदः स्वरूपतो विषयतो

वा परस्परमनपेक्षत्वम् । यद्वा विषयभेदे सति परस्परमनपेक्षत्वम् । स्थिति-र्व्यवस्थितिः । एतेषां समनन्तरमेवोक्तानामलङ्काराणां भेदेन यत्स्थितिः सा संसृष्टिरिष्टा । संकरभेदास्तु नैवम् । अङ्गाङ्गिभावे स्वरूपतः सापेक्षत्वात् । अनिश्चये व्यवस्थितेरेवाभावात् । व्यवस्थिते विषयतः परापेक्षत्वाद्विषया-भेदाच्च । सेयं शब्दालङ्कारमात्रस्य अर्थालङ्कारमात्रस्य शब्दालङ्कार-योर्वेति त्रिप्रकारा " [प्र०] " **एतेषामिति**। बहुत्वमविवक्षितम् । तेन द्वयोरपि संग्रहः। **भेदेनेति**। अनेन संकरव्युदासः । व्यवस्थित्यभावमुपपाद-यति। **व्यवस्थितेरिति** । यथा लिंपतीत्यत्रोत्प्रेक्षा लेपनविषया। उपमा असत्पुरुषसेवाविषया। **विषयाभेदादिति** अनिश्चये इति शेषः। (तत्र प्रथमा संसृष्टिर्यथा) **वदनेति**। माघकाव्ये कस्याश्चिन्नायिकाया वर्णनम् । मुखसौगंध्यलोभेन भ्रमतां भृंगाणां यः संभ्रमो भ्रमणं तेन पूर्णशोभया चूर्णकुंतलैश्चंचलदृशा मधुरो मेखलाशब्दो विदध इत्यर्थः " [उ०] ।

" अत्रानुप्रासयमकयोः परस्परमनपेक्ष्य व्यवस्थितिः। द्वितीया यथा— **लिम्पतीति** " [प्र०]। पद्यमिदमन्धकारवर्णनपरम् । अत्र पूर्वार्धे उत्प्रेक्षा उत्तरार्धे उपमा ते च परस्परमनपेक्ष्य व्यवस्थिते संसृष्टिं प्रयोजयतः—इति प्रदीपो-द्योतौ । अन्त्या यथा-" **सोणत्थीति** । महमहल्लावण्याम् नवनवीभवल्लाव-ण्याम्। परिष्वक्कंतीम् स्वानुरूपरमणाभावादितस्ततो गच्छंतीम्। (गाथा छन्दः) अत्र पूर्वार्धे छेकानुप्रासः । उत्तरार्धे हृदयलुण्ठाकीमिति रूपकम् " [उ०] ।

" अत्रानुप्रासरूपके शब्दालङ्कारौ । नन्वनयोः शब्दार्थरूपाश्रयभेदेन कथ-मेकार्थसमवायलक्षणा संसृष्टिरिति चेत् , एकवाक्ये छन्दसि वा समवेतत्वात् " [प्र०] ।

अविश्रान्तिजुषामात्मन्यङ्गाङ्गित्वं तु संकरः ।

एते एव यदात्मनि अनासादितस्वतन्त्रभावाःपरस्परं अनुग्राह्यानु-ग्राहकतां दधति, स (एषां संकीर्यमाणस्वरूपत्वात्) संकरः । उदा-हरणम्—

आत्ते सीमन्तरत्ने मरकतिनि हृते हेमताटङ्कपत्रे
लुप्तायां मेखलायां झटिति मणितुलाकोटियुग्मे गृहीते ।
शोणं बिम्बोष्ठकान्त्या त्वदरिमृगदृशामित्वरीणामरण्ये
राजन्गुञ्जाफलानां स्रज इति शबरा नैव हारं हरन्ति ॥ १७९ ॥

अत्र तद्गुणमपेक्ष्य भ्रान्तिमता प्रादुर्भूतम्, तदाश्रयेण च तद्गुणः सचेतसां प्रभूतचमत्कृतिनिमित्तमित्यनयोरङ्गाङ्गिभावः । यथा वा—

जटाभाभिर्भाभिः करधृतकलङ्काक्षवलयो
वियोगिव्यापत्तेरिव कलितवैराग्यविशदः ।
परिप्रेङ्खत्तारापरिकरकपालाङ्किततले
शशी भस्मापाण्डुः पितृवन इव व्योम्नि चरति ॥ १८० ॥

उपमा रूपकम् उत्प्रेक्षा श्लेषश्चेति चत्वारोऽत्र पूर्ववत् अङ्गाङ्गितया प्रतीयन्ते । कलङ्क एवाक्षवलयमिति रूपकपरिग्रहे करधृतत्वमेव साधक-प्रमाणतां प्रतिपद्यते । अस्य हि रूपकत्वे तिरोहितकलङ्करूपं अक्षवलय-मेव मुख्यतयाऽवगम्यते । तस्यैव च करग्रहणयोग्यतायां सार्वत्रिकी प्रसिद्धिः । श्लेषच्छायया तु कलङ्कस्य करधारणम् असदेव प्रत्यासत्त्या उपचर्य योज्यते । शशाङ्केन केवलं कलङ्कस्य मूर्त्यैव उद्वहनात् कलङ्कोऽक्षवलयमिवेति तु उपमायां कलङ्कस्य उत्कटतया प्रतिपत्तिः न चास्य करधृतत्वं तत्त्वतोऽस्तीति मुख्येऽप्युपचार एव शरणं स्यात् । एवंरूपश्च संकरः शब्दालङ्कारयोरपि परिदृश्यते । यथा--

" अविश्रान्तीति । तेषामेवालङ्काराणां चारुत्वार्थं स्वरूपनिष्पत्तये वाऽन्यापेक्षणादात्मन्यनासादितस्वतंत्रभावानां परस्परमनुग्राह्यानुग्राहकत्वं स तु संकरः । सङ्कीर्यमाणस्वरूपत्वात् । उदाहरणम्—आत्त इति " [प्र०] । पद्यमिदं हनुमत्कविनिबद्धायां खण्डप्रशस्तौ रामावतारवर्णने उपलभ्यत इति वामनाचार्यः (श्लो० ३५०) ।

" आत्ते गृहीते सीमंतरत्ने, प्रथमं तत्र दृष्टिपातात् । मरकतिनीत्यनेन झटिति विवेचनम् । शुद्धहेम्नां देहकान्त्याऽभिभवसंभवात् । ताटंकपत्रं कर्णा-लङ्कारः । लुप्तायां छिन्नायाम् । मणितुलाकोटियुग्मे नूपुरे । इत्वरीणां गतिशीला-नाम् । बिम्बौष्ठकान्त्येति । मुखस्य नम्रत्वात् । हारं मुक्तानिर्मितम् "[उ०]।

" अत्र बिम्बौष्ठकान्त्या शोणमिति तद्गुणमपेक्ष्य गुञ्जाफलानां स्रज इति भ्रान्तिमानात्मानं लभते । तद्गुणोऽप्यत्र न स्वातन्त्र्येण चमत्कारविशेषं करोति किं तु भ्रान्तिमदपेक्षयवेति परस्परमनुग्राह्यानुग्राहकभावः । अत्र द्वयो-रलङ्कारयोः संकरः । बहूनामपि यथा—जटेति " [प्र०] ।

० "शशी पितृवने श्मशान इव व्योम्न्याकाशे चरति संचरतीत्यन्वयः। कीदृशः। जटाभाभिर्जटासदृशीभिर्भाभिः किरणैरुपलक्षितः। करे धृतं कलङ्क एवाक्षवलयं रुद्राक्षवलयं येन सः। करो रश्मिः पाणिश्च। वियोक्तुं शीलं येषां ते वियोगिनो विषया विरहिणश्च। तेषां व्यापत्तेर्नाशादिव कलितं स्वीकृतं यद्वैराग्यं प्रसिद्धं विगतरक्तिमत्वं च तेन विशदः पाण्डुरः शुद्धचित्तश्च। भस्मेवापाण्डुर्भस्मना आपाण्डुश्च। कीदृशे व्योम्नि। परिप्रेङ्खन् चपलो यस्ताराणां समूहः स एव कपालानि तैरङ्कितं चिह्नितं तलं यस्य तादृशे। तलपदं स्वरूपार्थकम्" [चं०]।

"अत्र जटाभाभिर्भाभिरिति पितृवन इव व्योम्नीति चोपमा। कलङ्काक्षवलयेति तारापरिकरकपालेति च रूपकम्। वियोगिव्यापत्तेरित्युत्प्रेक्षा। वैराग्यविशद इति श्लेषः। चत्वारोऽप्येते परस्परमङ्गाङ्गिभावेन प्रतीयन्ते। तत्रोत्प्रेक्षा श्लेषाङ्गम्। तद्वशादेव वैराग्यविशद इत्यत्र द्वितीयार्थानुसंधानात्। श्लेषश्च रूपकोपमयोरङ्गम्। तद्वशादवगतनिर्वेदमहिम्नैव जटाया अक्षवलयधारणस्य च संगतेः। तारापरिकरकपालेति रूपकं पितृवन इवेत्युपमाया अङ्गम्। तद्बीजं हि सादृश्यम्। न च श्मशाने व्योम्ना सह तत्साहजिकं किं तु रूपितकपालाश्रयत्वेनैवेति। सर्वत्र चाङ्गानां चारुत्वार्यमङ्गयपेक्षा पूर्ववदूहनीया। सर्वेषां चैषा पार्यन्तिकचारुत्वहेतुरङ्गिभूता च समासोक्तिः। चंद्रगतत्वेन महाव्रतिवृत्तान्तप्रतीतेः। सा च व्यक्तैवेति प्रकाशकृता नोक्तेत्यवधेयम्। ननु कलंकाक्षवलयेति कथमेकान्ततो रूपकमुच्यते। उपमाया अपि संभवेन संदेहसंकरौचित्यादिति चेत्, न। रूपकपरिग्रहे करधृतत्वमेव साधकं प्रमाणमतः संदेहस्याभावात्। कथमस्य साधकत्वमिति चेत्, इत्थम्—करधृतत्वरूपविशेषणस्याक्षवलय एव सार्वत्रिकी प्रसिद्धिः, न तु कलङ्के। अतः प्राधान्येनाक्षवलयप्रतीतिरेवोद्देश्या। सा च रूपकपरिग्रहेणैव संभवति। तत्र तिरोहितकलङ्करूपमक्षवलयत्वमेव मुख्यतयावगम्यते। नन्वेवमपि विशेषणमिदमसम्यगेव। चन्द्रपक्षे किरणेन कलङ्कधारणस्याभावात् मूर्त्यैव तेन तद्धारणादिति चेत्, न। श्लेषच्छायया हि कलङ्कस्याप्रधानस्य करधारणमसदेव प्रत्यासन्नतयोपचर्य योज्यते। तथा सत्युपमापरिग्रहे को दोष इति चेत्, कलङ्कोऽक्षवलयमिवेत्युपमायां कलङ्कस्य प्रधानत्वेन प्रतीतिः। न चास्य करधृतत्वं

मुख्यतोऽस्तीति मुख्येऽप्युपचार एव ारणं स्यात्। मुख्यविषयोपचारापेक्षया चामुख्योपचार एव श्रेयानिति रूपकमेवाश्रीयते। शब्दालङ्कारयोरप्येष संकरो दृश्यत इति प्राञ्चः। उदाहरन्ति च—" [प्र०] "।

राजति तटीयमभिहतदानव-रासाऽतिपाति–साराव–नदा।
गजता च यूथमविरत–दान–वरा साऽतिपाति सारा वनदा॥१८१॥

ह. वि. ५. १३७

अत्र यमकमनुलोमप्रतिलोमश्च चित्रभेदः पादद्वयगते परस्परापेक्षे।

" राजतीति। पर्वतवर्णनम्। इयं तटी राजति। कीदृशी। अभिहतो दानवानां रासः क्रीडा शब्दो वा यस्यां सा। अतिपाती शीघ्रगामी सारावः सशब्दो नदो यस्यां सा। गजता गजयूथं अतिशयेन पाति रक्षति। किंभूता। अविरतेन दानेन मदेन वरा श्रेष्ठा सारा स्थिरा। वनदा वनखंडिका " [उ०]।

" तत्र यद्यपि यमकानुलोमविलोमचित्रभेदयोर्न स्फुटं परस्परापेक्षित्वं, तथापि यमकनिर्वाहप्रवृत्तस्य कवेरपृथक्प्रयत्ननिर्वृत्ततयानुलोमविलोमस्योत्पत्तौ यमकापेक्षा, यमकस्य तु चारुताऽतिशये तदपेक्षता। तदाश्रयेणातिसुन्दरतयाऽतिशयेन विदग्धमनोऽनुरञ्जकत्वादिति तेषामाशयः। वस्तुतस्तु यमकनिर्वाह एव कविप्रवृत्तिरिति निश्चायकं नास्ति। अस्तु वा तथा। तथापि यमकं न चित्रहेतुः। किं तु तत्प्रयत्नः। तस्मादेकाश्रयानुप्रवेशेनैवायं संकरो न त्वनुग्राह्यानुग्राहकतयेत्येव युक्तम् " [प्र०]। तेषामाशय इति। इदं हि ' शब्दार्थवर्त्यलङ्कारा वाक्य एकत्र भासिनः। संकरो वा ' इत्युद्भटोक्तं (५. ११) प्रकाशकृदभिमतं च मतं अभिप्रेत्योक्तम्। एतच्च अलङ्कारसर्वस्वकारेण खण्डितम् (पृ. २२०–२२१)।

एकस्य च ग्रहे न्यायदोषाभावादनिश्चयः॥ ५४॥

द्वयोर्बहूनां वा अलंकाराणामेकत्र समावेशेऽपि विरोधात् न यत्र युगपदवस्थानम्, न चैकतरस्य परिग्रहे साधकम्, तदितरस्य वा परिहारे बाधकमस्ति, येनैकतर एव परिगृह्येत, स निश्चयाभावरूपो द्वितीयः संकरः। समुच्चयेन संकरस्यैवाक्षेपात्। उदाहरणम्—

जह गहिरो जह रअण्णणिब्भरो जह अ णिम्मलच्छाओ।
ता किं विहिणा एसो सुरसवाणीओ जलणिही ण किओ।१८२

[यथा गभीरो यथा रत्ननिर्भरो यथा च निर्मलच्छायः ।
तथा किं विधिना एष सरसपानीयो जलनिधिर्न कृतः ॥]

अत्र समुद्रे प्रस्तुते विशेषणसाम्यादप्रस्तुतार्थप्रतीतेः किमसौ समासोक्तिः किं अब्धेरप्रस्तुतस्य मुखेन कस्यापि तत्समगुणतया प्रस्तुतस्य प्रतीतेः इयमप्रस्तुतप्रशंसा इति संदेहः ।

" एकस्य चेति । न्यायः साधकप्रमाणसत्ता । दोषः प्रतिकूलसत्ता । ग्रहो व्यवस्थितिः । यत्र द्वयोर्बहूनां वाऽलङ्काराणामेकत्र योगत्वेऽपि विरोधान्नैकदा व्यवस्थितिः, न चैकतरपरिग्रहे साधकं तदितरपरिग्रहबाधकं येन तदेव व्यवतिष्ठेत, सोऽप्यनिश्चयरूपो द्वितीयः संकरः । सूत्रस्थचकारेण संकरस्यैवाक्षेपात् । उदाहरणम्–जहेति " [प्र०] ।

" अत्र किं समुद्रे प्रस्तुते श्लिष्टविशेषणमहिम्नाऽप्रस्तुतपुरुषविशेषप्रतीतेरियं समासोक्तिः, किं वाऽब्धेरप्रस्तुतात्प्रस्तुतस्य पुरुषविशेषस्य तत्समानगुणतया प्रतिपत्तेरप्रस्तुतप्रशंसेति संदेहः । एकस्यैकदा प्रस्तुताप्रस्तुतोभयरूपत्वाभावादनयोर्युगपदसंभवात्, न्यायदोषयोरसंभवाच्च। अयं द्वयोः संकरः । " [प्र०]

यथा वा—

नयनानन्ददायीन्दोर्बिम्बमेतत्प्रसीदति ।
अधुनाऽपि निरुद्धाशमविशीर्णमिदं तमः ॥ १८३ ॥

अत्र किं कामस्योद्दीपकः कालो वर्तते इति भङ्ग्यन्तरेणाभिधानात् पर्यायोक्तम्, उत वदनस्येन्दुबिम्बतया अध्यवसानात् अतिशयोक्तिः, किं वा एतदिति वक्त्रं निर्दिश्य तद्रूपारोपवशात् रूपकम् . अथवा तयोः समुच्चयविवक्षायां दीपकम्, अथवा तुल्ययोगिता, किमु प्रदोषसमये विशेषणसाम्यादाननस्यावगतौ समासोक्तिः, आहोस्वित् मुखनैर्मल्यप्रस्तावात् अप्रस्तुतप्रशंसा इति बहूनां संदेहादयमेव संकरः ।

यत्र तु न्यायदोषयोरन्यतरस्यावतारः, तत्र एकतरस्य निश्चयात् न संशयः । न्यायश्च साधकत्वम् अनुकूलता दोषोऽपि बाधकत्वं प्रतिकूलता । तत्र

' सौभाग्यं वितनोति वक्त्रशशिनो ज्योत्स्नेव हासद्युतिः ॥ '

इत्यत्र मुख्यतया अवगम्यमाना हासद्युतिर्वक्त्रे एवानुकूल्यं भजते

इत्युपमायाः साधकम्, शशिनि तु न तथा प्रतिकूलेति रूपकं प्रति तस्या अबाधकता ।

" बहूनां यथा । नयनेति । अत्र किं कामोद्दीपकः कालो वर्तत इति भङ्ग्यन्तरेणाभिधानात्पर्यायोक्तम् । किं वा एतदित्यस्य बिम्बपरामर्शकतया वदनस्येन्दुबिम्बेनाध्यवसानादतिशयोक्तिः । किं वा एतदिति वक्त्रं निर्दिश्येन्दुबिम्बरूपणवशाद्रूपकम् । अथ प्रसीदतीत्यस्योभयत्रान्वयविवक्षायामेकतरस्य प्रकृतत्वाद्दीपकम् । द्वयोरपि प्रकृतत्वेऽप्रकृतत्वे वा तुल्ययोगिता वा । किं वा प्रदोषवर्णने चन्द्रबिम्बस्य प्रकृतत्वे विशेषणसाम्यादाननप्रतीतौ समासोक्तिः । आहोस्विन्मुखनैर्मल्यवर्णनप्रस्तावाच्चन्द्रस्याप्रस्तुतत्वेनाप्रस्तुतप्रशंसेति संदेहः । न्यायदोषयोरभावात् । यत्र तु तयोरन्यतरस्यावतारस्तत्रैकतरनिश्चयान्न संशयस्तत्र 'सौभाग्यं वितनोति वक्त्रशशिनो ज्योत्स्नेव हासद्युतिः ।' इत्यत्र मुख्यत्वेन प्रतीयमाना हसितद्युतिर्वक्त्र एवानुकूल्यं भजते । तत्रैव मुख्यतस्तत्संभवात् वक्त्रस्य प्राधान्येन स्थितिरुपमायामेवेत्युपमासाधिका शशिनि तु नानुकूला । मुख्यतस्तत्र हासद्युतेरभावात् । नापि प्रतिकूला । गौणत्वेनाप्यनुपपत्तेरिति न रूपकं प्रति साधिका बाधिका वा " [प्र०] ।

" अतिशयोक्तिः । निगीर्याध्यवसानरूपा । रूपकमिति । निगरणाभावादित्यर्थः । दीपकमिति । चंद्रबिंबं प्रसीदति एतन्मुखं च प्रसीदतीत्यन्वयादिति भावः । तुल्ययोगितेति । द्वयोरौपम्यस्याक्षेपलभ्यत्वात् । मुख्यत्वेनेति । ज्योत्स्नासादृश्याश्रयतयेत्यर्थः । वक्त्र एवेति । इतररूपानाच्छादिते वक्त्रे इत्यर्थः । प्राधान्येन । इतरानाच्छादितत्वेन । शशिनि त्विति । शशितादात्म्येन प्रतीते त्वित्यर्थः " [उ०] ।

'वक्त्रेन्दौ तव सत्ययं यदपरः शीतांशुरभ्युद्यतः ।'

इत्यत्रापरत्वमिन्दोरनुगुणं न तु वक्त्रस्य प्रतिकूलमिति रूपकस्य साधकतां प्रतिपद्यते, न तूपमाया बाधकताम् ।

'राजनारायणं लक्ष्मीस्त्वामालिङ्गति निर्भरम् ।'

इत्यत्र पुनरालिङ्गनमुपमां निरस्यति, सदृशं प्रति परप्रेयसीप्रयुक्तस्यालिङ्गनस्यासंभवात् ।

'पादाम्बुजं भवतु नो विजयाय मञ्जुमञ्जीरशिञ्जितमनोहरमम्बिकायाः ।'

इत्यत्र मञ्जीरशिञ्जितम् अम्बुजे प्रतिकूलम् असंभवादिति रूपकस्य बाधकम् , न तु पादेऽनुकूलमित्युपमायाः साधकमभिधीयते । विध्युपमर्दिनो बाधकस्य तदपेक्षयोत्कटत्वेन प्रतिपत्तेः । एवमन्यत्रापि सुधीभिः परीक्ष्यम् ।

" 'वक्त्रेन्दौ तव सत्ययं यदपरः शीतांशुरभ्युद्यतः' इत्यत्रापरत्वमिन्दावनुगुणम् । मुखरूपेन्दौ सति किमपरेणेन्दुनेति प्रतीतेः । तथाप्रतीतिश्च रूपकेण विना नेति रूपकं प्रति साधकतां प्रतिपद्यते । न पुनर्वक्त्रस्य प्रतिकूलम् । इन्दुसमानगुणे वक्त्रे सति किमपर इन्दुरुदित इति प्रतीतावत्रासंगत्यभावात् । अतो नोपमाबाधकम् । 'राजनारायणं लक्ष्मीस्त्वामालिङ्गति निर्भरम् ।' इत्यत्रालिङ्गनमुपमायां बाधकम् । स्वामिसदृशं प्रति प्रेयसीप्रयुक्तस्यालिङ्गनस्यानौचित्यात् । न तु रूपके साधकम् । 'पादाम्बुजं भवतु वो विजयाय मञ्जुमञ्जीरशिञ्जितमनोहरमम्बिकायाः ।' इत्यत्र मञ्जीरशिञ्जितमम्बुजे प्रतिकूलम् । तत्रासंभवात् । अतो रूपके बाधकम् । नन्वेतदुपमासाधकमपि भवति । पादेऽनुकूलत्वात् । तत्कथं रूपकबाधकतामात्रत्वमस्योच्यते, न तूपमासाधकत्वमपीति । एवमन्यत्रापि यदेकत्रानुकूलं तद्बाहुल्येन परत्र प्रतिकूलम् , यच्चैकत्र प्रतिकूलं तत्तत एवान्यत्रानुकूलम् । अन्यथा तथात्वस्यैवासंभवादिति चेत् , सत्यम् । किं तु यस्य यथात्वमुत्कटं प्रतीयते तत्र तस्य तथात्वव्यपदेशः । अत्र तु विध्युपमर्दि बाधकं साधकापेक्षयोत्कटत्वेन प्रतीयत इति तेनैव व्यपदेशो युक्तः। तदेतदुक्तं विध्युपमर्दिबाधकस्य तदपेक्षयोत्कटत्वेन प्रतिपत्तेरिति । अन्ये तु तदन्यथा व्याचक्षते—विधीयतेऽनेनेति—विधिः साधकं, तदुपमर्दि तस्माद्बलीयः । एतदुक्तं भवति—मञ्जीरशिञ्जितस्य पादे संभवमात्रेण न तावदुपमासाधकत्वं निर्वहति यावदम्बुजे तद्विरहो न निश्चीयते । तथा च तद्बाधकस्यैव प्राथमिकत्वात्तन्मुखेनैव व्यपदेशः । एवमन्यत्रापि साधकबाधकसत्त्वं सुधीभिः परिभावनीयम् " [प्र०] ।

पादाम्बुजमिति । " आनन्दमन्थरपुरन्दरमुक्तमाल्यं मौलौ हठेन निहितंमहिषासुरस्य " इत्याद्यं पादद्वयम् । " धर्माचार्यकृते देवीस्तुतिरूपे पञ्चस्तवी नामककाव्ये तृतीये घटस्तवे प्रथमं पद्यमिदम् " [झ०] ।

स्फुटमेकत्र विषये शब्दार्थालंकृतिद्वयम् ।
व्यवस्थितं च

अभिन्ने एव पदे स्फुटतया यत् उभावपि शब्दार्थालङ्कारौ व्यवस्थां समासादयतः सोऽप्यपरः संकरः । उदाहरणम्—

स्पष्टोल्लसत्किरणकेसरसूर्यबिम्बविस्तीर्णकर्णिकमथो दिवसारविन्दम् ।
श्लिष्टाष्टदिग्दलकलापमुखावतारबद्धान्धकारमधुपावलि संचुकोच ॥१८४॥

अत्र एकपदानुप्रविष्टौ रूपकानुप्रासौ ।

" **स्फुटमिति** । विषयः पदम् । तेनैकत्र पदे यदुभौ शब्दार्थालंकारौ स्फुटं व्यवस्थितौ भवतः, सोऽप्यपरः संकरः । उदाहरणम्—**स्पष्टोल्लसदिति** " [प्र०] । " हरविजये १९ सर्गे संध्याकालवर्णनपरं प्रथमं पद्यम् । स्पष्टमुल्लसंतः किरणा एव केसरं यस्य तादृशं सूर्यबिंबमेव विस्तीर्णा कर्णिका यस्य, मिथः संबद्धाः अष्टौ दिश एव दलसमूहा यस्य तच्च तन्मुखं रात्रेरारंभस्तदवतारेण बद्धा अंधकारमधुपावलिर्यत्र तत् " [उ०] ।

" अत्र पादत्रये प्रत्येकं रूपकानुप्रासौ प्रविष्टौ । शब्दार्थालंकृतीति प्रायोवादः । शब्दालङ्कारयोरप्येतद्दर्शनात् । यथा—' कलकलोऽलकलोलदृशाऽन्यया ' इत्यादावनुप्रासयमकयोः । " [प्र०]

तेनासौ त्रिरूपः परिकीर्तितः ॥ ५५ ॥

तदयमनुग्राह्यानुग्राहकतया संदेहेन एकपदप्रतिपाद्यतया च व्यवस्थितत्वात् त्रिप्रकार एव संकरो व्याकृतः । प्रकारान्तरेण तु न शक्यो व्याकर्तुम्, आनन्त्यात्तत्प्रभेदानामिति । प्रतिपादिताः शब्दार्थोभयगतत्वेन त्रैविध्यजुषोऽलङ्काराः ।

कुतः पुनरेष नियमो यदेतेषां तुल्येऽपि काव्यशोभाऽतिशयहेतुत्वे कश्चिदलङ्कारः शब्दस्य, कश्चिदर्थस्य, कश्चिच्चोभयस्येति चेत् । उक्तमत्र, यथा काव्ये दोषगुणालङ्काराणां शब्दार्थोभयगतत्वेन व्यवस्थायामन्वयव्यतिरेकावेव प्रभवतः । निमित्तान्तरस्याभावात् । ततश्च योऽलङ्कारो यदीयान्वयव्यतिरेकावनुविधत्ते, स तदलङ्कारो व्यवस्थाप्यते इति । एवं च यथा पुनरुक्तवदाभासः परम्परितरूपकं चोभयोर्भावाभावानुविधायितया उभयालङ्कारौ, तथा शब्दहेतुकार्थान्तर-

न्यासप्रभृतयोऽपि द्रष्टव्याः । अर्थस्य तु तत्र वैचित्र्यम् उत्कटतया प्रतिभासते इति वाच्यालङ्कारमध्ये वस्तुस्थितिमनपेक्ष्यैव लक्षिताः । योऽलङ्कारो यदाश्रितः स तदलङ्कार इत्यपि कल्पनायाम् अन्वय-व्यतिरेकावेव समाश्रयितव्यौ, तदाश्रयणमंतरेण विशिष्टस्याश्रयाश्रयिभा-वस्याभावादित्यलङ्काराणां यथोक्तनिमित्त एव परस्परव्यतिरेको ज्यायान् ।

" तेनेति । तस्मादनुग्राह्यानुग्राहकतया संदेहैकपदप्रतिपाद्यतया व्यवस्थितत्वाच्च त्रिप्रकारोऽयं संकरः कथितः । प्रकारान्तरेण तु न शक्यो व्याकर्तुम् । भेदानामनन्तत्वात् ।

" इति प्रतिपादिताः शब्दार्थतदुभयगतत्वेन त्रिविधा अलङ्काराः । ननु त्रिविधानामप्येषां काव्यशोभातिशयहेतुत्वस्य तुल्यत्वेऽपि कुत एष प्रतिनियमः यत्कश्चिच्छब्दस्य कश्चिदर्थस्य कश्चिच्छब्दार्थयोरिति चेत् । उक्तमत्र प्रागेव दोषगुणालङ्काराणां शब्दार्थोभयगतत्वव्यवस्थायामन्वयव्य-तिरेकावेव प्रभवतः । निमित्तान्तराभावात् । ततश्च योऽलङ्कारः शब्दार्थयोर्मध्ये यस्यान्वयव्यतिरेकावनुविधत्ते स तदलङ्कार इति व्यवस्थाप्यते । शब्दान्वयव्यति-रेकानुविधायित्वं चैतदेव, यच्छब्दपरिवृत्त्यसहत्वम् । नन्वेवं यथा पुनरुक्तवदा-भासः परम्परितरूपकं चोभयभावाभावानुविधायित्वेनोभयालङ्कारस्तथाऽर्थ-शब्दहेतुकार्थान्तरन्यासप्रभृतयोऽप्युभयालङ्कारा भवेयुरिति चेत्, न । इष्टापत्तेः । एवं तर्हि कथमुभयालंकारप्रस्तावमुल्लङ्घ्यार्थमात्रालङ्कारप्रस्तावे पठिता इति चेत्, तत्रार्थवैचित्र्यस्य प्रकटतया प्रतिभासात् । अथ योऽलङ्कारो यदाश्रितः स तदीय इत्येव किं न विभाग इति चेत्, तथा कल्पनायामप्यन्वयव्यतिरेका-वेव समाश्रयितव्यौ । तद्व्यतिरेकेण विशिष्टस्याश्रयाश्रयिभावस्याभावात् । तस्मादलङ्काराणामन्वयव्यतिरेकनिबंधन एव परस्परं भेद इत्येव ज्यायः ।

"नन्वलङ्काराणां दोषाः प्राचीनैरभिहितास्ते किं न सन्त्येव, आहोस्वित्संभ-विनोऽप्युपेक्षिताः । आद्येऽनुभवविरोधः अन्त्ये न्यूनतेत्यत आह-" [प्र०]

एषां दोषा यथायोगं संभवन्तोऽपि केचन ।
उक्तेष्वन्तर्भवन्तीति न पृथक्प्रतिपादिताः ॥ ५६ ॥

तथा हि अनुप्रासस्य प्रसिद्ध्यभावो वैफल्यं वृत्तिविरोध इति ये

त्रयो दोषाः, ते प्रसिद्धिविरुद्धतां अपुष्टार्थत्वं प्रतिकूलवर्णतां च यथाक्रमं न व्यतिक्रामन्ति, तत्स्वभावत्वात्।

" एषामिति। तथा हि अनुप्रासस्य तावत्त्रयो दोषाः, प्रसिद्ध्यभावो वैफल्यं वृत्तिविरोधश्च। ते च यथाक्रमं प्रसिद्धिविरोधापुष्टार्थत्वप्रतिकूलवर्णत्वेभ्यो नातिरिच्यन्ते। तत्स्वभावत्वात्।" [प्र०]।

क्रमेणोदाहरणम्—

चक्री चक्रारपङ्क्तिं हरिरपि च हरीन्धूर्जटिर्धूर्ध्वजान्तान
अक्षं नक्षत्रनाथोऽरुणमपि वरुणः कूबराग्रं कुबेरः।
रंहः संघः सुराणां जगदुपकृतये नित्ययुक्तस्य यस्य
स्तौति प्रीतिप्रसन्नोऽन्वहमहिमरुचेः सोऽवतात्स्यन्दनो वः॥१८५॥

अत्र कर्तृकर्मप्रतिनियमेन स्तुतिः अनुप्रासानुरोधेनैव कृता, न पुराणेतिहासादिषु तथा प्रतीतेति प्रसिद्धिविरोधः।

भण तरुणि रमणमन्दिरमानन्दस्यन्दिसुन्दरेन्दुमुखि।
यदि सल्लीलोल्लापिनि गच्छसि तत्किं त्वदीयं मे॥ १८६॥

अनणुरणन्मणिमेखलमविरतशिञ्जानमञ्जुमञ्जीरम्।
परिसरणमरुणचरणे रणरणकमकारणं कुरुते॥ १८७॥

अत्र वाच्यस्य विचिन्त्यमानं न किंचिदपि चारुत्वं प्रतीयते इत्यपुष्टार्थतैवानुप्रासस्य वैफल्यम्।

अकुण्ठोत्कंठया पूर्णमाकण्ठं कलकण्ठि माम्।
कम्बुकण्ठयाः क्षणं कण्ठे कुरु कण्ठार्तिमुद्धर॥ १८८॥

अत्र शृंगारे परुषवर्णाडम्बरः पूर्वोक्तरीत्या विरुध्यते इति परुषानुप्रासोऽत्र प्रतिकूलवर्णतैव वृत्तिविरोधः।

" तत्र प्रसिद्ध्यभावो यथा—चक्रीति (मयूरकविकृते सूर्यशतके ७१ सूर्यरथवर्णनम्) अहिमरुचेः सूर्यस्य स स्यंदनो वोऽवतादिति संबंधः। जगदुपकारार्थं नित्यप्रवृत्तस्य यस्य चक्रकीलकपंक्तिं चक्री विष्णुः, हरीनश्वान् हरिरिंद्रः, धूर्यानमुखम् तत्रत्यध्वजानामग्रान् धूर्जटिः शिवः, नक्षत्रनाथः

चन्द्रः अक्षम् युगम्, अरुणं सारथिं वरुणः, कूबराग्रं युगबंधनाग्रं कुबेरः, रंहो वेगं सुराणां समूहः, स्तौतीति सर्वान्वयि " [उ०]। " अत्र चक्रिप्रभृतीनां कर्तॄणां चक्रारपङ्क्त्यादीनां कर्मणां प्रतिनियमेन स्तुतिरनुप्रासानुरोधेनैव निबद्धा न पुनरितिहासादिषु तथा प्रसिद्धेति प्रसिद्ध्यभावः। सोऽयं प्रसिद्धिविरोध एव।" [प्र०]

वैफल्यं यथा—भणति " हे तरुणि आनन्दस्यंदो सुंदरश्च यः इंदुस्तन्मुखि। सलीलमुल्लासयुक्ते। उल्लासो गमनवचनादिप्रकारः। यदि रमणमंदिरं गच्छसि तदा त्वदीयमेकं प्रयोजनं भणेत्यर्थः। श्रोभाविगमनां प्रति जारस्य वचः। अननुरणदिति। शब्दरहितमणिमेखलम्। तत्स्थानस्य गुरुत्वेन लघुसंचारात्। अविरतसिंजानमंजुमंजीरम् इति च परिसरण-विशेषणम्। परिसरणं गमनम्। भूषणानां च शिंजितम्। रणरणकमुत्कंठाम्। ईदृशं तव परिसरणं दृष्ट्वा मम चेतोऽकारणमुत्कंठां कुरुते इत्यर्थः। तवोल्लासात् इतः परं भर्तृगृहगमनाच्चेति भावः। (युग्ममेतत्।) शब्दानुरूपार्थविरहेण अनुप्राससत्त्वेऽपि नास्वादोत्कर्षः। शब्दालङ्काराणामपि अर्थातिशयाधानद्वारेणैव चमत्कारित्वात्। शब्दानां परिवृत्त्यसहत्वमात्रेण शब्दालङ्कारव्यपदेशः" [उ०]।

वृत्तिविरोधो यथा—" अकुण्ठेति। नायिकासगंमोत्सुकस्य कस्यचिदियमुक्तिः। हे कलकण्ठि। कलो मधुरस्वरस्तद्युक्तः कण्ठो यस्यास्तथाविधे इति दूतीसंबोधनम्। विरहातुरतया कोकिलाया वा। मां कम्बुकण्ठ्याः शङ्ख-सदृशग्रीवाया नायिकायाः कण्ठे क्षणं कुरु। तदालिङ्गनशालिनं कुर्वित्यर्थः। कण्ठस्यार्तिं तदालिङ्गनौत्सुक्यरूपामुद्धरापहर। कीदृशं माम्। आकण्ठं कण्ठ-पर्यन्तं अकुण्ठाप्रतिहता। उत्तरोत्तरवर्धमानेति यावत्। तथाविधा या उत्कण्ठा तया पूर्णम्। व्याप्तमित्यर्थः। अत्र शृङ्गारे ' अटवर्गाः ' इत्यादिना प्रतिषेधा-ट्टकारः प्रतिकूल इति प्रतिकूलवर्णत्वं दोषः " [चं०]

यमकस्य पादत्रयगतत्वेन यमनमप्रयुक्तत्वं दोषः। यथा—

भुजंगमस्येव मणिः सदम्भा ग्राहावकीर्णेव नदी सदम्भाः।
दुरन्ततां निर्णयतोऽपि जन्तोःकर्षन्ति चेतः प्रसभं सदम्भाः ॥१८९॥

उपमायां उपमानस्य जातिप्रमाणगतन्यूनत्वम् अधिकता वा तादृशी

अनुचितार्थत्वं दोषः । धर्माश्रये तु न्यूनाधिकत्वे यथाक्रमं हीनपदत्वमधिकपदत्वं च न व्यभिचरतः । क्रमेणोदाहरणम्—

' चण्डालैरिव युष्माभिः साहसं परमं कृतम् '
' वह्निस्फुलिङ्ग इव भानुरयं चकास्ति '
अयं पद्मासनासीनश्चक्रवाको विराजते ।
युगादौ भगवान्वेधा विनिर्मित्सुरिव प्रजाः ॥ १९० ॥
पातालमिव नाभिस्ते स्तनौ क्षितिधरोपमौ ।
वेणीदण्डः पुनरयं कालिन्दीपातसंनिभः ॥ १९१ ॥

अत्र चण्डालादिभिरुपमानैः प्रस्तुतोऽर्थोऽत्यर्थमेव कदर्थित इत्यनुचितार्थता ।

" यमकस्य तु पादत्रयगतत्वेन यमनमप्रयुक्तत्वमेव । कविभिस्तथाऽप्रयोगात् । यथा—भुजंगमेति " [प्र०] । " सदम्भा दम्भयुक्ताः खलाः स्वीयां दुरन्ततां परिणामदुष्टतां निश्चितवतोऽपि जन्तोश्चेतः प्रमुखे आपाततः कर्षन्तीत्यन्वयः । क इव । सद्विद्यमानमम्भस्तेजोविशेषो यत्र तादृशो भुजंगमस्य मणिरिव । तथा ग्राहैरवकीर्णा व्याप्ता सत्समीचीनमम्भ उदकं यस्यास्तथाभूता नदीवेत्युपमाद्वयम् " [चं०] ।

" उपमायां तु यौ न्यूनाधिकोपमानत्वे दोषौ तत्रोपमाने उपमेयापेक्षया जातिगतं प्रमाणगतं वा यन्न्यूनत्वमधिकता वा तदनुचितार्थम् । धर्मगते न्यूनत्वाधिकत्वे यथाक्रमं न्यूनपदत्वाधिकपदत्वे । तत्र जातिगतं न्यूनत्वं यथा— ' चण्डालैरिव युष्माभिः साहसं परमं कृतम् ' । अत्र चण्डालत्वजातेर्न्यूनतया दुष्कर्मकारित्वव्यक्तेरनुचितार्थत्वम् ।

" प्रमाणगतं यथा—' वह्निस्फुलिङ्ग इव भानुरयं चकास्ति ' इति । जातिगतमधिकत्वं यथा—अयमिति । ब्रह्मणः कल्पभेदेन भेदाद् ब्रह्मत्वं जातिः । प्रमाणगतमधिकत्वं यथा पातालमिति । एषु चण्डालादिभिरुपमानैरुपमेयभूता अर्था अत्यन्तमेव कदर्थिताः । निन्दोपहासादिप्रतीतेरित्यनुचितार्थता " [प्र०]। सर्वाणीमान्युदाहरणानि वामनकाव्यालङ्कारसूत्रवृत्तौ (४.२.९.११) उपलभ्यन्ते।

स मुनिर्लाञ्छितो मौञ्ज्या कृष्णाजिनपटं वहन् ।
व्यराजन्नीलजीमूतभागाश्लिष्ट इवांशुमान् ॥ १९२ ॥

अत्रोपमानस्य मौञ्जीस्थानीयस्तडिल्लक्षणो धर्मः केनापि पदेन न प्रतिपादित इति हीनपदत्वम् ।

स पीतवासाः प्रगृहीतशार्ङ्गो मनोज्ञभीमं वपुराप कृष्णः ।
शतह्रदेन्द्रायुधवान्निशायां संसृज्यमानः शशिनेव मेघः ॥१९३॥

अत्रोपमेयस्य शङ्खादेरनिर्देशे शशिनो ग्रहणमतिरिच्यते इत्याधिक-पदत्वम् ।

लिङ्गवचनभेदोऽपि उपमानोपमेययोः साधारणं चेत् धर्ममन्यरूपं कुर्यात्, तदा एकतरस्यैव तद्धर्मसमन्वयावगतेः सविशेषणस्यैव तस्योप-मानत्वमुपमेयत्वं वा प्रतीयमानेन धर्मेण प्रतीयते इति प्रक्रान्तस्यार्थस्य स्फुटमनिर्वाहादस्य भग्नप्रक्रमरूपत्वम् । यथा—

'चिन्तारत्नमिव च्युतोऽसि करतो धिङ् मन्दभाग्यस्य मे ।'
'सक्तवो भक्षिता देव शुद्धाः कुलवधूरिव ।'

यत्र तु नानात्वेऽपि लिङ्गवचनयोः सामान्याभिधायि पदं स्वरूप-भेदं नापद्यते, न तत्रैतद्दूषणावतारः, उभयथाऽपि अस्य अनुगमक्षमस्वभाव-त्वात् । यथा—

'गुणैरनर्घ्यैः प्रथितो रत्नैरिव महार्णवः ।'

तद्वेषोऽसदृशोऽन्याभिः स्त्रीभिर्मधुरताभृतः ।
दधते स्म परां शोभां तदीया विभ्रमा इव ॥ १९४ ॥

"स मुनिरिति । मौञ्ज्या लांच्छितश्चिह्नितः कृष्णाजिनरूपं पटं वहन् स मुनिर्नारदो नीलेन जीमूतभागेन मेघखण्डेनाश्लिष्टोंऽशुमानिव व्यराजदित्यन्वयः। अत्र मौञ्जीस्थानीयस्तडिद्रूपो धर्मो नोक्त इति धर्मन्यूनता दोषः" [चं०]। न चाक्षेपादिनाऽपि स्पष्टं प्रतीयते व्याप्त्यभावादिति प्रदीपः । श्लोकोऽयं वामने-नोदाहृतः (४. २. ९)।

"स पीतेति । पीतवर्णं वासो वस्त्रं यस्य, प्रगृहीतं शार्ङ्गं धनुः येन, स श्रीकृष्णो मनोज्ञं सुन्दरं च तद्भीमं वपुः, आप प्राप । क इव । शतह्रदा विद्युत् इन्द्रायुधं तद्वान् निशायां संसृज्यमानो मेघ इव" [उ०]।

"अत्रोपमेये शङ्खाद्यनिर्देशादुपमाने तत्तुल्यस्य शशिनो ग्रहणमतिरिच्यते इत्यधिकपदत्वमेवैतत् ।

" भिन्नलिङ्गत्वभिन्नवचनत्वे अप्युपमादोषौ नोक्तदोषातिरेकिणौ । तथा हि लिङ्गवचनयोर्भेदे यद्युपमानोपमेययोः साधारणधर्मवाचकं पदमन्यतरघटितलिङ्गं कुर्यात्, तदैकतरस्यैव तद्धर्मसमन्वयावगतेः कथमुपमानिर्वाहः । अथ प्रतीयमानं साधर्म्यमाश्रित्येयं स्यात्, तथाप्युपात्तधर्मविशिष्टस्यैवोपमानत्वमुपमेयत्वं वा प्रतीयेत । न च तथा प्रस्तुतम् । अतः प्रक्रान्तस्याभावाद्भग्नप्रक्रमत्वमेव दोषः । यथा—' चिन्तारत्नमिव च्युतोऽसि करतो धिङ् मन्दभाग्यस्य मे ' । अत्र च्युत इत्युपमेयमात्रेणान्वीयते । पुंलिङ्गत्वात् । वचनभेदे यथा—' सक्तवो भक्षिता देव शुद्धाः कुलवधूरिव । ' । अत्र शुद्धा इत्युपमेयमात्रेणान्वीयते । लिङ्गभेदोऽत्र विद्यमानोऽप्यप्रधानम् । उपमानस्य बहुत्वे लिङ्गभेदेऽप्युभयान्वयसंभवात् । यत्र तु लिङ्गवचनयोर्भेदेऽपि सामान्याभिधायि पदमुपात्तरूपभेदं नापद्यते, किं तूपात्तेनैव रूपेणोभयत्रान्वेति, तत्र दोषत्वमेव नास्ति । उभयत्राप्यस्यानुगमयोग्यस्वभावत्वात् । तत्र लिङ्गभेदे यथा–' गुणैरनर्घ्यैः प्रथितो रत्नैरिव महार्णवः । ' अत्र लिङ्गभेदेऽपि विशेषणान्वयस्याविशेषाद्दोषत्वाभावः । वचनभेदे यथा—तद्वेष इति । अत्र वचनभेदेऽपि मधुरताभृत इत्यस्योभयान्वयाविशेषान्न दोषत्वम् " [प्र०] ।

कालपुरुषविध्यादिभेदेऽपि न तथा प्रतीतिरस्खलितरूपतया विश्रान्तिमासादयतीत्यसावपि भग्नप्रक्रमतयैव व्याप्तः । यथा—

अतिथिं नाम काकुत्स्थात्पुत्रमाप कुमुद्वती ।
पश्चिमाद्यामिनीयामात्प्रसादमिव चेतना ॥ १९५ ॥

र. १७. १

अत्र चेतना प्रसादमाप्नोति न पुनरापेति कालभेदः ।

प्रत्यग्रमज्जनविशेषविविक्तमूर्तिः कौसुम्भरागरुचिरस्फुरदंशुकान्ता ।
विभ्राजसे मकरकेतनमर्चयन्ती बालप्रवालविटपप्रभवा लतेव॥१९६॥

रत्नावली १, २१.

अत्र लता विभ्राजते न तु विभ्राजसे इति संबोध्यमाननिष्ठस्य परभागस्य असंबोध्यमानविषयतया व्यत्यासात् पुरुषभेदः ।

' गङ्गेव प्रवहतु ते सदैव कीर्तिः'–इत्यादौ च गङ्गा प्रवहति न तु

प्रवहतु इति अप्रवृत्तप्रवर्तनात्मनो विधेः । एवंजातीयकस्य चान्यस्यार्थस्य उपमानगतस्यासंभवाद्विध्यादिभेदः ।

तत्र कालभेदे यथा––अतिथिमिति । " अत्र चेतना प्रसादमाप्नोतीति प्रकृतं न तु तमापेति कालभेदे प्रक्रमभेद एव । पुरुषभेदे यथा––प्रत्यग्रेति " [प्र०]। (वासवदत्तां प्रति वत्सराजस्योक्तिः ।) अभिनवस्नानविशेषेण शुद्धा मूर्तिः शरीरं यस्याः । कौसुंभरागेण रुचिरः स्फुरन् अंशुकप्रांतो यस्याः । नूतनकिसलययुक्तशाखाप्रभवा लतेव " [उ०]। " अत्र लता विभ्राजत इति प्रस्तुतं न तु सा विभ्राजस इति तस्मात्पुरुषभेदः । संबोध्यनिष्ठस्य भ्राजनस्यासंबोध्यविषयतया अप्रतीतेः " [प्र०]। " अत्रेति । तस्मात् विभ्राजत इति पाठो युक्तः । न च देवीं संबोध्योक्तेः तत्र प्रथमपुरुषार्थानन्वयः । हे देवि भवती भ्राजते इत्यन्वयसंभवात् । संबोध्यनिष्ठस्येति । मध्यमपुरुषवाच्यस्य संबोध्यार्थेनैवान्वयादिति भावः " [उ०]।

" विधिभेदे यथा––' गङ्गेव प्रवहतु ते सदैव कीर्तिः । ' इत्यादावप्रवृत्तप्रवर्तनात्मनो विधेर्भेदः । यतो गंगा प्रवहतीति विवक्षितं न तु सा प्रवहत्विति । एवंविधस्यान्यस्यार्थस्योपमानगतस्यासंभवाद्विध्यादिभेदो द्रष्टव्यः " [प्र०]।

ननु समानं उच्चारितं प्रतीयमानं वा धर्मान्तरमुपादाय पर्यवसितायाम् उपमायाम् उपमेयस्य प्रकृतधर्माभिसंबधान्न कश्चित्कालादिभेदोऽस्ति । यत्राप्युपात्तेनैव सामान्यधर्मेण उपमा अवगम्यते, यथा–– ' युधिष्ठिर इवायं सत्यं वदतीति '––तत्र युधिष्ठिर इव सत्यवाद्ययं सत्यं वदतीति प्रतिपत्स्यामहे । सत्यवादी सत्यं वदतीति च न पौनरुक्त्यम् आशङ्कनीयम् । रैपोषं पुष्णातीतिवत् युधिष्ठिर इव सत्यवदनेन सत्यवाद्ययमित्यर्थावगमात् । सत्यमेवैतत् । किं तु स्थितेषु प्रयोगेषु समर्थनमिदं न तु सर्वथा निरवद्यम् प्रस्तुतवस्तुप्रतीतिव्याघातादिति सचेतस एवात्र प्रमाणम् ।

असादृश्यासंभवावप्युपमायां अनुचितार्थतायामेव पर्यवस्यतः । यथा––

' ग्रथ्नामि काव्यशशिनं विततार्थरश्मिम् '

अत्र काव्यस्य शशिना अर्थानां च रश्मिभिः साधर्म्यं कुत्रापि न प्रतीतमित्यनुचितार्थत्वम् ।

निपेतुरास्यादिव तस्य दीप्ताः शरा धनुर्मण्डलमध्यभाजः ।
जाज्वल्यमाना इव वारिधारा दिनार्धभाजः परिवेषिणोऽर्कात् ११७

अत्रापि ज्वलन्त्योऽम्बुधाराः सूर्यमण्डलात् निष्पतन्त्यो न संभवन्तीत्युपनिबध्यमानोऽर्थोऽनौचित्यमेव पुष्णाति ।

" ननूदाहृतेषु कथं दुष्टता । भिन्नकालसंभिन्नाद्धर्मादतिरिक्तमुपात्तं प्रतीतं वा कंचित्साधारणं धर्ममुपादायोपमापर्यवसाने पश्चाद्भिन्नकालादिसंभिन्नधर्मान्वयात् । तथा हि । विभ्राजस इत्यत्र विविक्तमूर्तत्वादिना लतानायिकयोरुपमापर्यवसाने पश्चाद्विभ्राजस इत्यस्य नायिकामात्रान्वयेऽपि को दोषः । अथ यत्रोपात्तेनैव धर्मेणोपमानिर्वाहः स च धर्मभेदः कालभेदासंभिन्न एव, तत्र का गतिः । यथा—' युधिष्ठिर इवायं सत्यवादी ' इति । युधिष्ठिरो हि सत्यमवादीत्, न तु वदतीति चेत् । उच्यते । तत्रापि सत्यवादीति प्रतीतधर्मेणैवोपमित्यव्याघातः । न च तथा सति सत्यवाद्ययं सत्यं वदतीति पर्यवसितौ सत्यं वदतीति पुनरुक्तमिति वाच्यम् । ' रैपोषं पुष्णाति ' इत्याद्यनुप्रयोगवददोषत्वात् । रैपोषमित्यत्रार्थव्ययेन पोषणस्येवात्राप्याजानिकसत्यवादित्वस्य प्रतीतेरिति । सत्यमात्थ । किं तु स्थितेष्वनुप्रयोगेषु क्वचित्तथा पुनरुक्तिमात्रसमर्थनं न तु सर्वथैव तन्निरवद्यम् । प्रस्तुतस्य रसादेः प्रतीतिस्खलनात् । न च तदसिद्धम् । सहृदयसंवेद्यत्वात् । किं च उपात्तमनादृत्य प्रतीतेनोपमा इति तुच्छम् । उपात्तक्रिययैव तद्विवक्षणात् ।

" असादृश्यासंभवावप्युपमादूषणे अनुचितार्थतायामेव पर्यवस्यतः । यथा– ' प्रश्नामि काव्यशशिनं विततार्थरश्मिम् । ' (वामन, ४. २. १६).

" अत्र काव्यस्य शशिनाऽर्थानां च रश्मिभिः साधर्म्यं न क्वापि प्रसिद्धमिति तत्रोपमानिबन्धनमनुचितार्थमिति । निपेतुरिति । " [प्र०] । " धनुर्मण्डलमध्यगतस्य तस्य आस्यादिव दीप्ताः शरा निपेतुः । दिनार्धभाजः परिवेषशालिनोऽर्कात् सूर्यात् जाज्वल्यमाना वारिधारा इवेत्युपमानाप्रसिद्धिदोषः " [चं०] ।

" अत्रापि ज्वलदम्बुधारायाः सूर्यमण्डलान्निपतनमसंभवीति तन्निबन्धनमनौचित्यं पुष्णाति " [प्र०] ।

उत्प्रेक्षायामपि, संभावनं ध्रुवेवादय एव शब्दा वक्तुं सहन्ते, न यथाशब्दोऽपि। केवलस्यास्य साधर्म्यमेव प्रतिपादयितुं पर्याप्तत्वात् तस्य चास्यामविवक्षितत्वादिति तत्राशक्तिरस्यावाचकत्वं दोषः। यथा--

उद्ययौ दीर्घिकागर्भान्मुकुलं मेचकोत्पलम्।
नारीलोचनचातुर्यशङ्कासंकुचितं यथा॥ १९८॥

उत्प्रेक्षितमपि तात्त्विकेन रूपेण परिवर्जितत्वात् निरुपाख्यप्रख्यम्, तत्समर्थनाय यत् अर्थान्तरन्यासोपादानम् तत् आलेख्यमिव गगनतलेऽत्यन्तमसमीचीनमिति निर्विषयत्वमेतस्य अनुचितार्थतैव दोषः। यथा--

दिवाकराद्रक्षति यो गुहासु लीनं दिवाभीतमिवान्धकारम्।
क्षुद्रेऽपि नूनं शरणं प्रपन्ने ममत्वमुच्चैः शिरसामतीव॥ १९९॥

कु. सं. १. १२

अत्राचेतनस्य तमसो दिवाकरात्त्रास एव न संभवतीति कुत एव तत्प्रयोजितमद्रिणा परित्राणम्। संभावितेन तु रूपेण प्रतिभासमानस्यास्य न काचिदनुपपत्तिरवतरतीति व्यर्थ एव तत्समर्थनायां यत्नः।

साधारणविशेषणवशादेव समासोक्तिरनुक्तमपि उपमानविशेषं प्रकाशयतीति तस्यात्र पुनरुपादाने प्रयोजनाभावात् अनुपादेयता यत्, तत् अपुष्टार्थत्वं पुनरुक्तता वा दोषः। यथा--

स्पृशति तिग्मरुचौ ककुभः करैर्दयितयेव विजृम्भिततापया।
अतनुमानपरिग्रहया स्थितं रुचिरया चिरयाऽपि दिनाश्रिया॥ २००॥

ह. वि. ३. ३७

"उत्प्रेक्षायामपि ध्रुवेवादय एव शब्दा व्यक्तमुत्सहन्ते, न तु यथाशब्दोऽपि। केवलस्यास्य साधर्म्यमेव प्रतिपादयितुं समर्थत्वात्। अत उत्प्रेक्षायां यथाशब्दोपादानेऽवाचकत्वमेव। यथा—

"उद्ययाविति। निर्विषयत्वमप्युत्प्रेक्षादूषणमनुचितार्थत्वमेव। यत्तात्त्विकरूपाभावान्निरुपाख्यप्रख्यं तत्समर्थनाय यदर्थान्तरन्यासोपादानं तद्रूपं हि तत् यथा—

"दिवाकारादिति। अत्र तमसस्त्रास एवासंभवी। तमसोऽचेतनत्वात्। तत्कथं तत्प्रयुक्तमद्रिणा तत्परित्राणम्। उत्प्रेक्षितत्रासवत्तया प्रतीतस्यास्य न

काचिदनुपपत्तिरवतरतीति व्यर्थ एव तत्समर्थनायां यत्नः । यत्तु समासोक्तौ साधारणविशेषणबलादेवोपमानप्रतीतौ प्रयोजनाभावेन तदुपादानवैयर्थ्यं तदपुष्टार्थत्वं पुनरुक्तता वा दोषः । यथा—स्पृशतीति" [प्र०] । "ग्रीष्मवर्णनमिदम्" [झ०] । "तिग्मरुचौ सूर्ये ककुभो दिशः करैः स्पृशति सति विजृम्भिततापया विवृद्धतापया दयितयेव दिनश्रिया ग्रीष्मदिनशोभया अतनुर्दीर्घो मानपरिग्रहो यस्यास्तथाभूतया स्थितमित्यन्वयः । किंभूतया । चिरयापि चिरकालीनयापि रुचिरया मनोरमया । करा रश्मयो हस्ताश्च । ताप उष्णता खेदश्च । मानोऽभिमानः, मानःपरिमाणं च । अत्र समासोक्तौ श्लिष्टविशेषणबलात् लिङ्गवशेन च तिग्मरुचेर्नायकतया ककुभां च नायिकात्वेनाभिव्यक्तिवद्दिनश्रियोऽपि प्रतिनायिकात्वेनाभिव्यक्तिसंभावनात् दयितयेत्यपुष्टार्थम्" [चं०] ।

अत्र तिग्मरुचेः ककुभां च यथा सदृशविशेषणवशेन व्यक्तिविशेषपरिग्रहेण च नायकतया नायिकात्वेन च व्यक्तिः, तथा ग्रीष्मदिवसश्रियोऽपि प्रतिनायिकात्वेन भविष्यतीति किं दयितयेति स्वशब्दोपादानेन ।

श्लेषोपमायास्तु स विषयः, यत्रोपमानस्योपादानमन्तरेण साधारणेष्वपि विशेषणेषु न तथा प्रतीतिः । यथा—

स्वयं च पल्लवाताम्रभास्वत्करविराजिनी ।
प्रभातसंध्येवास्वापफललुब्धेहितप्रदा ॥ २०१ ॥

"अत्र सदृशविशेषणबलेन लिङ्गविशेषपरिग्रहाच्च तिग्मरुचेर्नायकतया ककुभां तु नायिकात्वेन व्यक्तिः । तथा ग्रीष्मदिवसश्रियोऽपि तत एव प्रतिनायिकात्वेन भविष्यतीति दयितयेत्यपुष्टार्थम् । अर्थतः प्रतीतस्योपादाने यदि पुनरुक्तिस्तदाऽर्थपुनरुक्तत्वं दोषः । नन्वस्यापुष्टत्वे श्लेषोपमा निर्विषया स्यादिति चेत । न । स हि तस्या विषयो यत्रोपमानोपादानं विना श्लिष्टेष्वपि विशेषणेषु न स्फुटा प्रतिपत्तिः । यथा—स्वयं चेति" [प्र०, उद्भट,४,१५] ।

"नन्विति । यथा दयिते दयितां करैः स्पृशति सति दयितान्तरस्य तापस्तथा रवौ करैर्दिशः स्पृशति ग्रीष्मदिवसश्रियोऽपि ताप इत्येवमत्रापि श्लेषोऽस्त्विति भावः । न स्फुटेति । अयमाशयः । यत्रोपमानस्य स्वपदोपादानेऽपि न समासोक्तित्यागस्तत्रावश्यकसमासोक्त्यैव निर्वाहे उपमानपदो-

पादानं व्यर्थम्। यथा स्पृशतीत्यादौ। अत्र दयितयेत्युपादानेऽपि रवेर्नायकत्वं ककुभां नायिकात्वं च समासोक्त्यैवेति तस्या आवश्यकत्वम्। यत्र तूपमानपदोपादाने समासोक्तिनिवृत्तिस्तदनुपादाने च यत्रोपमानाप्रतीतिः उपात्तसाधारणधर्माणामुपमेयमात्रान्विततयैव प्रतीतेः, तत्रोपमाया एव चमत्कारित्वाय देयं तत्पदम्। यथा स्वयं चेत्यादौ। गौरीपक्षे पल्लववदाताम्रौ भास्वन्तौ च यौ करौ ताभ्यां विराजिनी। सुखेनाप्यते इति स्वापं, खल् प्रत्ययः। न स्वापमस्वापं दुःखप्रापं तादृशं यत्फलं·मोक्षादि तत्र ये लुब्धास्तेषामीहितप्रदा इष्टदात्री। प्रभातसंध्यापक्षे तु पल्लवताम्रैर्भास्वत्करैः सूर्यकिरणैर्विराजिनी। अस्वापो निद्राभावः तद्रूपफललुब्धे जने हितप्रदा इष्टदात्री। अत्रोपमानपदोपादाने समासोक्तित्यागादिति " [उ०]।

" अत्र प्रभातसंध्याया अनुपादाने न स्फुटा प्रतीतिः। " [प्र०]।

अप्रस्तुतप्रशंसायामपि उपमेयं अनयैव रीत्या प्रतीतं न पुनः प्रयोगेण कदर्थतां नेयम्। यथा--

आहूतेषु विहंगमेषु मशको नायान्पुरो वार्यते
मध्येवारिधि वा वसंस्तृणमणिर्धत्ते मणीनां रुचम्।
खद्योतोऽपि न कम्पते प्रचलितुं मध्येऽपि तेजस्विनां
धिक्सामान्यमचेतनं प्रभुमिवानामृष्टतत्त्वान्तरम्॥ २०२॥

अत्र अचेतनस्य प्रभोरप्रस्तुत-विशिष्ट-सामान्यद्वारेणाभिव्यक्तेरयुक्तमेव पुनः कथनम्।

" अप्रस्तुतप्रशंसायामप्युपमेयस्योपादानवैयर्थ्यं यत्तदपुष्टार्थत्वमेव दोषः। तत्राप्युपमेयमनयैव रीत्याऽवगन्तव्यं न पुनः शब्दप्रयोगेण दुष्टतां नेयम्।

यथा—आहूतेष्विति " [प्र०]। " भल्लटशतके ६९ पद्यम्। विहंगमेषु पक्षिषु आहूतेषु पुरः अग्रे आयान् आगच्छन् मशको न वार्यते। तृणमणिः काचादिमणिः प्रवालं वा। मणीनां मध्ये धुरि अंते वा वसन् मणीनां रत्नानां रुचं कान्तिं धत्ते। खद्योतोऽपि तेजस्विनामग्निसूर्यादीनां मध्ये अपिशब्दादग्रे वा प्रचलितुं गंतुं न कम्पते न बिभेति। एतत्सामान्यं अचेतनं अविचारित·पदार्थगतविशेषं प्रभुमिव धिक् " [उ०]।

तदेतेऽलंकारदोषाः यथासंभविनोऽन्येऽप्येवंजातीयकाः पूर्वोक्तयैव दोषजात्या अन्तर्भाविताः, न पृथक् प्रतिपादनमर्हन्तीति ।

संपूर्णमिदं काव्यलक्षणम् ।

इत्येष मार्गो विदुषां विभिन्नोऽप्यभिन्नरूपः प्रतिभासते यत् ।
न तद्विचित्रं यदमुत्र सम्यग्विनिर्मिता संघटनैव हेतुः ॥ १ ॥

इति श्रीमम्मटभट्टविरचिते काव्यप्रकाशेऽर्थालङ्कारनिर्णयो नाम दशम उल्लासः ।

समाप्तश्चायं काव्यप्रकाशः ।

" तदेतेऽलङ्कारदोषा यथासंभवमन्येऽप्येवंजातीयकाः प्रोक्तजात्यन्तर्भाविता इति पृथङ्न प्रतिपादनमर्हन्तीति कल्याणमास्ताम् । " [प्रभा०] ।

मयराष्ट्रे समुत्पन्नो भृगुवंशसमुद्भवः ।
सुतः शङ्करदत्तस्य हरदत्तेतिनामभाक् ॥
काव्यप्रकाशदशमे टीकाः संचित्य प्राक्तनाः ।
अकरोम् बालबोधाय संग्रहं सारबोधकम् ॥
अल्पज्ञानां कथा कास्ति बहुज्ञानां मतिभ्रमः ।
इति संचिन्त्य सुधियो मर्षयन्तु त्रुटीर्मम ॥
सर्वान्तःस्थे जगन्नाथे सर्वकार्यविधायके ।
श्रमं समर्पयाम्येतं हरिर्मेऽनेन तुष्यतात् ॥

॥ श्रीकृष्णार्पणमस्तु ॥

KĀVYA PRAKĀS'A

NOTES

ULLÂSA X

After having treated of the 'figures of word' in the ninth Ullâsa, (*Mammaṭa now*) *treats of the 'figures of sense'* in this Ullâsa. According to Pradīpa their number is 61, but according to Saṅketa it is 62. First, he defines Comparison which, among the figures of sense, is principal, owing to its being very intelligible and pleasing, and owing to its being at the root of many other figures, such as उपमेयोपमा, उत्प्रेक्षा, प्रतीप, स्मृति, भ्रान्ति, संदेह, रूपक &c.

1. Comparison (उपमा).

KARIKA I

Kā. i *a*:—**Connection of two distinct things with a common property is Comparison.**

साधर्म्य means **साधारणधर्मसंबन्ध**, not **सादृश्य**. For, according to Grammarians,[1] the termination **य** that is applied to the compound word **सधर्म** denotes the connection of a **समानधर्म** with the thing or things possessed of that **समानधर्म.** As '**पीताम्बरत्व** denotes the connection (i. e. **संयोग**) between a yellow garment and the man who wears it. Now the connection between the **समानधर्म** and the things possessed of that

---

1. समासकृत्तद्धितास्तु यद्यपि केवलं संबन्धं नाभिदधति, तथापि संबन्धिनि वर्तमानाः संबन्धं प्रवृत्तिनिमित्तमपेक्षन्त इति तेभ्यः संबन्धे भावप्रत्ययः। तथा च राजपुरुषत्वमिति स्वस्वामिभावः प्रतीयते। पाचकत्वमिति क्रियाकारकसंबन्धः। औपगवत्वमिति अपत्यापत्यवत्संबन्धः। *Vide* कैयट on Patañjali's महाभाष्य Chap. V.

समानधर्म cannot be सादृश्य ; for सादृश्य exists between the two things possessed of समानधर्म ; not between a समानधर्म, on the one hand, and things possessed of that समानधर्म, on the other.

There is another argument to prove that साधर्म्य does not mean सादृश्य. The sentence[1] हंसीव धवलश्चन्द्रः is admitted on all hands to be an example of a faulty comparison. The comparison is faulty here, because the common property धवलत्व cannot be connected with the उपमान (हंसी), the word हंसी being in the feminine gender and धवल in the masculine. But it is a rule that the word of comparison इव brings out the connection of the उपमान and the उपमेय with that common property (such as धवलत्व here) which is expressed in the sentence. Now, since धवलत्व cannot be connected with हंसी, the comparison becomes faulty. If, however, इव conveyed the sense of simple resemblance (सादृश्य) and not of connection with a common property (साधारणधर्मसंबन्ध), comparison would not be faulty. For, we might understand any other common property than धवलत्व as connected with हंसी and चन्द्र, and thus understand comparison. That the comparison is faulty here, however, shows that साधर्म्य (and comparison is nothing but साधर्म्य) means साधारणधर्मसंबन्ध and not सादृश्य.

If it be said that inasmuch as 'connection with a common property' is but a connection, and that inasmuch as a connection exists between two things, the two things between which that connection exists, must be stated wherever that connection is stated; and since those two things are not stated in the present definition, it is open to the fault of 'Deficiency'; we reply that those two things we obtain here by implication; the two things are a thing compared (उपमेय) and a thing compared to (उपमान). These are the appropriate correlatives as far as 'connection with a

1. हंसीव धवल इत्यादौ चोपात्तधर्मस्यैवेवादिना बोधननियमेन पुंस्त्वविशिष्टधावल्यस्य हंस्यामन्वयासंभवेन दुष्टोपमात्वं संगतमिति ज्ञेयम्। प्रभा.

common property' is concerned, and these only are implied here, and not such, for instance, as cause[1] and effect, which although they possess some point of resemblance, (e. g. existence, knowability, etc.) yet do not possess a striking point of resemblance which alone constitutes comparison. In case, however, the point of resemblance between them is striking, as in the instance **पितेव पुत्रः सगुणः स आसीत्**, they too become appropriate correlatives.

Thus, *inasmuch as a point of resemblance is possible between* (two such things *only* as are related to each other as) *the* **उपमान** *and the* **उपमेय** *and not as cause and effect* &c, *connection of those* (i. e. the **उपमान** and the **उपमेय**) *only with a common property is Comparison.* Such is the definition of Comparison. The implication of the **उपमान** and **उपमेय** in this definition serves only to render the apprehension of resemblance complete[2] and not to exclude such things as cause and effect &c. which are destitute of a striking point of resemblance.

If it be said that the word 'distinct' also does not deserve to be expressed in the definition ; for, the idea of distinctness can also be obtained by implication, since we cannot speak of a point of resemblance with reference to two identical things; we reply that *the word 'distinct' serves to exclude the figure* **अनन्वय**, where the point of resemblance is not real but fancied, there being only one thing compared to itself ; (whilst, in Comparison the point of resemblance is

---

1. न चेति । कार्यकारणादिकयोरपि कथंचित्साधर्म्यसंभवात् तत्रातिव्याप्तिरिति शङ्काशयः चमत्कारिसाधर्म्यस्योपमात्वात्तस्य च कार्यकारणादिमात्रयोरभावान्नातिप्रसंगः । यत्र तु तादृशं साधर्म्यमस्ति, यथा 'पितेव पुत्रः सगुणः स आसीत्' इत्यादौ, तत्र तयोरुपमानोपमेयत्वमुपमालंकारश्चेष्ट एवेति समाधानार्थः । **प्रभा.**

2. प्रतिपत्तीति । निराकाङ्क्षप्रतिपत्तीत्यर्थः । **प्रभा.**

real, there being two distinct things one of which is compared to the other.)

If it be said that[1] although the word भेद excludes अनन्वय, still the definition extends to another figure *viz.* उपमेयोपमा where the उपमेय and the उपमान are distinct; we reply:—उपमा is desirable in उपमेयोपमा inasmuch as the apprehension of उपमा ultimately results from it. But it is reckoned as a distinct figure because of the apprehension of an additional fact which is peculiar to it, *i. e.* that the उपमेय and the उपमान have not a third thing for their like. In अनन्वय the ultimate apprehension is not that of उपमा which is only apparent. Hence it has been excluded by the use of the word भेद.

Saṅketa observes—If between उपमान and उपमेय there is an existence of भेद brought about by word and its sense, then there is an existence of अभेद also brought above by समानधर्म. For, it is said, similarity (सादृश्य) exists where some things are common and others are distinct. We should, therefore, understand उपमाभेदे = उपमा + अभेदे also. Thus, there is predominance of भेद and अभेद in उपमा.

The word 'striking' should also be supplied before the word 'साधर्म्य' in the definition ; for, what constitutes the figure Comparison is not connection with a simple but with a striking point of resemblance. Thus, the sentence घट इव पटो द्रव्यम् expressing a simple point of resemblance bewteen घट and पट is no example of Comparison.

The strikingness of उपमा must be due to the manifestation of the excellence of the उपमेय. Thus प्रतीप instanced in

---

1. नन्वेवमुपमेयोपमायामतिप्रसंग इति चेत्, सत्यम्। तत्रोपमाप्रतीतिपर्यवसानेन उपमात्वस्य इष्टत्वात्। तृतीयसदृशव्यवच्छेदप्रयुक्तोत्कर्षस्याधिकांशस्य प्रतीत्या परमलंकारान्तरत्वेन कथनम्। अनन्वये तूपमाप्रतीतिपर्यवसानमेव न इति तद्व्यावर्तनमिति शेषः। प्रभा.

मुखमिव चंद्र: is excluded; for in it strikingness is due to the manifestation of the excellence of the उपमान.

Mammaṭa's definition of उपमा is thus criticised by Jagannātha:—The definition साधर्म्यमुपमा भेदे is not very satisfactory. For, it extends to व्यतिरेक, a distinct figure where resemblance is stated in order that it may be denied afterwards. It cannot be said that the word साधर्म्य in the definition means 'ultimate resemblance' and that thus it excludes व्यतिरेक where not resemblance but the denial of it is ultimate. For, if the word be understood in that sense, it would exclude अनन्वय also, since in अनन्वय, too, what is ultimately perceived is not resemblance, but the fact that one thing has not another for its like. Thus, the word भेद in the definition would be useless. The presence of this word, however, shows that साधर्म्य is not used by Mammaṭa in the sense of 'ultimate resemblance.' Thus, the definition is open to the fault of अतिव्याप्ति.'

Jagannātha's definition of उपमा is not open to this fault; for, it contains the word सुन्दरम् which excludes both अनन्वय and व्यतिरेक, since, in both of these, resemblance is not pleasing (striking).

Jagannātha has, no doubt, improved upon Mammaṭa by the substitution of the word सुन्दरम् for भेदे in his definition; for the word सुन्दरम्, besides serving the purpose which is served by भेदे, also removes the fault of अतिव्याप्ति to which Mammaṭa's definition is open.

It may, however, be remarked that it is not necessary to insert the word सुन्दरम् in the definition, since the idea expressed by it may be obtained by implication. We are here treating of figures. Now a figure is, as Mammaṭa has said, nothing but strikingness. When, therefore, साधर्म्य is said to constitute the figure Comparison, it is, of course, implied that it is striking. Hence प्रदीप has said that the

words अलंकारत्वे सति should be supplied in the definition of उपमा. Thus the idea of strikingness being obtained by implication, उपमा may be defined simply as साधर्म्य (resemblance).

All the other figures which contain resemblance, such as अनन्वय, उपमेयोपमा, व्यतिरेक &c. are excluded by the fact that the resemblance which they express is not striking. This, however, renders the word भेद in Mammaṭa's definition of उपमा, unnecessary. For, अनन्वय also may be excluded by the fact that in it resemblance is not striking. उपमेयोपमा also may be excluded by the fact that in it the mutual resemblance of two things is not striking, [thus Jagannâtha is not right when he says that in उपमेयोपमा, उपमा is striking,] and that, therefore, it should be included under उपमा.

He now divides Comparison into

Kā. i *b* :—**(1) Complete and (2) Elliptical.**

Thus comparison is two-fold. *Complete Comparison* (पूर्णा) *occurs where the thing compared, the thing compared to, the common property and the word conveying the sense of comparison are (all) expressed. Elliptical* (लुप्ता) *occurs where one two or (even) three (of these four things) are omitted.*

Of these,

Kā. i *b c d* :—**The first is (A) Direct, and (B) Indirect, and is possible in (a) a sentence, (b) a compound, and (c) a nominal affix.**

The *first* division of Comparison *i. e. complete* Comparison occurs in a sentence (वाक्यगा), when all the above-mentioned four things उपमान &c. are expressed by words that are uncompounded and have distinct cases of their own.

Complete Comparison occurs in a compound (समासगा), when any two of the above-mentioned four things are compounded.

The third kind of Complete Comparison arises from the fact that the word denoting the उपमान is not considered as either compounded, or uncompounded but as forming a sentence with the nominal affix conveying the sense of comparison (ताद्धितगा).

In grammar, समासवृत्ति is regarded as distinct from तद्धितवृत्ति. Pāṇini[1] declares that a compound is possible between two case-inflected words. Now चन्द्रवत्[2] cannot be called a compound, since वत् is not a case-inflected word. Nor can चन्द्रवत् be regarded as a sentence; for, a sentence contains words that have distinct cases of their own. Thus ताद्धितगा is different from वाक्यगा as well as समासगा. समासगा is also different from वाक्यगा where words are uncompounded, although they have, as in समासगा, distinct cases of their own.

This three-fold Complete Comparison is again six-fold, owing to each kind being further divided into either Direct (श्रौती) or Indirect (आर्थी).

That again is Direct, where the comparison, which is nothing but a connection of the उपमान and the उपमेय with a common property, is expressed.

That again is Indirect, where the comparison is obtained by implication. Direct Comparison occurs when words such as यथा, इव, वा &c. are employed, or when the affix वत् is employed in the sense of इव, according to Pāṇini's Sūtra 'तत्र तस्येव.' Indirect occurs when such words as तुल्य, सम etc. are employed, or when the affix वत् is employed in the sense of तुल्य, according to Pāṇini's Sūtra 'तेन तुल्यम् etc.'

'But,' says an objector, 'this division of Comparison into Direct and Indirect is not proper; for, connection with

---

1. सह सुपा (II. I. 4.)

३४९

2. समासाभावस्य चन्द्रवन्मुखमिति ताद्धितेऽपि सत्त्वादाह–भिन्नविभक्तिकानीति। अभिन्नविभक्तिकत्वस्य चन्द्र इव मुखमिति समासेऽपि सत्त्वादसमस्तानीत्युक्तम्। प्रभा.

a point of resemblance is apprehended from both the kinds of words यथा, इव etc. and तुल्य, सम &c. without distinction; it should not be urged that there is a distinction inasmuch as the words यथा, इव &c. have a power to denote 'connection' of a common property with both the उपमेय and उपमान; whilst the words तुल्य &c. do not possess such a power; for, the words यथा, इव &c. enable us to apprehend that the thing after which they are placed is the उपमान. They thus become attributives of the उपमान and can, therefore, only show that the common property is connected with the उपमान only, and not that it is connected with the उपमेय also. An attributive that qualifies one word is not seen to show that its sense is connected with the sense of another word.

To this objection, we reply that *although the words यथा, इव &c. intimate that the word after which they are placed denotes the उपमान and thus become its attributives, yet these words, in virtue of a (peculiar) power possessed by them, show, the moment they are heard, the connection (of the common property with the उपमेय also) ; just as the genitive case,* as in the example 'चैत्रस्य धनम्,' although it intimates that चैत्र after which it is placed is subordinate to धन (चैत्रीयं धनम्), and thus becomes its attributive (स्वामिचैत्रीयम्), yet shows that its sense is connected with that of the principal word 'धन' also; (i. e. shows not only that चैत्र is the possessor but that धन is the thing possessed also).

Thus, the division of Comparison into Direct and Indirect is proper, inasmuch as it is based on a distinction as to the way in which connection with a common property is understood (directly, in the case of यथा, इव &c., and indirectly i. e.. by implication, in the case of तुल्य, सम &c.)

Thus, for example, in such sentences as पद्ममिव मुखम् &c., the words यथा, इव &c. do not rest until they have brought out some particular point of resemblance, whether expressed or implied—such as loveliness here—between the उपमेय and the

उपमान ; for, these words have a power to denote a particular point of resemblance. This power does not, however, belong to *such words as* तुल्य &c. which *rest (after simply denoting a general resemblance, sometimes, in connection) with the* उपमेय *only*, (*as*) *in* 'पद्मेन तुल्यं मुखम्', (*or sometimes, in connection) with the* उपमान *only*, (*as*) *in* 'पद्मं तुल्यं मुखस्य,' (*or sometimes in connection) with even both*, (*as*) *in* 'मुखं पद्मं च तुल्यम्'; (*this*) *general resemblance*, (*however*), *is apprehended (from these sentences, only) when we reflect that there must be some particular point of resemblance*,—some common property—such as 'loveliness' between मुख and पद्म; for, the apprehension of the former is impossible without that of the latter, and necessarily implies it (प्रतीतानुपपत्तिः).

It is thus that the connection with a particular common property is apprehended afterwards, and not at the very time these words are heard. It is thus also that this connection is implied by these words and not expressed by them. But when such a sentence as पद्ममिव मुखम् is heard, the connection of 'loveliness' with पद्म and मुख is apprehended at once. Now, this apprehension is unintelligible (प्रतीत्यनुपपत्ति) unless we suppose that the words यथा, इव &c. have got a power of expressing this particular point of resemblance, as soon as they are heard. Thus, connection with a particular common property is expressed by the words यथा, इव &c. Thus, the division of comparison into Direct and Indirect, based as it is upon this difference of nature of the words यथा, इव &c., and तुल्य, सम &c., is quite proper.

Some, however, hold that the division of Comparison into Direct and Indirect is due to the fact that the relation of the उपमेय and the उपमान (and not connection with a common property) is expressed in the case of यथा, इव &c., and implied in the case of तुल्य &c. This view, however, is improper, since it is inconsistent with Mammaṭa's Vṛtti which says:—

connection with a common property being implied in the case of तुल्य &c., when these words are employed, the Comparison is Indirect (साधर्म्यस्यार्थत्वात्तुल्यादिपदोपादाने आर्थी). Now it is in the fitness of things that if the Indirectness of Comparison depends upon the implied character of साधर्म्य, Directness of Comparison should depend upon the expressed character of the same (साधर्म्य and not of anything else). Besides, if Comparison is nothing but Connection with a common property, the division of Comparison into Direct and Indirect should depend upon the expressed or implied nature of the same connection with a common property and of nothing else. For these very reasons, we should reject the view of those men who say that the words यथा, इव &c., like the genitive case, express (general) resemblance itself ; whilst, the words तुल्य &c. express 'things possessed of resemblance' also.

What these men say is this :—In the case of यथा, इव &c., resemblance is expressed prominently,[1] *i. e.* as a विशेष्य ; whilst in the case of तुल्य &c. which signify 'resembling things', resemblance is expressed subordinately, *i. e.* as a विशेषण to something else. This view is to be rejected for the following reasons :—

I. Although resemblance is expressed prominenty—as a विशेष्य—in the case of यथा, इव &c., and is expressed subordinately—as a विशेषण in the case of तुल्य &c., still,[2] in both the cases, resemblance is expressed, not implied. Whilst, Mammaṭa has distinctly said that Comparison is आर्थी because साधर्म्य is implied in the case of तुल्य &c.

---

1. साक्षाद्विशेष्यतया । सादृश्यविशिष्टधर्मिप्रतिपादकैस्तुल्यादिभिस्तु विशेषणतया सादृश्याभिधानादार्थीत्वमित्यर्थः । प्रभा.

2. अनुपादेयमिति । एवमपि तुल्यादिपदैः सादृश्योक्तिरस्त्येवेति नैतद्युक्तमित्यर्थः । प्रभा.

II. यथा इव, &c., according to Mammaṭa, denote साधर्म्य, not सादृश्य. Now, साधर्म्य is not identical with सादृश्य. For, सादृश्य, means resemblance in general, but साधर्म्य, as has been shown at the outset, means connection with a particular point of resemblance.

III. If really the distinction of धर्म and धर्मी, between the meanings of यथा, इव &c., and तुल्य, सम &c., were in his mind, Mammaṭa would have said साम्यपर्यालोचनया धर्मिप्रतीतिः, instead of साम्यपर्यालोचनया तुल्यताप्रतीतिः, as he has done in his Vṛtti beginning with यथेववादिशब्दाः.

As Direct Comparison is obtained from the use of the words यथा, इव &c., (*so it is*), *likewise,* (*obtained*) *from the employment of* (*the affix*) वत् *in the sense of* इव, *according to* (*Pāṇini's Sūtra*) तत्र तस्येव. In the same manner, as Indirect Comparison is obtained from the use of the words तुल्य &c., (*so it is*), *likewise,* (*obtained*) *from the employment of* (*the affix*) वत् in the sense of तुल्य, *according to* (*Pāṇini's Sūtra*) तेन तुल्यं क्रिया &c.

'But,' says an objector, 'the three-fold division of Direct Comparion is still improper; for, in a Complete Direct Comparison, a compound is possible only between the उपमान and the word of comparison (as in the sentence चन्द्र इव सुन्दरं मुखम्, such sentences as चन्द्र इव सुन्दरमुखम्, सुन्दरचन्द्र इव मुखम्, चन्द्र इवसुन्दरं मुखम् are ungrammatical, the sense to be expressed by them being : 'The face is as beautiful as the moon.').

Now, a compound with such a word of comparison as यथा, is not observed to occur, since यथा[1] is compounded with another word, only when it is not used in the sense of Comparison (as in यथाविधि &c.,), so that a complete Direct Comparison is impossible in a compound. To this objection, we reply that a compound of इव and a word expressive of the उपमान is possible *according to* (*Kātyāyana's Vārtika, which says* :—)

1. यथाऽसादृश्ये । Páṇini (II. 1. 7.).

a compound (of a case-inflected word) with इव *is* नित्य. The only peculiarities of this compound are that *the case is not dropped and the original accent of the former word is retained.* In जीमूतस्येव, for instance, the genitive case is retained in violation of the general rule that words lose their cases when they are compounded with each other; and the original accent (*i. e.* the उदात्त accent) of the word जीमूत, which is on मू is not changed, in spite of the rule which says that only the last letter of a compound word is उदात्त ; (thus मू does not, here, lose its accent, and व the last letter of the compound does not, here, become उदात्त).

A compound with इव is then authorized by grammar, and it is only the ignorant, who, seeing that the cases of words are not dropped, regard the words as separate. Thus, *(Complete Direct Comparison) occurs in a compound, when* इव *is compounded (with the word expressing the* उपमान *), the compound being (regarded as)* नित्य.

Upon this, Udyota remarks that the insertion of the word नित्य before समास is wrong, since in Grammar, compounds are generally regarded as optional, and since the word नित्य is not found in the reading of the Vārtika at present available.

Examples (of these follow) *in order* :—

I. COMPLETE COMPARISON (पूर्णा)

A. Direct (श्रौती); (*a*) Occurring in a sentence (वाक्यगा) is instanced in स्वप्नेऽपि etc. (in verse 1.)

Here, विजयश्रीः is intended to be the उपमेय, स्वाधीनपतिका the उपमान, न मुंचति the common property, and यथा the word of comparison. No two of these four words are here compounded with each other , therefore, it is Comparison occurring in a sentence.

B. Indirect (आर्थी); (*a*) Occurring in a sentence (वाक्यगा) is instanced in चकितहरिण etc. (in verse 2).

Here, आनन is the उपमेय, सरसिज the उपमान, and अरुणसदृशकांतिमत्त्व the साधारणधर्म. Comparison is Indirect here, on account of the employment of (such a word of comparison as) सम.

A. Direct (श्रौती); (*b*) Occurring in a compound (समासगा) is instanced in अत्यायतैः etc. (in verse 3).

Here, उपाय is the उपमेय, भुज the उपमान, and अत्यायतत्वादि the साधारणधर्म. भुज being compounded with such a word of comparison as इव, Comparison is here Direct and occurs in a compound.

B. Indirect (आर्थी) ; (*b*) Occurring in a compound (समासगा) is instanced in (अवितथ) etc. (in verse 4).

Here, भवान् is the उपमेय, सुरतरु the उपमान, & अभिलषणीयत्व the साधारणधर्म. सुरतरु being compounded with such a word of comparison as सदृश, Comparison is here Indirect and occurs in a compound.

A. Direct and B. Indirect; (*c*) Occurring in a nominal affix is instanced in गाम्भीर्य etc. (in verse 5).

In the first half, तस्य is the उपमेय, गंगाभुजंग the उपमान, and गाम्भीर्यगरिमा the साधारणधर्म. In the second half, सः is the उपमेय, निदाघांबरत्व the उपमान, and दुरालोकत्व the साधारणधर्म. Here in the first half, we have Direct Comparison; for, the nominal affix वत् is used with गंगाभुजंग, in the sense of इव; and in the second half, we have Indirect Comparison, for, वत् is used with निदाघाम्बररत्न, in the sense of तुल्य.

An objector says :—You said before (*i. e.* in the sixth Ullāsa), that the varieties of a चित्रकाव्य will be determined at the time of the determination of 'figures'; and now you cite such a verse as स्वप्नेऽपि as an example of a चित्रकाव्य, which, however, it does not deserve to be. For, *the verse* स्वप्नेऽपि *possesses no strikingness, unless we apprehend from it a*

suggested sense in the form:—'Just as a woman whose husband is under her thumb, is an object of extraordinary beauty when attending on her husband, so is the Goddess of victory while serving you'. Now strikingness is (what constitutes) a figure. The presence of the suggested sense is, therefore, necessary to make the verse striking and thus to make it contain a figure. Now, if this suggested sense is prominent, the verse will be a ध्वनिकाव्य ; if it is subordinate, the verse will be a गुणीभूतव्यंग्यकाव्य, but it will, by no means, be a चित्रकाव्य. Thus, the former declaration about the determination of the varieties of a चित्रकाव्य is inconsistent with the present citing of स्वप्नेऽपि as an example of Comparison.

'Do not say so,' we reply. "For, although a suggested sense is present, *still the verse* स्वप्नेऽपि *cannot be called a* ध्वनिकाव्य *or a* गुणीभूतव्यंग्यकाव्य.*' The pleasure, that is experienced from the verse* स्वप्नेऽपि &c., *is due not to the apprehension of the suggested sense which is connected (with the verse), but to the apprehension of the strikingness of its expressed sense, itself.* Now, a figure is (nothing but) strikingness, or what makes the verse charming. The suggested sense whose presence is generally unavoidable in a verse, is, no doubt, present in this verse also, but it is unprominent here, in that it is apprehended not instantly, but after the beauty of the figure is perceived. Consequently, the presence of this suggested sense cannot make the verse a ध्वनिकाव्य or a गुणीभूतव्यंग्यकाव्य.'

'But', continues the objector, 'the verse स्वप्नेऽपि cannot still be called a चित्रकाव्य, owing to the presence in it of a suggested sense, in the form of a flavour (namely, the sentiment of the admiration of the poet for the king). Besides, this verse deserves to be an example of the figure named संकर, owing to another figure (*i. e.* Alliteration) being present in it (*i. e.* in प्रभावप्रभवम), and not of pure Comparison.'

We reply:—*The suggested sense in the form of a flavour (or a sentiment भाव) and another figure are invariably present in every verse.* But, at present, we are not concerned with them; *hence we have left them out of account and simply exemplified figures*, our business being with these only. Thus the verse स्वप्नेऽपि has been here cited simply as an example of Comparison, our object being to show what Comparison is. Whether the verse in question is a चित्रकाव्य or not, is beside our point. In the sixth Ullāsa[1] also, what was said was that the varieties of a चित्रकाव्य will be 'determined' *i. e.* treated, not 'exemplified' in the tenth Ullāsa. Really speaking,[2] however, the verse स्वप्नेऽपि is a चित्रकाव्य, since Comparison is prominently apprehended from it. So it is an example of a pure Comparison and not of संकर; for, the Alliterative excellence that the words प्रभावप्रभवं कान्तम् possess, is not here intended by the poet, nor does it contribute to the beauty of the Comparison.

'But', continues the objector, 'why do you not select such a sentence as चन्द्रधवल: पट: for your example of comparison. This sentence has this advantage over the verse स्वप्नेऽपि &c., that neither a flavour nor another figure is present in it.'

We reply :—*If we avail ourselves of such sentences* as the above for (*our*) *examples* (*of figures*), then inasmuch *as* these sentences *are devoid* (*of a flavour or another figure*) *they would be insipid* and would attract no readers.

Besides, such a sentence as the above does not constitute a poem, and as such will not contain any figure (*e. g.* Comparison here). For, the necessary condition of a poem is that it should contain a flavour or a sentiment, and the necessary condition of a figure is that it should contribute to the manifestation of that flavour or sentiment.

---

1. (षष्ठोल्लासे) 'निर्णेष्यन्ते' इत्युक्तम्, न तु 'उपाहरिष्यन्ते' इति। Maheśa.
2. वस्तुतस्तूपमाप्राधान्यादस्यैव चित्रत्वमिति ज्ञेयम्। प्रभा.

The fault of उत्प्रेक्षा called 'Inability' is nothing but Inexpressiveness (अवाचकत्व) of a word. *In* उत्प्रेक्षा *also*, such *words* as ध्रुव, इव *etc. alone are able to bring out (the sense of) probability and not the word* यथा *also which singly,*[2] i. e. not accompanied by such a word as प्राय: *etc., is able to point out mere resemblance. Now that (resemblance) is not here intended. Thus, the inability of this (word,* i. e. यथा) *to bring out that (sense.* i. e. the sense of probability) *constitutes the fault of Inexpressiveness.*

अशक्ति is instanced in उदयौ etc. verse 198. Here, the faulty word is यथा ; we should therefore read ध्रुवं[3] for यथा.

The fault of अर्थान्तरन्यास called 'Objectlessness' is nothing but Improper Signification.

The adducing of another proposition to corroborate the statement *of a thing which, although imagined as probable, is yet void of real nature, and is, therefore, like any (other) un-*

---

1. अस्य च साधर्म्यस्य उपमानमुपमेयं च द्वावप्यनुयोगिनौ । Cha.
2. केवलस्येति । प्राय:पदाद्यसमभिव्याहृतस्येत्यर्थः । प्रभा.
3. 'नारीलोचनचातुर्यशंकासंकुचितं ध्रुवम्' इति युक्तः पाठः । प्रभा.

real thing such as the horn of a hare, *is extremely improper like the drawing of pictures in the sky. Thus, the fault 'Objectlessness' of this* अर्थान्तरन्यास corroborating the statement of a matter which is the subject of उत्प्रेक्षा *is nothing but Improper Signification.*

निर्विषयत्व is instanced in दिवाकराद्रक्षति etc. verse 199. *Here 'fear from the Sun' on the part of 'darkness' which is* an *inanimate* object *is itself impossible. Whence then* the possibility of '*protection*' *by* '*the* Himālaya *Mountain,*' *due to this* fear on the part of 'darkness'?

Thus, *this* (*fact*), i. e. 'the Mountain's protecting darkness' *being apprehended* here *as possessed of an unreal character, there is no* (*question of*) *improbability about it. Hence an attempt to corroborate this fact*, i. e. to show that it is probable, *is altogether useless.* For,[1] corroboration has for its object the removal of an improbability. But, here the fact being unreal and of an indefinable nature the question whether it is probable or otherwise is quite irrelevant. It is only those facts which are real and whose natures are ascertained, which deserve corroboration, i. e. which must be shown to be probable. Thus, the corroboration of an unreal fact is faulty. It is faulty only when the fact is unreal and indefinable naturally. It is not faulty, however, when the fact, although unreal and indefinable naturally, is yet imagined by the poet as possessed of a real and definite nature; as in सुसितवसना etc. (*Vide* example of अर्थान्तरन्यास). verse 88.

A समासोक्ति, *in virtue of attributes common* to the उपमान and the उपमेय, *intimates*, i. e. causes the apprehension of, *the*

---

1. अनुपपत्तिनिवारणार्थं हि अर्थान्तरमुपन्यस्यते। न चात्रानुपपत्तिः। अनवधारितस्वरूपत्वादस्य। निश्चितस्वरूपस्यैव हि उपपादनमुचितम्। यत्र तु अतात्त्विकमपि कविप्रौढोक्त्या निश्चितस्वरूपं तत्र 'सुसितवसनालंकारायाम्' इत्यादौ अतात्त्विकस्यापि समर्थनं न दोषायेति बोध्यम्। Viv.

particular उपमान intended in the verse, *although it is not there stated* in actual words. *Hence inasmuch as* that उपमान is already apprehended, *there is here no motive for again stating it.* Thus, (*this*) *purposelessness of* (*the statement of*) *the* उपमान *is* a fault; but it is nothing but either *Superfluity* (अपुष्टार्थत्व) *or Tautology* (पुनरुक्तत्व); as in स्पृशति etc. verse 200. *Here, just as in virtue* of the common *attributes* स्त्रीस्पर्शकारित्व, *and the use of* the *particular gender* of the nouns तिग्मरुचि and ककुभ्, *the Sun is intimated to be the hero, and the 'directions' to be the 'heroines;' so* for the same reasons, i. e. in virtue of the common attribute अतनुमानपरिग्रहया and the feminine gender of the noun दिनश्री, *'the beauty of the autumnal day' will also be intimated to be the rival heroine. This being* the *case, what necessity is there of* stating the उपमान 'दयिता' by *the use of the word* दयिता *which is expressive of itself?* Thus, the word दयितया is either Superfluous (according to मम्मट), or Tautologous (according to others), because its sense is obtained by Implication from the other words of the verse.

If it be said: If the statement of the उपमान is open to the fault of superfluity, then श्लेषोपमा would be without a province; for, in it the presence of the उपमान is necessary as enabling it to become striking.

We reply:—No. For, *that is the province of* श्लेषोपमा *where even though common* (*or paronomastic*) *attributes are present* समासोक्ति, *unless the* उपमान *is stated, is not apprehended as* (clearly as in the verse स्पृशति etc. where it is clearly apprehended even though the उपमान may not be stated).

What is meant is this:—Where even though the उपमान is expressed by a word expressive of itself, समासोक्ति does not vanish, there inasmuch as समासोक्ति is necessarily apprehended independently of the उपमान, समासोक्ति itself serves the purpose of intimating the उपमान. Thus, the employment of a word to express the उपमान is there useless; as in स्पृशति etc.

But, where समासोक्ति vanishes when the उपमान is expressed, and where the उपमान is not apprehended when it is not expressed, all the attributes mentioned in the verse being connected with the उपमेय only, there the उपमान should be expressed; as in स्वयं च etc. verse 201. Here, the उपमान, i. e. 'Morning twilight,' cannot be clearly apprehended unless it is expressed by the word प्रभातसंध्या.

In अप्रस्तुतप्रशंसा *also*, uselessness of the statement of the matter in hand is the fault called 'Superfluity.'

There also, *the matter in hand, being apprehended in this very manner*,[1] i. e. from paronomastic or common attributes *should not be vitiated* by the fault of Superfluity *by again being expressed* by a word; as in आहूतेषु etc. verse 202. *Here*, the matter in hand. *i. e. a 'thoughtless king' can be intimated by (the description of) the Universal of the particular kind*, i. e. the 'Non-recognition of the difference of things,' *which is not the matter in hand. Thus, the expression of it again* by a word *is improper* and constitutes the fault of either Superfluity or Tautology.

Thus, these faults belonging to figures, and other possible faults also, similar to these, do not deserve to be separately treated, because they are included under the class of those very figures which have been treated already, i. e. in the Seventh Ullāsa.

---

1. अनयैवेति । श्लिष्टसाधारणादिविशेषणसामर्थ्येनेत्यर्थः । प्रभा.

KĀVYAPRAKĀS'A

APPENDIX

1 अत्युक्ति.

अत्युक्तिरद्भुतातथ्यशौर्यौदार्यादिवर्णनम् ।

त्वयि दातरि राजेंद्र याचकाः कल्पशाखिनः ॥ Ku. 163.

अद्भुतं आश्चर्यभूतम् । अतथ्यं मिथ्याभूतम् । A.

The word वस्तु in Mammaṭa's definition of उदात्त includes in its meaning, courage, generosity etc. also as wealth. Thus, अत्युक्ति is nothing but उदात्त. (*Vide* Udyota on उदात्तालंकार.)

2 अधिक.

यत्रान्योन्यविरुद्धं विरुद्धबलवत्क्रियाप्रसिद्धं वा ।

वस्तुद्वयमेकस्माज्जायत इति तद्भवेदधिकम् ॥ Ru.

विरुद्धाभ्यां बलवतीभ्यां क्रियाभ्यां प्रसिद्धम् । Na.

Ex. मुंचति वारि पयोदो ज्वलन्तमनलं च यत्तदाश्चर्यम् ।

उदपद्यत नीरनिधेर्विषममृतं चेति तच्चित्रम् ।

This may be included under विषम as defined by Pradīpa.

3 अधिकाररूढवैशिष्ट्यरूपक.

अधिकाररूढवैशिष्ट्यं रूपकं यत्तदेव तत् । S. D.

Ex. इदं वक्त्रं साक्षाद्विरहितकलंकः शशधरः

सुधाधाराधारश्चिरपरिणतं बिम्बमधरः ।

इमे नेत्रे रात्रिन्दिवमधिकशोभे कुवलये

तनुर्लावण्यानां जलधिरवगाहे सुखतरः ॥

This is रूपक.

4 अनुकूल.

अनुकूलं प्रातिकूल्यमनुकूलानुबन्धि चेत् । S. D.

Ex. कुपितासि यदा तन्वि निधाय करजक्षतम् ।

बधान भुजपाशाभ्यां कण्ठमस्य दृढं तदा ॥

This is a kind of व्याघात (*Vide* Udyota pp. 112–3.)

5 अनुगुण.

प्राक्सिद्धस्वगुणोत्कर्षोऽनुगुणः परसन्निधेः ।

नीलोत्पलानि दधते कटाक्षैरतिनीलताम् ॥ Ku. 145.

तद्गुण occurs also when the quality possessed by an object is brought into prominent relief by proximity with another object. Thus अनुगुण is not a distinct figure. (*Vide* Udyota on तद्गुणालंकार.)

6 अनुपलब्धि.

प्रमाणत्वेन निर्दिष्टाऽनुपलब्धिरलंक्रिया ।

अयशस्तव नास्तीति सत्यं, यन्न श्रुतं क्वचित् ॥ A.

The mere knowledge derived from this kind of evidence is not striking and does not minister to the expressed or suggested sense of the verse. Thus, this is no figure. (*Vide* Udyota अन्येषां तु नालंकारत्वम् । तत्तत्प्रमाणजन्यप्रमितिविषयत्वकृतचमत्काराभावात्—on व्याघातालंकार.)

7 अनुज्ञा.

दोषस्याभ्यर्थनाऽनुज्ञा तत्रैव गुणदर्शनात् ।

विपदः संतु नः शश्वद्यासु संकीर्त्यते हरिः ॥ Ku. 137.

The three divisions of विशेष mentioned by मम्मट are not exhaustive. Hence विशेष occurs also when a man desires a bad thing by seeing some good in it. Thus, अनुज्ञा is not a distinct figure. (*Vide* Udyota on विशेषालंकार.)

8 (a) अर्थापत्ति.

Ex. तवाग्रे यदि दारिद्र्यं स्थितं भूप द्विजन्मनाम् ।

शनैः सवितुरप्यग्रे तमःस्थास्यत्यसंशयम् ॥ (R. G. p. 487.)

केनचिदर्थेन तुल्यन्यायत्वादर्थान्तरस्यापत्तिरर्थापत्तिः ॥ R. G. p. 485.

When the establishment of one fact implies the establishment of another fact, the reason for the establishment of both being the same, it is अर्थापत्ति. According to Udyota, however, अर्थापत्ति is included under the third kind of अतिशयोक्ति or अनुमान. Thus, in the verse स जितः त्वन्मुखेनेन्दुः का वार्ता सरसी-

रूहाम्; there is अनुमान. In तवाग्रे etc., there is the third kind of अतिशयोक्ति.

8 (b) अर्थापत्ति (as a kind of evidence)

कल्पनं चान्यथाऽसिद्ध्याऽर्थस्यार्थापत्तिरिष्यते ।

गंगा पतिव्रता साक्षादन्यथाऽग्निं विशेत्कथम् ॥

पतिव्रता स्त्री साक्षाद्गंगैव । अन्यथाऽग्निं कथं विशेत् । गंगात्वे तु वह्निप्रवेशो न दुर्घटः । A.

अत्र पतिव्रतायाः गंगात्वाभावे वह्निप्रवेशरूपार्थस्यासिद्ध्या गंगात्वरूपार्थस्य कल्पनम् ।

This is nothing but अनुमान.

9 अल्प.

अल्पं तु सूक्ष्मादाधेयाद्यदाधारस्य सूक्ष्मता ।

मणिमालोर्मिका तेऽद्य करे जपवटायते ॥ Ku. 97.

मणिपंक्तिरूपा ऊर्मिका अंगुलीयकं ते करे अद्य विरहावस्थायां जपमालायते इत्यर्थः । Ch. विरहिणीं प्रति कस्यचिदुक्तिः ।

The word महत् in the definition of अधिक means simple 'excellence' also. Thus अल्प where there is an excellence of thinness is not distinct from अधिक. (*Vide* Udyota on अधिकालंकार.)

10 अवसर.

अर्थान्तरमुत्कृष्टं सरसं यदि वोपलक्षणं क्रियते ।

अर्थस्य तदभिधानप्रसंगतो यत्र सोऽवसरः॥ Ru. उपलक्षणं अप्रधानम् ।

Ex. सा सिप्रा नाम नदी यस्यां मंक्षूर्मयो विशीर्यन्ते ।

मज्जन्मालवललनाकुचकुम्भास्फालनव्यसनात् ॥

This is included under the second kind of उदात्त.

11 अवज्ञा.

ताभ्यां तौ यदि न स्यातामवज्ञालंकृतिस्तु सा ।

स्वल्पमेवांबु लभते प्रस्थं प्राप्यापि सागरम् ।

मीलन्ति यदि पद्मानि का हानिरमृतद्युतेः ॥ Ku. 136.

ताभ्यां गुणदोषाभ्याम् । तौ गुणदोषौ । प्रस्थं प्रस्थपरिमितजलपात्रम् । स्वल्पमित्यत्र सागरस्य महत्त्वगुणेन प्रस्थस्याधिकजलालाभगुणाभावो वर्णितः । मीलन्तीत्यत्र पद्मनिमीलनदोषेण चंद्रस्य हानिरूपदोषाभावो वर्णितः । A.

This is included under विषम or, sometimes, under अतद्गुण or, what is still better, under विशेषोक्ति. (*Vide* Udyota on विषमालंकार.)

12 असम.

सर्वथैवोपमाननिषेधः असमाख्योऽलंकारः । R. G. p. 210.

Ex. भुवनत्रितयेऽपि मानवैः परिपूर्णे विबुधैश्च दानवैः ।
न भविष्यति नास्ति नाभवन्नृप यस्ते भजते तुलापदम् ॥ R. G. p. 211.

What is striking in the examples of असम is the statement that the figure उपमा is absent. Thus असम is no figure. (*Vide* Udyota on अनन्वयालंकार.)

13 असंभव.

असंभवोऽर्थनिष्पत्तेरसंभाव्यत्ववर्णनम् ।
को वेद गोपशिशुकः शैलमुत्पाटयेदिति ॥ Ku. 84.

शैलं गोवर्धनम् । उत्पाटयेत् उद्धरेत् ।

This is nothing but विरोध; for the statement of an impossibility only ministers to विरोध. (*Vide* Udyota on विरोधालङ्कार.)

14 अहेतु.

बलवति विकारहेतौ सत्यपि नैवोपगच्छति विकारम् ।
यस्मिन्नर्थः स्थैर्यान्मन्तव्योऽसावहेतुरिति ॥ Ru.

Ex. रूक्षेऽपि पेशलेन प्रखलेऽप्यखलेन भूषिता भवता ।
वसुधेयं वसुधाधिप मधुरगिरा परुषवचनेऽपि ॥

रूक्षे रूक्षविषये । एवमुत्तरत्र । अत्र रूक्षादिके बलवति विकारकारणे सत्यपि राजा महासत्त्वाद्रूक्षत्वादिविकारं अपेशलत्वादिकं नायाति । Na.

This is विशेषोक्ति.

15 (a) आक्षेप.

उपमानाक्षेपश्चाक्षेपः । Vā.

Ex. तस्याश्चेन्मुखमस्ति सौम्य सुभगं किं पार्वणेनेन्दुना ।

This is nothing but प्रतीप.

15 (b) आक्षेप.

अनिष्टस्य तथार्थस्य विध्याभासः परो मतः । S. D.

Ex. गच्छ गच्छसि चेत् कान्त पन्थानः सन्तु ते शिवाः ।
ममापि जन्म तत्रैव भूयाद्यत्र गतो भवान् ॥

A pretended affirmation like a pretended denial may also be regarded as आक्षेप.

16 आचार.

प्रकृतार्थोपयोगित्वं यत्राचारस्य तत्र सः ।
गोपस्यापि दधि ग्राह्यं काश्यां भक्षंति सूरयः ॥ A.

Vide Remark on अनुपलब्धि.

17 आत्मतुष्टि.

आत्मतुष्टिरलंकारो यत्र स्यान्निर्णयस्तथा ।
अष्टमे मासि सीमंतो युक्तो मह्यं हि रोचते । A.

Vide Remark on अनुपलब्धि.

18 आवृत्तिदीपक.

त्रिविध दीपकावृत्तौ भवेदावृत्तिदीपकम् । वर्षत्यंबुदमालेयं वर्षत्येषा च शर्वरी ॥ उन्मीलन्ति कदंबानि स्फुटन्ति कुटजोद्गमाः । माद्यन्ति चातकास्तृप्ता माद्यन्ति च शिखावलाः ॥ Ku. 49-50. पदस्यार्थस्य उभयोर्वा आवृत्तौ त्रिविधं दीपकम् । शर्वरी वर्षति वर्षमिवाचरति । उन्मीलन्ति विकसन्ति । कुटजोद्गमाः कुटजकलिकाः स्फुटंति विकसंति । शिखावलाः मयूराः ।

In the first line, the word वर्षति is repeated. In the second the sense विकास is repeated. In the third, both the word माद्यन्ति and its sense are repeated.

This does not deserve to be दीपक in the first place. For, the common property is not mentioned only once. Besides, it does not reside in both the प्रकृत and the अप्रकृत. The followers

of Mammaṭa include these examples under वाचकलुप्तोपमा itself. (*Vide* Udyota on दीपकालङ्कार.)

19 आशीः.

आशीर्नामाभिलषिते वस्तुन्याशंसनं यथा ।
पातु वः परमं ज्योतिरवाङ्मनसगोचरम् ॥ Dan.

This does not deserve to be a figure inasmuch as no strikingness is apprehended from it.

20 उदाहरण.

सामान्येन निरूपितस्यार्थस्य सुखप्रतिपत्तये तदेकदेशं निरूप्य तयोरवयवावयविभाव उच्यमान उदाहरणम् ॥ R. G. p. 213.

Ex. उपकारमेव कुरुते विपद्गतः सद्गुणो नितराम् ।
मूर्छां गतो मृतो वा निदर्शनं पारदोऽत्र रसः ॥ R. G. p. 214.

The word निदर्शन in the example उपकारमेव etc. conveys the sense of corroboration. Thus, this is nothing but अर्थान्तरन्यास. (*Vide* Udyota on अर्थान्तरन्यासालंकार.)

21 उन्मीलित

भेदवैशिष्ट्ययोः स्फूर्तावुन्मीलितविशेषकौ । हिमाद्रिं त्वद्यशोमग्नं सुराः शीतेन जानते । लक्षितान्युदिते चन्द्रे पद्मानि च मुखानि च ॥ Ku. 148 वैशिष्ट्यं वैजात्यम् । मीलितरीत्या भेदस्याज्ञाने प्राप्ते तत्र केनापि कारणेन भेदज्ञाने उन्मीलितालंकारः । तथा सामान्यतद्गुणालंकाररीत्या विशेषस्याज्ञाने प्राप्ते तत्र केनापि कारणेन विशेषज्ञाने विशेषकालङ्कारः ।

Although in हिमाद्रि etc. the Mountain Himālaya is recognised by means of cold, still, its presence cannot be inferred from the marks 'whiteness etc.,' since these marks are common to 'fame' also. The subsequent fact of the recognition of the Himālaya only confirms the antecedent fact of its concealment by 'fame.' Thus उन्मीलित is not distinct from मीलित. (*Vide* Udyota on मीलितालङ्कार.)

So also विशेषक is not distinct from सामान्य. For, the antecedent apprehension of resemblance cannot be sublated

by the subsequent apprehension of difference. (*Vide* Udyota on सामान्यालङ्कार–अग्रेतनविशेषदर्शनजन्यभेदज्ञानमुत्तरकालिकं न पूर्वोत्पन्नतद्ग्रहं निरसितुमुत्सहते । उत्पन्नत्वात्तस्येत्यर्थः ।)

22 उपमान.

सादृश्याद्वस्तुनो भानमुपमानं प्रकीर्तितम् । A.

Ex. तां रोहिणीं विजानीहि ज्योतिषामत्र मंडले ।
यस्तन्वि तारकान्यासः शकटाकारमाश्रितः ॥ Ku.

The उपमान which is striking comes under उपमा. (*Vide* Udyota on व्याघातालङ्कार.)

23 उभयन्यास.

सामान्यावप्यर्थौ स्फुटमुपमायाः स्वरूपतोऽपेतौ ।
निर्दिश्येते यस्मिन्नुभयन्यासः स विज्ञेयः ॥ Ru.

Ex. सकलजगत्साधारणविभवा भुवि साधवोऽधुना विरलाः ।
सन्ति कियन्तस्तरवः सुस्वादुसुगन्धिचारुफलाः ॥

यत्र सदृशौ द्वावर्थौ उपमास्वरूपतः व्यपेतौ तुल्यकक्षतया निर्दिश्येते तत्रोभयन्यासोऽलङ्कारः । उपमायां हि सामान्यस्येवादेश्च प्रयोगः । इह तु नैवेत्यर्थः । उदाहरणे उपमेयभूतसाधूनां उपमानभूततरूणां विद्यमानेनाप्युपमानोपमेयभावेन न निर्देशः । किं तु तुल्यकक्षतयैव ।

This is nothing but प्रतिवस्तूपमा.

24 उल्लास.

एकस्य गुणदोषाभ्यामुल्लासोऽन्यस्यतौ यदि । (1) अपि मां पावयेत्साध्वी स्नात्वेतीच्छति जाह्नवी ॥ (2) काठिन्यं कुचयोः स्रष्टुं वांछंत्यः पादपद्मयोः । निंदंति च विधातारं त्वद्धाटीष्वरियोषितः ॥ (3) तद्भाग्यं धनस्यैव यन्नाश्रयति सज्जनम् । (4) लाभोऽयमेव भूपाल सेवकानां न चेद्वधः ॥ यत्र कस्यचिद्गुणेनान्यस्य गुणो दोषेण दोषो गुणेन दोषो दोषेण गुणो वा वर्ण्यते स उल्लासः । Ku. 133–35 अपि मामित्यत्र साध्व्याः पवित्रतागुणेन जाह्नव्याः स गुणो वर्णितः । काठिन्यमित्यादिः राजानं प्रत्युक्तिः । त्वद्धाटीषु तव युद्धयात्रासु कुचयोः काठिन्यं पादपद्मयोः स्रष्टुं वांछंत्यः अरियोषितः शत्रुस्त्रियः विधातारं निंदन्ति । पतिमरणे कुचकाठिन्यस्य व्यर्थत्वात्

पलायने च पादयोः काठिन्यस्यावश्यकत्वात् । अत्र कुचकाठिन्यस्यार्थत्वदोषेण विधातुर्निंदादोषो वर्णितः । तद्भाग्यमित्यत्र सज्जनस्य सेव्यत्वगुणेन धनस्याभाग्यत्वदोषो वर्णितः । लाभोऽयमित्यत्र राज्ञः क्रौर्यदोषेण तत्सेवकानां वधाभावो गुणत्वेन वर्णितः ।

The varieties (1) and (2) come under **काव्यलिंग** or **सम**.

The varieties (3) and (4) come under **विषम**. (*Vide* Udyota on **विषमालङ्कार**.)

25 **उल्लेख.**

बहुभिर्बहुधोल्लेखादेकस्योल्लेख इष्यते ।
स्त्रीभिः कामोऽर्थिभिः स्वर्द्रुः कालः शत्रुभिरैक्षि सः ॥ Ku. 22.
एकेन बहुधोल्लेखेऽप्यसौ विषयभेदतः ।
गुरुर्वचस्यर्जुनोऽयं कीर्तौ भीष्मः शरासने ॥ Ku. 23.

The words **प्रस्तुतस्य यदन्यत्वम** occurring in the definition of the second kind of **अतिशयोक्ति** may be interpreted in the following manner also :—' When a subject under discourse is ascertained as identical with (*i. e.* is looked upon as) another thing (that is also Hyperbole).' According to this interpretation of the definition, **उल्लेख** comes under the second kind of **अतिशयोक्ति**. (*Vide* Udyota on **अतिशयोक्त्यलङ्कार**.)

26 **ऊर्जस्विन्.**

आभासस्यांगता यत्र तत्रोर्जस्वि मतं बुधैः । परदारस्तनस्पर्शी दिशः पश्यति कंपितः ॥ अत्र शृंगाराभासो भयानकरसस्यांगम् । A.

This is nothing but **गुणीभूतव्यंग्यकाव्य**. (*Vide* K. P. IV.)

27 **ऐतिह्य.**

ऐतिह्यं किंवदंती चेत्प्रमाणत्वेन भण्यते । तिलमात्रमिदं लिंगं वर्षंवर्षं विदुर्जनाः ॥ किंवदंती जनश्रुतिः । A. इदं लिंगं प्रतिवर्षं तिलमात्रं वर्धते इति जनाः कथयंतीत्यर्थः ।

Vide Remark on **अनुपलब्धि**.

28 **क्रम.**

उपमेयोपमानानां क्रमसंबंधः क्रमः । Vā.

Ex. तस्याः प्रवृद्धलीलाभिरालापस्मितदृष्टिभिः ।

जीयन्ते वल्लकीकुन्दकुसुमेन्दीवरस्रजः ॥

This is nothing but यथासंख्य.

29 गूढोक्ति.

गूढोक्तिरन्योद्देश्यं चेद्यदन्यं प्रति कथ्यते ।
वृषापेहि परक्षेत्रादायाति क्षेत्ररक्षकः ॥ Ku. 154.

अन्यं प्रति वक्तव्यं अन्यं प्रति यद्युच्यते तर्हि गूढोक्तिरलंकारः । हे वृष वृषो बलीवर्दः कामुकश्च । परक्षेत्रात् परकेदारात् अन्यदारेभ्यश्च । अपेहि दूरं गच्छ । अत्र परदारासक्तकामुकं प्रति वक्तव्यं तत् परक्षेत्रप्रविष्टं वृषभमुद्दिश्योक्तम् । A.

गूढोक्ति comes under ध्वनि or गुणीभूतव्यंग्य. It does not deserve to be a figure, because it does not minister to either the expressed or the suggested sense of the verse, as व्याजोक्ति in शलेन्द्र etc. ministers to 'love of the devotee, for Śiva.' (*Vide* Udyota on व्याजोक्त्यलङ्कार.)

30 छेकोक्ति.

छेकोक्तिर्यदि लोकोक्तेः स्यादर्थांतरगर्भिता । भुजंग एव जानीते भुजंगचरणं सखे ॥ यत्र लोकप्रवादस्य भिन्नार्थयुक्तता स्यात्तत्र छेकोक्तिः । केनचित्कस्यचिद्वृत्तांतं पृष्टस्य समीपस्थमन्यं निर्दिश्यायमेव तस्य वृत्तांतं जानातीत्युक्तवतोऽयं ' अहेः पादानहिरेव जानाति ' इति लोकवादानुकारः । अत्र स चायं च लोकविदिते धनार्जनादिव्यापारे सहचारिणाविति विदितविषयतया लोकोक्त्यनुवादस्य प्रयोजने स्थिते रहस्येऽप्यनंगव्यापारे तस्यायं सहचर इति मर्मोद्घाटनप्रथितेन (जारार्थकश्लिष्टभुजंगशब्देन) गर्भीकृतम् । Ku. 158.

This also does not deserve to be a figure, because there is no ministering to the expressed or suggested sense of the verse here as in गूढोक्ति. (*Vide* Udyota on व्याजोक्त्यलङ्कार).

31 तिरस्कार.

दोषविशेषानुबंधाद्गुणत्वेन प्रसिद्धस्यापि द्वेषतिरस्कारः ॥ R. G. p. 510.

Ex. श्रियो मे मा सन्तु क्षणमपि च माद्यद्गजघटामदभ्राम्यद्भृंगावलिमधुरसंगीतसुभगाः । निमग्नानां यासु द्रविणरसपर्याकुलहृदां सपर्यासौकर्यं हरिचरणयोरस्तमयते ॥ R. G. p. 510.

द्रव्यमदांधतया ईश्वरसेवा न भविष्यतीत्यतः श्रीर्मास्त्वेवेति केनचित्प्रार्थ्यते। अत्र गुणत्वेन प्रसिद्धाया अपि श्रियः ईश्वरसेवाऽभावरूपदोषसंबंधेन द्वेषः ।

विशेष may also occur when a man hates a good thing by seeing some fault in it. Thus तिरस्कार is not a distinct figure.

32 (a) तुल्ययोगिता.

हिताहिते वृत्तितौल्यमपरा तुल्ययोगिता । प्रदीयते पराभूतिर्मित्रशात्रवयोस्त्वया ॥ Ku. 46. पराभूतिः पराभवः उत्कृष्टसमृद्धिश्च । A.

Here, inasmuch as one and the same common property, i. e. the words प्रदीयते पराभूतिः, or the senses of these words identified through Paronomasia, is connected with मित्र and शात्रव, this is not distinct from the तुल्ययोगिता mentioned by Mammaṭa. (*Vide* Udyota on तुल्ययोगितालङ्कार.)

32 (b) तुल्ययोगिता.

गुणोत्कृष्टैः समीकृत्य वचोऽन्या तुल्ययोगिता ।
लोकपालो यमः पाशी श्रीदः शक्रो भवानपि ॥ Ku. 47.

This is nothing but दीपक. (*Vide* Udyota on तुल्ययोगितालंकार.)

33 दृष्टान्त.

अन्वयख्यापनं यत्र क्रियया स्वतदर्थयोः ।
तं दृष्टान्तमिति प्राहुरलङ्कारं मनीषिणः ॥ Vāg.
Ex. पतितानां संसर्गं त्यजन्ति दूरेण निर्मला गुणिनः ।
इति कथयन् जरतीनां हारः परिहरति कुचयुगलम् ॥

This is nothing but the second kind of निदर्शना.

34 निरुक्ति.

निरुक्तिर्योगतो नाम्नामन्यार्थत्वप्रकल्पनम् । ईदृशैश्चरितैर्जाने सत्यं दोषाकरो भवान् ॥ Ku. 164. नाम्नां योगतः व्युत्पत्त्या अन्यार्थकल्पनं निरुक्तिरलङ्कारः । ईदृशैरिति चंद्रं प्रति विरहिण्या उक्तिः । दोषाकरः दोषाया रात्रेः कर्ता दोषाणामाकरश्च । Ch.

This is nothing but a particular kind of श्लेष. (*Vide* Udyota on व्याघातालंकार.)

35 निश्चय.

अन्यन्निषिध्य प्रकृतस्थापनं निश्चयः पुनः । S. D.

Ex. वदनमिदं न सरोजं नयने नेन्दीवरे एते । इह सविधे मुग्धदृशो मधुकर न मुधा परिभ्राम्य ॥

This does not deserve to be a figure, since no strikingness is apprehended from it.

36 परिकरांकुर.

साभिप्राये विशेष्ये तु भवेत्परिकरांकुरः । चतुर्णां पुरुषार्थानां दाता देवश्चतुर्भुजः ॥ अत्र चतुर्भुज इति विशेष्यं पुरुषार्थचतुष्टयदानसामर्थ्याभिप्रायगर्भम् । Ku. 63.

From the word विशेषण in Mammaṭa's definition of परिकर we may understand विशेष्य also. And उक्ति may mean description of a 'thing' in general, not of a 'subject' only. Thus परिकर may occur even when the विशेष्य is significant. This shows that परिकरांकुर is not a distinct figure. (*Vide* Udyota on परिकरालङ्कार.)

37 परिणाम.

परिणामः क्रियार्थश्चेद्विषयी विषयात्मना ।
प्रसन्नेन दृगब्जेन वीक्षते मदिरेक्षणा ॥ Ku. 21.
कमलं हि स्वयं द्रष्टुमशक्तं नेत्ररूपं भूत्वा पश्यतीति परिणामः । A.

परिणाम is defined as that which occurs when the object superimposed serves the purpose in hand, but only when fancied as identical with the subject of superimposition and not independently; exemplified in वदनेनेन्दुना etc. Here the Moon is identified with the 'face' and as such is subservient to the woman enabling her to remove the grief of separation.

In a Metaphor, the object superimposed has no such subserviency, and is thus distinct from this figure. Upon this, Udyota remarks that the apprehension of identity between the 'face' and the Moon does not add anything to

the excellence of the 'face' the object under description and therefore this does not deserve to be a figure. (*Vide* Udyota on रूपकालंकार.)

38 परिवृत्ति.

वस्तुनो व्यत्ययः परिवृत्तिः । S. K.

Ex. कुमुदवनपमश्रि श्रीमदम्भोजषण्डं
त्यजति मुदमुलूकः प्रीतिमांश्चक्रवाकः ।
उदयमहिमरश्मिर्याति शीतांशुरस्तं
हतविधिलसितानां हा विचित्रो विपाकः ॥

This is nothing but पर्याय.

39 पर्याय.

वस्तु विवक्षितवस्तुप्रतिपादनशक्तमसदृशं तस्य ।
यदजनकमजन्यं वा तत्कथनं यत् स पर्यायः ॥ Ru.

Ex. राजन् जहासि निद्रां रिपुबन्दीनिबिडनिगडशब्देन । तेनैव यदन्तरितः स कलकलो बन्दिवृन्दस्य ॥ विवक्षितं मनोगतम् । वाच्यवस्तुमनोगतवस्तुनोः न सादृश्यसंबंधः नापि कार्यकारणभाव इत्यर्थः । उदाहरणे वाच्यवस्तुनि निद्रामोक्षरूपे न तात्पर्यम् । किं तु तेन शत्रुविजयरूपं मनोगतं वस्तु प्रतिपाद्यते ।

This is a ध्वनि or गुणीभूतव्यंग्यकाव्य.

40 (a) पर्यायोक्त.

कार्यमुखेन कारणाभिधानं पर्यायोक्तम् । A. S.

Ex. नमस्तस्मै कृतौ येन मुधा राहुवधूकुचौ ।

Here, according to A. S., the fact in the shape of a cause, of Rāhu's head being cut by Viṣṇu, is expressed through the effect viz. the breasts of Rāhu's wife being rendered useless, since this fact which is to be suggested cannot be expressed otherwise. But this पर्यायोक्त is not different from that mentioned by Mammaṭa, because the definition of his पर्यायोक्त may be shown to apply to this example also in the following manner :—Here, Viṣṇu is suggested as one who cuts the

head of Rāhu and is expressed in a more striking manner as one who renders the breasts of Rāhu's wife useless. (*Vide* Udyota on **पर्यायोक्तालङ्कार**.)

40 (b) पर्यायोक्त.

पर्यायोक्तं तदप्याहुर्यद्व्याजेनेष्टसाधनम् । यामि चूतलतां द्रष्टुं युवाभ्यामास्यतामिह ॥ अत्र नायिकां नायकेन संगमय्य चूतलतादर्शनव्याजेन निर्गच्छंत्या तत्स्वाच्छंद्यसंपादनरूपेष्टसाधनम् । Ku. 69.

This is nothing but a **ध्वनिकाव्य**, (*Vide* Udyota on **पर्यायोक्तालङ्कार**.)

41 (a) पिहित.

यत्रातिप्रबलतया गुणः समानाधिकरणमसमानम् ।
अर्थान्तरं पिदध्यादाविर्भूतमपि तत्पिहितम् ॥

Ex. **प्रियतमविरहोगजनिता कृशता कथमिव तवेयमंगेषु ।**
लसदिन्दुकलाकोमलकान्तिकलापेषु लक्ष्येत ॥

This may be included under **मीलित**.

41 (b) पिहित.

पिहितं परवृत्तांतज्ञातुः साकूतचेष्टितम् । प्रिये गृहागते प्रातः कांता तल्पमकल्पयत् ॥ Ku. **परवृत्तांतज्ञातुः परवार्तामर्मज्ञस्य साकूतं साभिप्रायं मर्मज्ञानसूचकं चेष्टितं आचरणं पिहितालङ्कार इत्यर्थः । अकल्पयत् अरचयत् । सपत्नीगृहे जागरणेन श्रांतस्य विश्रांत्यर्थमिति भावः । ' त्वदाचरणं सर्वं मया ज्ञातम् ' इति तस्या अभिप्रायः ॥**

This is nothing but **सूक्ष्म**. (*Vide* Udyota on **सूक्ष्मालङ्कार**.)

42 पूर्व.

यत्रैकविधावर्थौ जायेते यौ तयोरपूर्वस्य ।
अभिधानं प्राग्भवतः सतोऽभिधीयेत तत्पूर्वम् ॥ Ru.

Ex. **काले जलदकुलाकुलदशदिशि पूर्वं वियोगिनीवदनम् । गलदविरलसलिलभरं पश्चादुपजायते गगनम् ॥ यत्र यौ एकविधावर्थौ जायेते तयोर्मध्ये अपूर्वस्य (सहजातस्य पश्चाज्जातस्य वा) प्राग्भवतः प्राग्जातस्य सतः (अयं प्राग्जातः एवंरूपेण) अभिधानं तत्र पूर्वालंकारः ।**

This is nothing but the fourth kind of **अतिशयोक्ति**.

43 (a) पूर्वरूप.

पुनः स्वगुणसंप्राप्तिः पूर्वरूपमुदाहृतम् ।
हरकंठांशुलिप्तोऽपि शेषस्त्वद्यशसा सितः ॥ Ku. 142.

This is nothing but तद्गुण. (*Vide* Udyota on तद्गुणालङ्कार.)

43 (b) पूर्वरूप.

पूर्वावस्थानुवृत्तिश्च विकृते सति वस्तुनि । दीपे निर्वापितेऽप्यासीत्कांचीरत्नैर्महन्महः ॥ Ku. 143. चशब्देन पूर्वरूपमिति संबध्यते । वस्तुनि वर्ण्यमानपदार्थे । विकृते विकारं प्राप्ते सति । निर्वापिते शमिते । महः तेजः । अत्र दीपतेजोविकारेऽपि रत्नतेजसा सम्नः पूर्वावस्थानुवृत्तिः । A.

The effect may be said to be facilitated also when it continues to exist although its cause which is ascertained to be always present along with it, is absent. Thus, पूर्वरूप is not different from समाधि. (*Vide* Udyota on समाध्यलङ्कार.)

44 प्रतिषेध.

प्रतिषेधः प्रसिद्धस्य निषेधस्यानुकीर्तनम् । न द्यूतमेतत्कितव क्रीडनं निशितैः शरैः ॥ Ku. 165. युद्धार्थं समागतं द्यूतकारं प्रति कस्यचिदुक्तिः । कितवः द्यूतकारः । द्यूते एव तव प्रागल्भ्यं न युद्धे इत्युपहासो व्यज्यते ।

This is nothing but a ध्वनि or गुणीभूतव्यंग्य काव्य. (*Vide* Udyota on व्याघातालङ्कार.)

45 प्रत्यक्ष.

प्रत्यक्षमिंद्रियज्ञानवर्णनं षड्विधं तु तत् । श्रुत्वा स्पृष्ट्वा च दृष्ट्वा च रसित्वाऽघ्राय यां जनः । मोदते घृतपक्वां तां शष्कुलीमर्पयामि ते । A.

That प्रत्यक्ष which is striking is nothing but भाविक. The प्रत्यक्ष which is different from it does not constitute a figure. (*Vide* Udyota on व्याघातालङ्कार.)

46 प्रश्नोत्तर.

प्रश्नं यत्रोत्तरे व्यक्तं गूढं वाप्यथवोभयम् । Vāg.

Ex. अस्मिन्नपारसंसारसागरे मज्जतां सताम् । किं समालम्बनं साधो रागद्वेषपरिक्षयः ॥

This is nothing but the second kind of उत्तर.

47 प्रस्तुताङ्कुर.

प्रस्तुतेन प्रस्तुतस्य द्योतने प्रस्तुताङ्कुरः । किं भृंग सत्यां मालत्यां केतक्या कंटकेद्धया ॥ प्रियतमेन साकमुद्याने विहरन्ती काचिद्भृंगं प्रत्येवमाहेति वाच्यार्थस्य प्रस्तुतत्वम् । Ku. 67.

मयि मनोहारिण्यां सत्यां किमुद्वेगकारिण्या परवनितयेति नायकवृत्तांतः प्राधान्येन प्रस्तुतोऽभिव्यज्यते । Ch.

By the word अप्रस्तुत in अप्रस्तुतप्रशंसा we may also understand a subject under discourse other than the principal one. Thus, प्रस्तुतांकुर is included under अप्रस्तुतप्रशंसा. (*Vide* Udyota on अप्रस्तुतप्रशंसालङ्कार.)

48 (a) प्रहर्षण.

वांछितादधिकार्थस्य संसिद्धिश्च प्रहर्षणम् ।
दीपमुद्योजयेद्यावत्तावदभ्युदितो रविः ॥ Ku. 130.

48 (b) प्रहर्षण.

उत्कंठितार्थसंसिद्धिर्विना यत्नं प्रहर्षणम् ।
तामेव ध्यायते तस्मै निसृष्टा सैव दूतिका ॥ Ku. 129.

48 (c) प्रहर्षण.

यत्नादुपायसिद्ध्यर्थात् साक्षाल्लाभः फलस्य च । निध्यंजनौषधीमूलं खनता साधितो निधिः ॥ Ku. 131. निधिः भूमिगतद्रव्यम् । तद्दर्शनसाधनं यदंजनं तत्साधनौषधीमूलं खनता मनुष्येण निधिरेव साधितो लब्धः इत्यर्थः ।

By extending the meaning of कारणान्तरयोगतः, we get समाधि in the following cases :—(1) when the desired object is obtained unexpectedly; (2) when, by means of an effort made for the obtainment of a desired object, something more is obtained; and (3) when, by means of an effort made for the obtainment of a means to an end, the end itself is obtained. Thus, the three kinds of प्रहर्षण are included under समाधि. (*Vide* Udyota on समाध्यलङ्कार.)

49 प्रेयस्.

भावस्य चापरांगत्वे प्रेयोलंकार ईरितः। धिक्तारुण्यमिदं यत्र प्रिया दैवेन दूरिता ॥ अत्र निर्वेदाख्यो भावो विप्रलंभशृंगाररसस्यांगम्। A.

Vide Remark on ऊर्जस्विन्.

50 प्रौढोक्ति.

प्रौढोक्तिरुत्कर्षाहेतौ तद्धेतुत्वप्रकल्पनम्। कचाः कलिंदजातीरतमालस्तोममेचकाः ॥ Ku. 125. कलिंदजा यमुना तस्यास्तीरे ये तमालस्तोमाः तद्वत मेचकाः श्यामाः। अत्र तमालानां श्यामलत्वे यमुनातीरोत्पन्नत्वं न हेतुरित्यहेतोस्तस्य 'श्यामसमीपस्थं श्यामं भवति' इति युक्तिमाश्रित्य तमालविशेषणं कृतम्। A.

This is that kind of अतिशयोक्ति where there is असंबंधे संबंध: (*Vide* Udyota on व्याजोक्त्यलंकार.)

51 (a) भाव.

यस्य विकारः प्रभवन्नप्रतिबद्धेन हेतुना येन।
गमयति तदभिप्रायं तत्प्रतिबन्धं च भावोऽसौ ॥ Ru.

Ex. ग्रामतरुणं तरुण्या नववंजुलमंजरीसनाथकरम्। पश्यन्त्या भवति मुहुर्नितरां मलिना मुखच्छाया ॥ यत्रासंबद्धहेतुना जायमानो विकारः स्वाश्रयस्य कंचिदभिप्रायं स्वस्य हेतुना सह संबंधं च बोधयति तत्र भावालङ्कारः। ग्रामेति। वंजुलो वृक्षविशेषः तन्मंजरीयुक्तः करो यस्य तादृशं ग्रामतरुणं पश्यंत्यास्तरुण्याः मुखच्छाया मलिना भवतीत्यर्थः। अत्र मालिन्यस्य मंजरीदर्शनं न क्वापि हेतुतया प्रसिद्धमित्यसंबद्धो हेतुः। मालिन्यरूपविकारेण वंजुलवने कृतसंकेता न गतेति व्यज्यते। तद्द्वारा मालिन्यमंजरीदर्शनयोः संबंधश्च व्यज्यते।

This is सूक्ष्म. (*Vide* Udyota on सूक्ष्मालंकार.)

51 (b) भाव.

अभिधेयमभिदधानं तदेव तदसदृशसकलगुणदोषम्।
अर्थान्तरमवगमयति यद्वाक्यं सोऽपरो भावः ॥ Ru.

एकाकिनी यदबला तरुणी तथाहमस्मिन्गृहे गृहपतिश्च गतो विदेशम्। किं याचसे तदिह वासमियं वराकी श्वश्रूर्ममान्धबधिरा ननु मूढ पान्थ ॥ यत्र

वाच्यार्थं प्रतिपादयद्वाक्यं वाच्यार्थापेक्षया विलक्षणविधिप्रतिषेधयुक्तं वक्तुरन्याभिप्रायं बोधयति तत्र भावालङ्कार इत्यर्थः। एकाकिनीति। निवासं याच्यमानायास्तरुण्याः पथिकं प्रत्युक्तिः। अत्र वाच्यो निवासनिषेधः निवासविधिरूपमाभिप्रायं बोधयति।

This is a **ध्वनिकाव्य.**

52 भावशबलता.

तद्भावशबलत्वं स्याद्बहूनां चेत्परांगता। धिङ्मां भोगरतं संतः किं वक्ष्यन्ति त्यजामि तान्। (भोगरतं मां धिक्। अनेन निर्वेदरूपभावो व्यज्यते। संतः किं वक्ष्यन्ति। अनेन शंकारूपभावो व्यज्यते। तान् भोगान् त्यजामि। अनेन मतिरूपभावो व्यज्यते। विरक्तस्योक्तिरियम्।) अत्र निर्वेदशंकामतीनां भावानां शांतरसस्यांगत्वम्। A.

V*ide* Remark on **ऊर्जस्विन्.**

53 भावसंधि.

परांगं भावयोर्योगो भावसंधिरलंकृतिः। यांती वेलां प्रतीक्षन्ती विलंब्य प्रियमाप सा॥ अत्रौत्सुक्यस्य शंकायाश्च संधिः शृंगाररसस्यांगम्। A.

V*ide* Remark on **ऊर्जस्विन्.**

54 भाविक.

स्वाभिप्रायस्य कथनं यदि वाप्यन्यभावना।
अन्यापदेशो वा यस्तु त्रिविधं भाविकं विदुः॥ S. K.

Ex. निःशेषच्युतचन्दनं स्तनतटं निर्मृष्टरागोऽधरो
नेत्रे दूरमनंजने पुलकिता तन्वी तवेयं तनुः।
मिथ्यावादिनि दूति बान्धवजनस्याज्ञातपीडागमे
वापीं स्नातुमितो गतासि न पुनस्तस्याधमस्यान्तिकम्॥

This is a **ध्वनिकाव्य.**

55 भावोदय.

भावोत्पत्तेः परांगत्वे भावोदय इति स्मृतः। सा प्रियं वीक्ष्य नम्रास्या नाशकद्वक्तुमीप्सितम्। अत्र व्रीडाख्यभावस्योत्पत्तिः शृंगाररसस्यांगम्। A.

56 मत.

तन्मतमिति यत्रोक्त्वा वक्तान्यमतेन सिद्धमुपमेयम्॥ ब्रूयादथोपमानं तथा विशिष्टं स्वमतसिद्धम्॥ Ru.

Ex. मदिरामदभरपाटलमलिकुलनीलालकालिधम्मिल्लम् । तरुणीमुखमिति यदिदं कथयति लोकः समस्तोऽयम् ॥

मन्येऽहमिन्दुरेष स्फुटमुदयेऽरुणरुचिः स्थितैः पश्चात् । उदयगिरौ छद्मपरैर्नैशातमोभिर्गृहीत इव ॥

This may be included under उत्प्रेक्षा.

57 मिथ्याध्यवसिति.

किंचिन्मिथ्यात्वसिद्ध्यर्थं मिथ्याऽर्थांतरकल्पनम् । मिथ्याध्यवसितिर्वेश्यां वशयेत्खस्रजं वहन् ॥ Ku. 127. कस्यचिन्मिथ्यात्वं किंचिन्मिथ्यात्वं तत्सिद्ध्यर्थं मिथ्याभूतार्थांतरस्य कल्पनं मिथ्याध्यवसितिरलङ्कारः । वेश्यामित्याद्युदाहरणम् । वेश्यावशीकरणस्यात्यंतासंभावितत्वं द्योतयितुं कस्यचिदुक्तिः । खस्रजं आकाशपुष्पमालाम् अत्र खपुष्पमालावहनोक्त्या वेश्यावशीकरणस्य मिथ्यात्वसिद्धिः । A.

This is that kind of अतिशयोक्ति where there is असंबंधे संबंधः. (*Vide* Udyota on व्याजोक्त्यलङ्कार.)

58 मुद्रा.

सूच्यार्थसूचनं मुद्रा प्रकृतार्थपरैः पदैः । नितंबगुर्वी तरुणी दृग्युग्मविपुला च सा ॥ अत्र नायिकावर्णनपरेण युग्मविपुलापदेनास्यानुष्टुभो युग्मविपुलानामस्वरूपसूच्यार्थसूचनं मुद्रा । Ku. 136.

This does not deserve to be a figure, because it does not minister to the object under description. (*Vide* Udyota on विशेषालंकार.)

59 युक्ति.

युक्तिः परातिसंधानं क्रियया मर्मगुप्तये । त्वामालिखन्ती दृष्ट्वाऽन्य धनुः पौष्पं करेऽलिखत् ॥ Ku. 156. गोप्यार्थरक्षणाय क्रियया परवंचनं युक्तिरलङ्कार इत्यर्थः । त्वामिति । नायकं प्रति दूत्या उक्तिः । त्वां नायकं आलिखन्ती नायिका अन्यं दृष्ट्वा गोप्याथसंभेदभिया तच्चित्रहस्ते पौष्पं धनुरलिखत् । अत्र ' कामो लिखितः ' इति परवंचनम् ।

The word उक्ति in व्याजोक्ति may mean simply an 'act.' Thus, युक्ति is but व्याजोक्ति. (*Vide* Udyota on व्याजोक्त्यलंकार.)

60 रत्नावली.

क्रमिकं प्रकृतार्थानां न्यासं रत्नावलीं विदुः । चतुरास्यः पतिर्लक्ष्म्याः सर्वज्ञस्त्वं महीपते ॥ Ku. 140. यथाकथंचित्प्रकृतसंबंधिनामर्थानां प्रसिद्ध-क्रमानुसारि प्रतिपादनं रत्नावल्यलंकार इत्यर्थः । चतुरास्यः ब्रह्मा सुंदरमुखश्च । लक्ष्म्याः पतिः विष्णुः संपत्तिमांश्च । सर्वज्ञः शंकरः सर्वविच्च । राजानं प्रति कवेरुक्तिः ।

This does not deserve to be a figure, because the object under description is ministered to by रूपक only and not by क्रम also. (*Vide* Udyota on विशेषालङ्कार.)

61 रसवत्.

अन्यांगत्वे रसस्य स्याद्रसवन्नाम तद्यथा । अहो स्यूतशरीरार्धः शंभुर्देव्या वशीकृतः । अत्र शृंगाररसः अद्‌भुतरसस्यांगम् । A.

V*ide* Remark on ऊर्जस्विन्.

62 ललित.

वर्ण्ये स्याद्वर्ण्यवृत्तांतप्रतिबिंबस्य वर्णनम् । ललितं निर्गते नीरे सेतुमेषा चिकीर्षति ॥ Ku. 128. आगत्य प्रतिनिवृत्ते नायके तदानयनं कर्तुमिच्छन्ती नायिकामुद्दिश्य सख्या उक्तिः ।

Ku. distinguishes this figure from निदर्शना by the fact that, in the latter, both the वृत्तान्त in question and the वृत्तान्त not in question which terminate in comparison are expressed by words, whilst, in the former they are not so. Upon this, Udyota remarks that there is no rule that निदर्शना occurs only when the प्रस्तुत and the अप्रस्तुत वृत्तान्तs are expressed by words. निदर्शना may occur even when these are implied. Thus, this figure is nothing but आर्थी निदर्शना. (*Vide* Udyota on निदर्शनालङ्कार.)

63 लिंग.

तल्लिंगं नाम यत्र स्याद्वर्ण्यच्चिह्ने प्रमाणता ।
त्रिलोक्याः शंकरःसाक्षी त्रिभिर्नेत्रैः प्रतीयते । A.

Vide Remark on अनुपलब्धि.

64 (a) लेश.

लेशः स्याद्दोषगुणयोर्गुणदोषत्वकल्पनम् । अखिलेषु विहंगेषु हंत स्वच्छंदचारिषु । शुक पंजरबंधस्ते मधुराणां गिरां फलम् ॥ Ku. 138. अत्र सर्वपक्षिणामवाग्मित्वदोषो गुणत्वेन, शुकस्य वाग्मित्वगुणो दोषत्वेन च वर्णितः । A.

विशेष occurs also when a good thing is looked upon as bad and a bad thing as good from a particular standpoint. Thus, लेश is not a distinct figure. (*Vide* Udyota on विशेषालङ्कार.

64 (b) लेश or लव.

लेशो लेशेन निर्भिन्नवस्तुरूपनिगूहनम् । Dan.

Ex. राजकन्यानुरक्तं मां रोमोद्भेदेन रक्षकाः । अवगच्छेयुरा ज्ञातमहो शीतानिलं वनम् ॥

अत्र शीतानिलनिमित्तको रोमोद्भेदः न तु राजकन्यानुरागनिमित्तक इति सूच्यते ।

This is nothing but व्याजोक्ति.

65 लोकोक्ति.

लोकप्रवादानुकृतिर्लोकोक्तिरिति भण्यते ।

सहस्व कतिचिन्मासान्मीलयित्वा विलोचने ॥ Ku. 157.

अनुकृतिः अनुकरणम् । अत्र लोचने मीलयित्वेति लोकप्रवादानुकरणम् । विरहिणीं प्रत्युक्तिः । एवं क्षपं मारयित्वा तिष्ठतीत्यादावपि । A.

This does not deserve to be a figure, because here there is no ministering to the expressed or suggested sense of the verse. (*Vide* Udyota on व्याजोक्त्यलंकार.)

66 वक्रोक्ति.

साद्दश्याल्लक्षणाः वक्रोक्ति । Vā.

Ex. उन्मिममील कमलं सरसीनां कैरवं च निमिमील मुहूर्तात् ।

अत्र नेत्रधर्मौ उन्मीलननिमीलने साद्दश्याद्विकाशसंकोचौ लक्षयतः ।

This does not deserve to be a figure because no strikingness is apprehended from it.

67 वर्धमानक.

रूपधर्माभ्यामाधिक्ये वर्धमानकम् । Rat.

Ex. जम्बीरश्रियमतिलंघ्य लीलयैव व्यानम्रीकृतकमनीयहेमकुंभाः ।
नीलांभोरुहनयनेऽधुना कुचौ ते स्पर्धेते कनकाचलेन सार्धम् ॥

This is obviously nothing but सार. (*Vide* Udyota on सारालङ्कार.)

Some hold that the verse विम्बोष्ठ एव रागस्ते etc. is an example of the figure वर्धमानक and not of पर्याय as is held by Mammaṭa, because, the word पर्याय, they say, is ordinarily employed by the people in connection with a thing which connects itself with another place after its connection with the first place is destroyed ; but in विम्बोष्ठ एव etc., the connection of राग with विम्बोष्ठ is not destroyed.

These men are not right, however. Because, the definition of पर्याय does not say anything about एकसंबंधनाश. It is true that the word which is chosen to designate the figure is the same as is used in ordinary life, still, this fact ought not to lead us to suppose that the word has been used in the same sense in which it is employed in ordinary life. This will show that there is no necessity to admit वर्धमान as a distinct figure. (*Vide* Udyota on पर्यायालङ्कार also R. G. p. 466 and 480.)

68 विकल्प.

विरोधे तुल्यबलयोर्विकल्पालंकृतिर्मता । Ku. 116.

Ex. इह नमय शिरः कलिंगवद्वा समरमुखे करहाटवद्धनुर्वा ।

There is no ground to recognise this as a figure, because विकल्प does not contribute to the excellence of the object under description, and also because the general definition of a figure उपकुर्वन्ति etc. given in the eighth Ullāsa does not apply to it. Others, however, include this under ससंदेह. (*Vide* Udyota on ससंदेहालङ्कार.)

69 विकस्वर.

यस्मिन्विशेषसामान्यविशेषाः स विकस्वरः । Ku. 124.

Ex. अनन्तरत्नप्रभवस्य यस्य हिमं न सौभाग्यविलोपि जातम् ।
एको हि दोषो गुणसंनिपाते निमज्जतीन्दोः किरणेष्विवांकः ॥

Here, two अर्थान्तरन्यासs, in one of which the particular is corroborated by the general, and in the other, the general is corroborated by the particular, exist together independently of each other. Thus, this is nothing but अर्थान्तरन्याससंसृष्टि. (*Vide* Udyota on अर्थान्तरन्यासालङ्कार.)

70 विचित्र.

विचित्रं तत्प्रयत्नश्चेद्विपरीतः फलेच्छया ।
नमन्ति संतस्त्रैलोक्यादपि लब्धुं समुन्नतिम् ॥ Ku 94.

नमन्ति प्रह्वीभवन्ति अनुद्धतस्वभावाःभवन्ति चासमुन्नतिं उच्चत्वं उत्कर्षं च।A.

The making of an effort which is inconsistent with a desired object is also Inequality. Thus, विचित्र is not distinct from विषम. (*Vide* Udyota on विषमालङ्कार.)

71 वितर्क.

संशयोत्तरमनिर्णये ऊहो वितर्कः । U.

Ex. अस्याः सर्गविधौ etc.

This does not deserve to be a distinct figure. For, inasmuch as a doubt must necessarily be admitted as the cause of वितर्क, it is this doubt that constitutes the figure. वितर्क, although present does not contribute to the excellence of the object under description, and does not, therefore, constitute a figure. Thus, वितर्क is included under ससंदेह. (*Vide* Udyōta on ससंदेहालङ्कार.)

72 विधि.

सिद्धस्यैव विधानं यत्तदाहुर्विध्यलंकृतिम् ।
पंचमोदंचने काले कोकिलः कोकिलो भवेत् ॥ Ku. 166.

पंचमस्य स्वरविशेषस्य उदंचनमाविष्करणं यस्मिंस्तादृशे काले वसन्ते कोकिलः कोकिलः मनोहरः कोकिलः भवेत् । अत्र कोकिलस्यैव सतः वसन्ते पुनर्विधानं मनोहरत्वबोधनाय । A.

This is nothing but a ध्वनि or गुणीभूतव्यंग्य काव्य. (*Vide* Udyota on व्याघातालङ्कार.)

73 विवृतोक्ति.

विवृतोक्तिः श्लिष्टगुप्तं कविनाविष्कृतं यदि । श्लिष्टगुप्तं वस्तु यथाकथंचित्कविनाऽऽविष्कृतं चेद्विवृतोक्तिः । Ku. 155.

पूर्वार्धे विलासप्रार्थनारूपं गुप्तं वस्तु उत्तरार्धे आमंत्रणभंगिसूचितपदेन कविनाविष्कृतम् ।

Ex. गच्छाम्यच्युत दर्शनेन भवतः किं तृप्तिरुत्पद्यते
किंचैवं विजनस्थयोर्हतजनः संभावयत्यन्यथा ।
इत्यामंत्रणभंगिसूचितवृथावस्थानखेदालसाम्
आश्लिष्यन् पुलकोत्करांचिततनुर्गोपीं हरिः पातु वः ।।

This also does not deserve to be a figure because it is merely a गुणीभूतव्यंग्य काव्य, and besides it does not minister to the expressed sense of the verse or the flavour of the piece etc. (*Vide* Udyota on व्याजोक्त्यलंकार.)

74 विशेषक. *Vide* उन्मीलित.

75 (a) विशेषोक्ति.

एकगुणहानिकल्पनायां साम्यदार्ढ्यं विशेषोक्तिः । Vā. यथा—‘ द्यूतं हि नाम पुरुषस्यासिंहासनं राज्यम् ’ ।

This is nothing but रूपक, inasmuch as there is here the superimposition of राज्य upon द्यूत; then to render this superimposition possible, the राज्य also is supposed as void of a throne. Thus, the रूपक is strengthened. Similarly, in धर्मो वपुष्मान् etc., where additional qualities are supposed in कार्तवीर्य—the object under description, there is no other figure than रूपक. (*Vide* Udyota on विशेषोक्त्यलङ्कार.)

75 (b) विशेषोक्ति.

गुणजातिक्रियादीनां यत्र वैकल्यदर्शनम् ।
विशेषदर्शनायैव सा विशेषोक्तिरिष्यते ॥ S. K.

Ex. न कठोरं न वा तीक्ष्णमायुधं पुष्पधन्वनः ।
तथापि जितमेवाभूदमुना भुवनत्रयम् ॥

This is nothing but विभावना.

76 विषादन.

इष्यमाणविरुद्धार्थसंप्राप्तिस्तु विषादनम् ।
दीपमुद्योजयेद्यावन्निर्वाणस्तावदेव सः ॥ Ku. 132.

इष्यमाणात् ईप्सितार्थात् विरुद्धो विपरीतो योऽर्थस्तस्य संप्राप्तिः । उद्योजयेत् स्नेहार्पणेन प्रदीपयेत् । निर्वाणः नष्टः । A.

That one thing should be desired and another opposed to that desire should be obtained is also Inequality. Thus) विषादन is not distinct from विषम. (*Vide* Udyota on विषमालङ्कार.)

77 व्याजनिंदा.

निंदाया निंदया व्यक्तिर्व्याजनिंदेति गीयते ।
विधे स निंद्यो यस्ते प्रागेकमेवाहरच्छिरः ॥ Ku. 72.

स शिवः । एकमेव न तु सर्वाण्यपि । अत्र हरनिंदया दुःखमयप्रपंच-कर्तृत्वेन स्रष्टृनिंदा गम्यते । A.

The word स्तुति in व्याजस्तुति may mean simply बोधन. Thus, व्याजस्तुति occurs also when from the censure of one the censure of another is suggested. This shows that व्याजनिन्दा is not a distinct figure. (*Vide* Udyota on व्याजस्तुत्यलङ्कार.)

78 व्याघात.

अन्यैरप्रतिहतमपि कारणमुत्पादनं न कार्यस्य ।
यस्मिन्नभिधीयेत व्याघातः स इति विज्ञेयः ॥ Ru.

Ex. यत्र सुरतप्रदीपा निष्कज्जलवर्तयो महामणयः ।
माल्यस्यापि न गम्या हृतवसनवधूविसृष्टस्य ॥

उत्पादनं उत्पादकम् । माल्यस्यापि न गम्याः माल्यप्रक्षेपेणापि न निर्वाप्याः।

This is but विशेषोक्ति.

79 शब्द.

श्रुत्यादिवाक्यविन्यासाभिश्रयः शब्द उच्यते । सांबः शंभुः परं ब्रह्म कैवल्योपनिषच्छ्रुतेः । A.

Vide Remark on अनुपलब्धि.

80 श्रुति.

प्रकृतार्थस्य शब्देन निर्वाहो यत्र सा श्रुतिः । मृत्युं हरसि भक्तानां तुष्टो मृत्युंजयोऽसि यत् । A.

Vide Remark on अनुपलब्धि.

81 समप्राधान्यसंकर.

द्वयोरपि प्रधानत्वे समप्राधान्यसंकरः । रत्नस्तम्भेषु संक्रांतप्रतिबिंबशतैर्वृतः। ज्ञातो लंकेश्वरः साक्षादांजनेयेन तत्त्वतः ॥ अत्रोदात्तस्यातिशयोक्तेरंगत्वं तस्याश्चोदात्तालंकारस्येति समप्राधान्यम् । A. अत्र द्वयोरलङ्कारयोः सापेक्षतया समप्राधान्यम् ।

This is nothing but अंगांगिभावसंकर.

पिनष्टीव तरंगाग्रैः समुद्रः फेनचंदनम् । तदादाय करैरिंदुर्लिंपतीव दिगंगनाः । अत्रोत्प्रेक्षयोः समप्राधान्यम् । अन्योन्यनिरपेक्षवाक्यद्वयोपात्तत्वात् । Ku. अत्र द्वयोरलंकारयोर्निरपेक्षतया समप्राधान्यम् ।

This is nothing but संसृष्टि.

82 समाधि.

समाधिमन्यधर्माणामन्यत्रारोपणं विदुः । S. K.

Ex. चन्द्रज्योत्स्नाविशदपुलिने सैकतेऽस्मिन् सरय्वा
वादद्वैतं सुचिरमभवत् सिद्धयूनोः कयोश्चित् ।
एको ब्रूते प्रथमनिहतं केशिनं कंसमन्यः
स त्वं तत्त्वं कथय भवता को हतस्तत्र पूर्वम् ॥

This is nothing but रूपक.

83 (a) समाहित.

समाहितं तद्भावस्य शांतिर्यत्र परांगता । मुक्तमाना स्वयं साऽभूत्तर्जिता घनगर्जितैः । अत्रामर्षाख्यभावस्य शांतिः शृंगाररसस्यांगम् । A.

Vide Remark on ऊर्जस्विन्.

83 (b) समाहित.

यस्सादृश्यं तत्संपत्तिः समाहितम् । Vā.

Ex. तन्वी मेघजलार्द्रपल्लवतया धौताधरेवाश्रुभिः
शून्येवाभरणैः स्वकालविरहाद्विश्रान्तपुष्पोद्गमा ।
चिन्तामोहमिवास्थिता मधुलिहां शब्दैर्विना लक्ष्यते
चण्डी मामवधूय पादपतितं जातानुतापेव सा ॥

This is nothing but उत्प्रेक्षा.

83 (c) समाहित.

कारणान्तरसम्पत्तिर्दैवादारम्भ एव हि ।
यत्र कार्यस्य जायेत तज्जायेत समाहितम् ॥ Vāg.

This is nothing but समाधि.

84 साम्य.

अर्थक्रियया यस्मिन्नुपमानस्यैति साम्यमुपमेयम् ।
तत्सामान्यगुणादिककारणया तद्भवेत् साम्यम् ॥ Ru.

Ex. अभिसर रमणं किमिमां दिशमैन्द्रीमाकुलं विलोकयसि ।
शशिनः करोति कार्यं सकलं मुखमेव ते मुग्धे ॥

यत्रोपमेयं उपमानस्य साम्यमुपैति, परंतु उपमायामिव न केवलं साधारणधर्मेण किं तु साधारणधर्ममूलिकयाऽर्थक्रियया तत्र साम्यालङ्कारः । उदाहरणे न केवलं शशीव कांतिमद्वदनमिति वर्ण्यते किं तु कांतिकार्यप्रकाशरूपेणेति ।

This is प्रतीपध्वनि.

85 सूक्ष्म.

यत्रायुक्तिमदर्थो गमयति शब्दो निजार्थसंबद्धम् ।
अर्थान्तरमुपपत्तिमदिति तत्संजायते सूक्ष्मम् ॥ Ru.

Ex. आदौ पश्यति बुद्धिर्व्यवसायोऽकालहीनमारभते ।
धैर्यं व्यूढमहाभरमुत्साहः साधयत्यर्थम् ॥

यत्रायुक्तिसिद्धोऽर्थः स्वसंबद्धं युक्तिमदर्थांतरं गमयति तत्र सूक्ष्मालङ्कारः उदाहरणे दर्शनक्रियाकर्तृत्वेनोच्यमानाऽपि बुद्धिस्तथा न घटत—अचेतनत्वात् ।

अतोऽयुक्तिसिद्धोऽर्थो बुद्धिरूपः स्वसंबद्धार्थांतरं पुरुषरूपं युक्तिमद् दर्शनक्रिया-कर्तृत्वयोग्यं गमयतीति लक्षणसंगतिः । एवं व्यवसायादिष्वपि ।

This is included under the first kind of अतिशयोक्ति.

86 संभव.

संभवः स्यादलङ्कारः प्रमाणत्वं प्रयाति यः ।
स्यान्मे कदाचिद्दिद्रत्वं चित्रा कर्मगतिर्यतः । A.

Vide Remark on अनुपलब्धि.

87 संभावना.

संभावना यदीत्थं स्यादित्यूहोऽन्यस्य सिद्धये ।
यदि शेषो भवेद्वक्ता कथिताः स्युर्गुणास्तव ।। Ku. 126.

ऊहः तर्कः । यदीति । ईश्वरं प्रत्युक्तिः ॥ शेषः सहस्रमुखः । अत्र यदीत्यादिकल्पनया ईश्वरगुणानंतत्वसिद्धिः ।

This is obviously the third kind of अतिशयोक्ति. (*Vide* Udyota on व्याजोक्त्यलङ्कार.)

88 (a) हेतु.

हेतोर्हेतुमता सार्धं वर्णनं हेतुरुच्यते । असावुदेति शीतांशुर्मानच्छेदाय सुभ्रुवाम् । Ku. 167.

This does not deserve to be a figure, since no striking-ness is apprehended from it.

88 (b) हेतु.

हेतुहेतुमतोरैक्यं हेतुं केचित्प्रचक्षते ।
लक्ष्मीविलासा विदुषां कटाक्षा वेंकटप्रभोः ।। Ku. 168.

This is included under the first kind of अतिशयोक्ति. *Vide* Udyota on अतिशयोक्त्यलङ्कार.)

A LIST OF ABBREVIATIONS
USED IN THE BOOK

A.—A commentary on the Kuvalayānanda by Āshādhara.
A. S.—Alaṅkāra-sarvasva.
Ch.—Chandrikā on the Kuvalayānanda by Vaidyanātha.
Chan.—Udāharaṇa-chandrikā by Vaidyanātha Tatsat.
Cha.—, Chakra.— Vistārikā by Chakravarti.
Dan.—Kāvyādarśa by Daṇḍin.
D. V.—Darpaṇa-vivṛti, a commentary on Sāhitya-darpaṇa.
K. P.—, Vām.— Kavya-prakās'a, m. m. Vāmanāchārya's first edition.
Ku.—, Kuv.— Kuvalayānanda by Appaya Dīkṣita.
Kam.—Kamalākarī by Kamalākara.
Na.—A gloss on the Kāvyālaṅkāra by Namisādhu.
Nid.—Nidarśana by Ānanda kavi.
P.—Pratāpa-rudra.
Pr.—Prabhā a commentary on the Kāvya-pradīpa by Vaidyanātha Tatsat.
Rat.—Ratnākara.
Ru.—Kāvyālaṅkāra by Rudraṭa.
R. G.—Rasa-gaṅgādhara by Jagannātha.
San.—Saṅketa by Māṇikya-chandra.
S. D.—Sāhitya-darpaṇa by Viśvanātha.
Sār.—Sārabodhinī by Śrīvatsa-lāñchana.
S. T.—Bāla-cittānurañjanī by Sarasvatī-tīrtha.
Sud.—, Sudh.— Sudhā-sāgara by Bhīmasena.
S. K.—Sarasvatī Kaṇṭhābharaṇa.
Vā.—Vāmana-Sūtra-Vṛtti.
Vāg.—Vāg-bhaṭālaṅkāra.

संकेतचिह्नानि

उ०—उद्योतः ।
कर्पूर० मं०—कर्पूरमंजरी ।
का० द०—काव्यादर्शः ।
कु० सं०—कुमारसंभवः ।
चं०—उदाहरणचंद्रिका ।
झ०—वामनाचार्य झल्कीकर ।
ध्व०—ध्वन्यालोकः (निर्णयसागर)।
न० सा०—नवसाहसाङ्कचरितम् ।
प्र०...प्रदीपः ।
बा० च०—बालचरितम् (भास)।
भा० का० लं०—भामहकाव्यालंकारः ।
मृ०—मृच्छकटिकम् ।
र० गं०—रसगंगाधरः ।
र०—रघुवंशम् ।
रु०—रुद्रटालंकारः ।
लो०—ध्वन्यालोकलोचनम् ।
वा० का० लं०—वामन-काव्यालंकार-सूत्राणि ।
सं०—संकेतः ।
ह० वि०—हरविजयम् ।

S ~~80.01~~
81.1

Mammata.

Kavyaprakasa.